सिद्धिम् ॥१२॥ तनुस्थः शिखी बांधवक्ले
शकर्त्ता तथा दुर्जनेभ्यो भयं व्याकुलत्वं ॥
कलत्रादिचिंता सदोद्वेगता च शरीरे व्य
थानेकधा मारुती स्यात् ॥१॥ धने केतु
रुग्व्यग्रता किं नरेशाद्धनेधान्यनाशो मु
खे रोगकृच्चे ॥ कुटुंबाद्विरोधो वचः सत्कृ
तं वा भवेत्स्वेगहे सौम्यगेहेति सौख्यम् ॥२॥

अथ केतोर्द्वादशभावफलान्याह ॥ तत्रादौ तनुभा० फलम् ॥
यस्य जन्मकाले शिखी केतुः तनुस्थो लग्नस्थः बांधवैर्भ्रात
भिः क्लेशकर्त्ता कलहकारकः ॥ दुर्जनेभ्यो दुष्टजनेभ्यो भयं व्या
कुलत्वं मनोव्यग्रता ॥ कलत्रादिचिंता ॥ सदोद्वेगता उद्वेग
शरीरे देहे मारुती वायुसंबंधिनी पीडा अनेकप्रकारा स्यादित्य
र्थः ॥१॥ अथ द्वितीयभा० के० फलम् ॥ धने द्वितीये केतुर्भवेत्त
दा धने द्रव्यविषये नरेशाद्राज्ञः सकाशाद्व्यग्रता ॥ धान्य
स्य आश्रितस्थानस्य नाशः ॥ मुखे रोगकरः ॥ कुटुंबात् मि
त्रादिभिर्विरोधः ॥ किं सत्कृतं वचः शोभनवाक्यमपि न स्वगृ
हे मेषगते सौम्यगेहे कन्यामिथुनयोरिति सौख्यं भवेदिति


TRADE MARK

॥ ॐ श्रीगणेशाय नमः ॥ नतिं कृत्वा गणेशाय विघ्नविध्वंसकारिणे । नि
र्विघ्नकृतिसार्थाय कमलापतये नमः ॥ १ ॥ हरिवंशकविः स्वार्थं परार्थं च
स्वरोदये ॥ व्याख्यानं मातृकादीनां स्वराणां नामजन्मनाम ॥ २ ॥ गुरुभ्यो
वकुधा श्रुत्वा यथाज्ञानं यथाधिया ॥ जयलक्ष्मीरिति मया टीका राज्ञी वि
रच्यते ॥ ३ ॥ अथ कविरानंदस्वरूपं ब्रह्म नमस्करोति अव्यक्तमिति ॥
अव्यक्तं करचरणादिसितन्तक्ष्म्यादिरहितं शांतं निर्गुणं योगिनां सनकादीनां
नितांतं प्रियं ॥ सर्वानंदस्वरूपं एवं सर्वगं सर्वव्यापिनं यद् ब्रह्म तस्मै न
मः ॥ १ ॥ पुनः सरस्वतीं नमस्करोति विविधविबुधवंद्यामिति विवि
धा ये विबुधा देवास्तैर्वंद्यां भारतीं सरस्वतीं प्रचुरचतुरभावं जनेभ्यो दातु
कामां वंद्यमानां नरपतिरिति लोके ख्यातनामा कविर्नरपतिजयचर्याना
मकशास्त्रं करोतीति ॥ २ ॥ अथ नरपतिकविः स्वदेशकुलव्याख्यापनं क
रोतीति ॥ विद्यालये मालवसंसदेशे धारापुरी रम्यनिवासवासी ॥ १ ॥

ॐ श्रीगणेशाय नमः ॥ मोहांधकारमग्नानां जनानां ज्ञानरश्मिभिः ॥
कृतमुद्धरणं येन नत्वाभिः शिवभास्करम् ॥ १ ॥ अव्यक्तमव्ययं शां
तं नितांतं योगिनां प्रियम् ॥ सर्वानंदस्वरूपं यत्तद्वंदे ब्रह्म सर्वगम् ॥ २ ॥
विविधविबुधवंद्यां भारतीं वंदमानः प्रचुरचतुरभावं दातुकामो जने
भ्यः ॥ नरपतिरिति लोके ख्याततनामाभिधास्ये नरपतिजयचर्याना
मकं शास्त्रमेतत् ॥ ३ ॥ कृते जयार्णवं नाम त्रेतायां ब्रह्मयामलम् ॥
द्वापरे विजयाख्यातं कलौ चैव स्वरोदयः ॥ ४ ॥ ब्रह्मयामलमाद्यं स्या
द्द्वितीयं विष्णुयामलं ॥ रुद्रयामलमाख्यातं चतुर्थं चादियामलम् ॥ ५ ॥

नानागमज्ञोन्वलोकपूज्यो बुधः प्रसिद्धो नरदेवनामा ॥ २ ॥ स्वरबल
फलवेत्ता दैहतत्त्वे च भिज्ञो विदितशकुनशास्त्रो तंत्रमंत्राधीशः ॥
कलितगणितसारासारचूडामणिज्ञो नरपतिरिति नामा तस्य पुत्रो व
भूव ॥ ३ ॥ ज्ञाने यः सर्वज्ञो नृपगणपूज्यः सरस्वतीसिद्धः ॥ तेन कृतं शा
स्त्रमिदं प्रचुरगुणं दोषरहितं च ॥ ३ ॥ यो वै त्रिशास्त्रमेतद्गुरुमुखकथि
तं सयुक्तिसिद्धं च ॥ व्यसनितिहिसदा समग्राकमलेन स्याद्विजयश्रीः ॥ ४ ॥
जित्वारिपुं नृपलक्ष्मी ददाति निजभूपतेर्न सन्देहः ॥ एतकालेन बुध
भूतविधे चैव संग्रामे ॥ ५ ॥ श्रीमत्यासौवर्णीनगरे ख्यातो श्री अ
जयपालनृपराज्ये ॥ श्रीपतिनरपतिकविना रचितमिदं तत्र संस्थे
न ॥ ६ ॥ गौरांगी नवयौवनां शशिमुखीं तांबूलगर्भाननां मुक्तामं
डनभूषमाल्यवसनां क्षीरखंडचर्चांकितां ॥ दृष्ट्वा कामपिकामि
नीं स्वयमिमां ज्ञात्वा ह्रीं पुरो भावये दंतप्रेन्तये तो जनस्य मनसि त्रै
लोक्यमुन्मीलितां ॥ ७ ॥ इति नरपतिजयचर्यास्वरोदये कविप्र
शंसा ॥ अस्यार्थः सुगम एव व्याख्यानं न कृतं प्रयोजनाभावात् ॥ ८ ॥

॥१२॥

न॰ त्रि॰ ज॰ ९॥

अथ ग्रंथकृद्ग्रंथकरणे स्वसामर्थ्यप्रकटनं ग्रंथाध्ययनमाह ॥ श्रुत्वाग
दिति ॥ ७ ॥ स्पष्टार्थः ॥ अथ स्वरसामर्थ्यप्रधानतामाह ॥ यस्येति ॥ ८ ॥ स्व
रोदयी स्वरशास्त्रं सम्यक् जानातीति स्वरोदयी स्वरज्ञो ज्योतिषिकस्तेन
हीनो रहितः यस्य गजेश्वपालस्य वाहिनी दिग्विजयश्रीलां राजा तथा
विभंगमायाति संग्रामात्पलायते किं पुनः स्वल्पसैनिकः ॥ ११ ॥ अथ
स्वरबलसहितस्य राज्ञः सामर्थ्यमाह ॥ तावज्जरंति ते वीरा इति ॥ ते वीराः
भटाः स्वरज्ञप्रज्ञाः स्वरबलाढ्या आहवसागरं संग्रामसमुद्रं तावदेव
दोर्भ्यां तरंति संग्रामपारंगच्छंति यावत्कालं अविघ्नजयप्रापकं स्व
रबलं तिष्ठति तावद्बाहुभ्यां डोलाविद्भुः रुद्रः दुर्गा नलेशः । निवृत्ति प्र
वृत्ति शक्ति शांति शांत्यातीत इच्छा मोह क्रोध मद मात्सर्ज शब्द रूप रस
स्पर्श गंधाद्यधिष्ठितत्वादेव मेवशब्देन जयति किं पुनः खड्गादिशस्त्रसहि
तः तावदित्याकांक्षायामन्यदाह ॥ यावदिति यावत्तेषां स्वरास्ते वडवान
ले चक्रे नोपतंति स्वराणामते स्वरास्तस्य वडवानल वडवाग्निर्नीत
मुखे योऽनलोऽग्निः स वडवानलस्तस्य चक्रे सम्यग्रहे नपतंति स्वरान्

स्कंदं च यामलं चैव वषट्कर्मस्य यामलं ॥ सप्तमं यामलं देव्या
इति यामलसप्तकम् ॥ ६ ॥ श्रुत्वादौ यामलान्सप्त तथा युद्ध
जयार्णवं ॥ कौमारीकौशलं चैव योगिनीजालसंवरम् ॥ ७ ॥
रक्षोघ्नं च त्रिमुंडं च स्वरसिंहं स्वरार्णवं ॥ भूबलं भैरवं नाम प
टलं स्वरभैरवम् ॥ ८ ॥ तंत्रे रणकृत्ये ख्यातं सिद्धांतं जयपद्ध
तिं ॥ पुस्तकेंदुं च डौकं श्रीदर्शीनं ज्योतिषं तथा ॥ ९ ॥ मंत्रयं
आराधनेकानि कूटचक्राणि यानि च ॥ तंत्रयुक्तिं च विज्ञाय
विज्ञानं वडवानले ॥ १० ॥ तेषां सर्वशास्त्राणां दृष्ट्वा सारोद्धारं
मात्मना सारोद्धारं मतिर्ब्धमि सर्वसत्वानुकंपया ॥ ११ ॥ यस्य
गजेश्वपालैः संपूर्णा यदि वाहिनी = तथा विभंगमायाति न वेत्ति यः
स्वरोदयी ॥ १२ ॥ तावज्जरंति ते वीरा दोर्भ्यामाहवसागरम् ॥ याव
त्तेषां पतंति नो चक्रे स्वरास्ते वडवानले ॥ १३ ॥
तद्रूपे वडवानले ॥

श्लो स्वराः ज्ञाश्रमिताः स एव संग्रामसागरस्तस्मिन् स्वनामसमाज्ञोदयः मात्रावर्णग्रहोजीवादयोऽ क्रूरास्वरेषु ते स्वरे
ले चक्रे वडवानलवक्रे वलतमू मोनपतंति तस्मिन्संग्रामसागरे वडवानला
म पारंगच्छंति यत्पुनः संग्रामं कुर्वन्नस्वरसमयं तावदेव स्वरबलसहितं संग्रा
सागरे विलयं यांति यथा स्वरबले नाढ्याः पुरुषाः समयं आश्रमतः संग्राम
मं तु कोलाहलमात्रं समुद्रं तरंति यावत्स्थाने बाहुभ्यामेव समुद्रपारं
विधये तत्र चेत्पतंति तदा च लगेव विलयं यांति समुद्रे वडवानलभ्रमि
अदित स्वराजयकारणमेवमुख्यं तेनात्मवमेव विजयार्थिभिः स्वरोदयज्ञा
ग्याद्याः स्वरोदयशास्त्रं पठितव्यमिति ॥ १३ ॥ तथाह ॥ कथं चेदिति सुगमं ॥ १४ ॥ अथ स्वरज्ञं विना यथा
जयो भवति तथाह ॥ यस्ये कोपीति ॥ यस्य नरपस्य राज्ये स्वरज्ञो नास्ति अन्यत्स्वरहीनं नृपं प्रमा
णायति तं स्वराज्यं रंभाक

॥ अथ पुनः स्वरज्ञमेव प्रशंसति चरः सुगमं २६॥ अथ स्वर बल
प्रशंसामाह ॥ २ ॥

दलीस्य स्वाः स्वारोदयं भाति तत्र जोशत्रुभिः सुखेनाभिभूयते ॥ २५॥ दशैकेनेति
दलीसस्याः स्वारोदयं भाति तत्रजोशत्रुभिः सुखेनाभिभूयते दशाभिः रा
जेकोपी स्वरबली राजा दश राजबलानि लीलया ज्ञानाज्जासेन जयति दशाभिः रा
जभिः स्वरवलिभिः शतं शत्रूणां जयति एवं शतैः सहस्रं जयति एतावता स्व
रबलमेव जयेषु प्रमाणं ॥ २७॥ अथ प्राग्उक्तमेव स्वरचतं स्वरावरं च प्रमाणय
ति ॥ पृथ्व्येरपीति पृथ्व्येरपि कोर्थः पृथ्व्यधाग्निभिः सदापि हीनः स्वरोदयेन भवेन न
योद्धव्यं न युद्धं कुर्यात् किंपुनः शास्त्रपातिनासह एतावता यावत्कालं हीनः
स्वराणां समयान्निश्चिति स्वरोदये बलेप्राप्ते स्वनामपोत्रादि स्वरबलं प्राप्य शास्त्रकोटि
टिभिः शास्त्रधारिणां कोटिभिः सहयोद्धव्यमिति ॥ २८॥ अधुना यावत्कर्तव्यो
देकमाह राज्ञाद्वृश्यमेवे धांसग्रहः कर्तव्य इति नदाह ॥ स्वरज्ञ इति ॥ २९॥ स्वरचक्रा
णीति २० यामलेष्विति २१ मात्रावलीति २२ द्वादशाब्द मिति २३ नक्षत्रकालमिति २४
एकाशीति २५ एकोशीति ॥ २६॥ ॥
सुगमं ॥ इति स्वरोदये चक्रनोमा स्मि ॥ ॥ दूर्वमुक्तेष्विति

कथं चिद्विजयी युद्धे स्वरज्ञेन विना नृपः ॥ एतावता स्वरबलमेव मतं तत्रु यथा
धचरेक ग्रहः ॥ २४॥ यस्पैको पि गृहे नास्ति स्वरशास्त्रस्य पारगः ॥
रंभास्त्रं भोपमं राज्यं निश्चितं तस्य भूपतेः ॥ २५॥ स्वरशास्त्रे सदाभ्या
दी सीसत्यवाजिते द्विपः ॥ देस्य देशस्य यः कर्माजयश्रीहस्तेन पभजे ॥
तु ॥ २६॥ दशैकेन शतं तेस्त्र सहस्रं शतसंख्यया ॥ स्वरोदयव
लेनैव देशायं हन्ति लीलया ॥ २७॥ पृथ्व्येरपि न योद्धव्यं यावद्धी
नः स्वरोदये ॥ स्वरोदयबले प्राप्ते योद्धव्यं शास्त्रकोटिभिः ॥ २८॥
स्वरज्ञः शकुनज्ञश्च दैवज्ञो मंत्रपारगः ॥ केरलीचिन्तपारज्ञो कीर्ति
तेरत्नपंचकम् ॥ २९॥ स्वरचक्राणि चक्राणि भूवलानि बलानि च ॥
ज्योतिषं शाकुनं चैव षडंगानि यदायन्तं ॥ २०॥ यामलेषु च सर्वेषु यानु
क्तानि स्वरोदये ॥ अधुना तानि वक्ष्येहं स्वरचक्राणि विंशतिः ॥ २१॥ मा
त्रावलीमहाजीवो राशिभं योड्यो गको ॥ द्वादशाब्दोदयं चक्रं वर्षायन
तुमासिकम् ॥ २२॥ पक्षाहर्नाडिकं चक्रं तिथिवारर्क्षयोगकं ॥ नक्षत्रसुप
लंकाश्च स्वरे देहोद्भवं तथा ॥ २३॥ इति स्वरचक्राणि ॥ पूर्वमुक्तेषु यानि
लोषु मयात्मानि यानि च ॥ चेतु राशीति चक्राणि तेषां नामानि
वक्ष्यहं ॥ २४॥ एकाशीतिपदं चक्रं शतपदं नवांशकं ॥ कत्रं सिंहा
सनं चक्रं कूर्मं पंचविधं त्रिविधं ॥ २५॥ भूदेशं नगरं क्षेत्रं गरहकूर्मं च
पंचमं ॥ पद्मचक्रं फणीशाख्यं राहुकालानलं मतं ॥ २६॥ सत्कला
लानलं चक्रं चंद्रकालानलं तथा ॥ घोरकालानलं चक्रं गूढकाला
नलं मतं ॥ २७॥ शिखिसूर्यसमायोगे चक्रकालानलं मतं ॥ सप्तद्वीस
प्तमं ज्ञेयं सप्तकालानलानि च ॥ २८॥ तिथिवारं च नक्षत्रं त्रिधा चैव
कुलाकुलं ॥ कुम्भचक्रं द्विधा प्रोक्तं राशिनक्षत्रसंभवम् ॥ २९॥ अस्तारं च
क्रवेधं च त्रिधातुर्युक्तमं ॥ भूचरं खेचरं पया नाडीचक्रं त्रिधा मतं ३०॥
कालचक्रं फणिद्वंद्वं स्तर्पाख्यं चंद्रजं तथा ॥ कविचक्रं द्विधा प्रोक्तं
स्थानस्वाम्य वंदेकं ॥ ३१॥ खलाकाख्यं द्विधा चैव हस्तिकास्थान
भादिकम् ॥ कोटचक्राष्टकं प्रोक्तं चतुरस्रादिभेदतः ॥ ३२॥ गजेभ
श्वेरथं व्यूहं कुन्तं खड्गं कुरिधनुं ॥ सोरिं सेवा नरं डंभं पद्मिवर्गा पवर्ष
णं ॥ ३३॥ सप्तरेखोद्भवं चक्रं पंचरेखं द्वुभास्करं ॥ त्रिविधं मात्रिका
चक्रं विशेषं श्येनतोरणे ॥ ३४॥ अहिलांगलबीजोप्ति द्वष्टारख्यं सद्
ताडिकम् ॥ चक्रं सांवत्सरं स्थानचक्रं संगो न्याति सपा ॥ ३५॥ एतानि

॥२॥
न॰ त्रि॰
ज॰ टी॥
२

सर्वचक्राणि ज्ञात्वा युद्धं समाचरेत् ॥ जयेदिह न संदेहो
शत्रुं तु स्वेपि भैरवि ॥ ३६ ॥ इति चक्रे नामानि ॥ अथा
तः संप्रवक्ष्यामि भूबलान्यभिधानतः ॥ कथितं हि तथा यु
द्धे चातुरंगे महाहवे ॥ ३७ ॥ स्वरोदये च चक्रे च श
त्रुर्यस्य समोधिकः ॥ तत्र युद्धे बलं देयं भूबले विजि
यार्थिनाम् ॥ ३८ ॥ तेषां नामान्यहं वक्ष्ये ख्यातानां
शृणु पार्वती ॥ चतुराशीति संख्यानां यद्बलेन जयी
रणे ॥ ३९ ॥ उड्डी जालंधरी पूर्णा कामा कौलेकवी
रिका ॥ त्रिलोकी चमत्कारी क्षेत्रपाली च वंशजा ॥ ४० ॥
भद्रकाली नली काली कालरेखा निरामया ॥ जयल
क्ष्मीर्महालक्ष्मीर्जया विजयभैरवी ॥ ४१ ॥ बालयो
गेश्वरी चंडी माया भुक्तेश्वरी ॥ शार्दूली सिंहलीन
त्वी महामाया महेश्वरी ॥ ४२ ॥ देवकोटिः शिवा शान्ति
र्वरमालावराटिका ॥ त्रिमुंडा वत्सरी धर्म्या अमृता घटा ॥
लया ऽक्षया ॥ ४३ ॥ दुर्मती भ्रमरा गौरी काली नारहरी बला ॥
खेचरी भूचरी गुह्या ज्वालादर्शी हरिकेवला ॥ ४४ ॥

भूदेशेति । २७ सूर्यकालानलमिति । २८ शशि सूर्येति । २९ तिथिवारंचेति ३० ॥
प्रस्तारेति । ३१ कालचक्रमिति ॥ ३२ । स्वरसंख्यामिति । ३२ गजमश्वरथेति । ३३ ॥
सप्तरेखोद्भवमिति ॥ ३४ ॥ अहिलांगलेति । ३५ । राशीनिति । ३६ ॥ इति चक्र
नामानि ॥ अथेति स्पष्टम् । ३७ ॥ अथ भूबलानां नामानि । स्वरोदयेति ॥
नाम जं मात्रा यथ भिः स्वरे वीर्या दिकालजैः स्वस्वरैः शत्रुर्यदि समब
लोधिको वा भवति तत्र जयार्थिनां राज्ञां भूबले बलं देयं ॥ स्वरबलात्
लेन शत्रुणा सह जयपराजयौ तुल्यमेव स्यातः आत्मनः स्वरबलेऽधि
कोयदि शत्रुस्तदा शत्रोरेव जयः अत्र युद्धे यस्य राज्ञो अस्य जयार्थि ना
भवति कथमसौ मया जेतव्य इति स्वरज्ञं पृच्छति तत्स्वरतो भूबलानि
तस्मै दत्वा युद्धाय तं प्रयोजयेत् ॥ जयं जयेति तेषां भूबलानां नाम
न्याह ॥ स्वरोदये चेति । ३८ ॥ तेषामिति । ३९ ॥ उड्डीति ॥ ४० ॥ भद्रकाली
ति । ४१ । बालायोगेश्वरीति । ४२ । देवकोटिरिति । ४३ । दुर्मतीति । ४४ ॥
त्रैलोक्येति । ४५ । बहुलेति । ४६ ॥ राहुकालीति । ४७ । चन्द्रः सप्तवि
धेति ॥ ४८ ॥ अमृतेनि भूबलानिति ॥ ४९ ॥ स्पष्टार्थाः ॥ ४९ ॥
शत्रोः समाधिकेति । ५० ॥ अथमेति । ५१ ॥ यथा शत्रुः सुजयो भवति
तथा मंत्रयंत्रादिके बले जयो पार्थं वक्ष्ये ॥ ५२ ॥ तान्याह । मंत्रयंत्रा
दीनां नामानि । रणाभिषेचनमिति ॥ ५३ ॥ भैरवलेति ॥ ५४ ॥ योगप
ट्टिनेति ॥ ५५ ॥ ओसकमिति ॥ ५६ ॥ पताकेति ॥ ५७ ॥ बलान्येतानी
ति स्पष्टार्थाः ॥ ५८ ॥ इति मंत्रयंत्रबलानि ॥ ॥

त्रैलोक्यविजयासौरीकरालीवडवा १२ ॥ रौद्री च शिशुमातंगी
चाभियाद्दहनीजिता ॥ ४५ ॥ बहुलावर्गभूमी च कपाली चाग्नि
ज्वानला ॥ चंद्रार्कबिंबभूमी च ग्रहराशिविलग्नका ॥ ४६ ॥
राहुकालानलीभूमिः स्वरभूमिर्द्विधा मता ॥ ऊर्ध्वलिंगमसिंक ॥
श्चैव राहुश्चा द्विविधस्तथा ॥ ४७ ॥ चन्द्रः सप्तविधः स्वयश्च ॥
तुर्धा योगिनी त्रिधा ॥ कालं बलं त्रिभेदं च तिथिनक्षत्रवारजं ॥ ४८ ॥
अमूनि भूबलान्यत्र ज्ञात्वा यः प्रविशेद्रणे ॥ अरयस्तस्य न ॥
श्यंति मेघा वातहता यथा ॥ ४९ ॥ इति भूलानि ॥ शत्रोः ॥
समाधिके नाम्नि स्वरे भ्रात्रे श्वभृ बले ॥ स्थानसैन्याधि ॥
के शत्रो बलिवुज्ञानसंयुते ॥ अभंगे चाप्यभेदे च दुःसा ॥
ध्ये दुर्जये रिपौ ॥ जयोपायमहं वक्ष्ये मंत्रयंत्रादिकं बलं ॥ ५० ॥ ५१ ॥
रणाभिषेचनं दीक्षा रणचारलेकं करणं ॥ वीरपट्टं रणे पट्टं
जयपट्टस्य बंधनं ॥ ५३ ॥ मेखलाकवचं न्यासं मुद्रारक्षा च
कंचुकम् ॥ औषधं तिलकं तज्ञाघुटिकास्रक्कपर्दिका ॥ ५४ ॥
योगघटितशस्त्राणि शस्त्ररक्षाप्रमोचनं ॥ शस्त्रलेपाश्च वि
विधा वारणानां पिच्छबंधनम् ॥ ५५ ॥ आसकं काहलाढक्का
मुरजं भस्मसाधनं ॥ मारणं मोहनं स्तंभं विद्वेषोच्चाटनं वशं ॥ ५६ ॥
पताकापिच्छकं यंत्रे परविद्याविनाशनं ॥ शांतिकं निजसैन्यस्य
सर्वोपद्रवनाशनम् ॥ ५७ ॥ बलान्येतानि यो ज्ञात्वा संग्रामं कु
रुते नृपः ॥ असाध्यस्तस्य वै नास्ति शत्रुः कोपि महीतले ॥ ५८ ॥
इति मंत्रयंत्रौषधबलानि ॥ ५८ ॥ गणितं व्यवहारं च होराशा
नेपरिस्फुटं ॥ त्रिस्कंधं ज्योतिषं वक्ष्ये जयचर्यास्वरोदये ॥ ५९ ॥
खेचरानयनं स्पष्टं पंचांगं तिथिसाधनं ॥ उदयास्तमनं चक्रं
तिथिविक्षेपयोः क्रांतिः ॥ ६० ॥ नतोन्नतप्रमाणं च भावसंधिप्रसा
धनं ॥ ग्रहाणां बहुलं वक्ष्ये राशिभफलान्वितं ॥ ६१ ॥ राशिसं
साश्रभेदं च खेचराणां तथैव च ॥ नृणां जन्मफलं वक्ष्ये
राशिपाल्लग्नजम् ॥ ६२ ॥ फलं चंद्रार्कयोगानां ग्रहाणां स्वोच्च
नीचकम् ॥ आयुर्दायैर्दशाश्चैव बलासां कालप्रवेशजे ॥ ६३ ॥
तस्माल्लग्नेग्रहाणां स्पष्टानां दशांतर्दशायोः फलं ॥ ग्रहवर्गाष्टकं स्प
ष्टं तस्माद्दिनफलं भवेत् ॥ ६४ ॥ ताजको जन्मलग्नस्य सा
धनं च परिस्फुटं ॥ वर्षमासदिवालग्नं तस्माद्दशास्ततः फलं ॥ ६५ ॥

अथ द्वितीयस्कंधे ज्योतिषांगमाह ॥ गणितमिति ॥ ५९ ॥ खेचरानयन
मिति ॥ ६० ॥ नतोन्नत इति ॥ ६१ ॥ राशिसंज्ञा इति ॥ ६२ ॥ फलं चंद्रार्कयोरिति ॥ ६३ ॥
तस्माल्लग्नमिति ॥ ६४ ॥ ताजिकोक्तेति ॥ ६५ ॥ कायोत्थलिमिति ॥ ६६ ॥ सिद्ध
च्छायेति ॥ ६७ ॥ लग्नमानमिति ॥ ६८ ॥ तिथिप्रकरणमिति ॥ ६९ ॥ चंद्रताराबलमिति
॥ ७० ॥ सिद्धसंवर्तकमिति ॥ ७१ ॥ यमघंटमिति ॥ ७२ ॥ वारस्थलमिति ॥ ७३ ॥

फलंग्रहस्येति ॥७४॥ पीडास्थानेति ॥७५॥ शीघ्रवक्रमिति ॥७६॥
वाल्गुदीपेति ॥७७॥ तिथ्यादिपंचकेति ॥७८॥ अंगस्पंदमिति ॥७९॥
ज्योतिषांगमिति ॥८०॥ पोतकीति ॥८१॥ स्पष्टार्थाः ८२॥ इति जय
लक्ष्म्यां शास्त्रसंग्रहाध्यायः प्रथमः ॥१॥ अथात इति ॥ अथानंत
र शास्त्रसंग्रहाध्यायानंतरं मात्रादिभेदभिन्नानां स्वराणामुदयान्
ब्रह्मयामलेयान्ओंकारान् तानहं वक्ष्यामि प्रकर्षेण कथयामीति संबं
धः ॥२॥ अथ स्वराणां षोडशोदयान्वक्ष्ये स्वरानादावाह ॥ मातृकाया
मिति पुरा सृष्ट्यादौ मातृकायां मातृकाचक्रे ब्रह्मणा षोडश संख्यया
स्वराः प्रोक्ताः ते स्वराः अआइईउऊऋॠऌॡएऐओऔअंअः एतेषां
मध्ये द्वावंतिमौ अंअः इति त्याज्यौ एषु चत्वार एषु चत्वारो नपुंसकाख्याः
षां योत्पत्तिं त्रिधा वक्ष्ये विषमध्यं दिने क्षणां ॥ दिनमानं दिनमु
ऋमुदये वा घटीषु च ॥६६॥ सितकृष्णायात्रिषष्टिं चतुष्टभासप्त
विंशति ॥ लग्नोदयास्वदेशीयालेभ्यो लग्नस्य साधनं ॥६७॥
लग्नमानं ततो होरा द्रेष्काणं सप्तमांशकं ॥ नवांश द्वादश त्रिंशद्
हयास्तांशकानपि ॥६८॥ तिथिप्रकरणं वक्ष्ये वारनक्षत्रयोस्तथा ॥
योगाख्यं करणाख्यं च मुहूर्तसंक्रमोद्भवम् ॥६९॥ चंद्रताराबलं
चैव पक्षभेदेन संयुतं ॥ शुभाशुभाख्ययोगांश्च तिथिवारर्क्षयोगजा
नं ॥७०॥ सिद्धं संवर्तकं चैव तथा वारशुभाशुभं ॥ अथवमेत्रिदिनं व
ल्पे ततो योगं त्रिपुष्करं ॥७१॥ यमघंटं यमदंष्ट्रां क्रकचार्गलपात
कान् ॥ कुमारं तरुणं वृद्धं स्थूलां निश्चलयोगिनीं ॥७२॥ वारस्थूलंत
थाकालं कालवेलां परिस्फुटं ॥ कालहोरार्धयामं च कुलिकं कंटक
दग्धं ॥७३॥ फलं ग्रहणविध्यस्य वत्सभार्गवयोः फलं ॥ दृष्टां चांतर्द
शां स्थूलां वक्रातिचारयोः फलं ॥७४॥ पीडास्थानानि खेटानां
ग्रहावस्थास्तथैव च ॥ भावफलं संधिफलं राशानां वेधमुपग्रहान् ॥७५॥
शीघ्रवक्रग्रहादेशं गोचरं गोचरस्य धं ॥ विवाहं च प्रतिष्ठां च दीक्षाया
आत्रवेशनं ॥७६॥ वाल्गुदीपो चविन्यासं कालविंशोपकास्तथा ॥ ज
लयोगार्घकांडं च वर्षमासदिनार्घकेतु ॥७७॥ तिथ्यादिपंचकं गास्त्रं
चंद्रेनात्काल संभवम् ॥ अथ स्थानक्षगुद्धिं च लक्कां चंद्रादुदाग्य
अंगस्पंदानिसर्वाणि कालचिन्हानि यानि च ॥ उत्पत्तिरिष्टान्यहं वक्ष्ये ॥७८॥
नयाशेषां च शांतिकं ॥७९॥ ज्योतिषांगमिदं सर्वं ये जानंति म
स्त्री विप्राः ॥ दीपवज्ज्ञानि जानीयाच्छोतांधकारनाशने ॥८०॥
इति ज्योतिषं ॥ पोतकीपिंगलाकाकोपक्षेः शिवाक्रमेण च ॥ पंचर
त्वेमिदं वक्ष्ये पक्षांगे शकुने मते ॥८१॥ इति शकुनं ८२॥ इति श्री नरपति
जयचर्यायां स्वरोदये सशास्त्रसंग्रहाध्याये शास्त्रसंग्रहाध्यायः प्रथमः १॥

॥१॥ प्रथमः ॥१॥
॥१॥१॥१॥

॥१॥

ते च ऋ ॠ ऌ ॡ इति शेषा दश स्वरास्थिताः ते च अ आ इ ई उ ऊ ए ऐ ओ औ
एते ये शेषा दश स्वरा तेषु द्विद्विकेषु एकैकमेव गृह्णीयात् ते च अ इ उ ए ओ
द्वितीयास्थाने नैव तुल्याः अथ तेषां दशानां द्विद्विस्थितानां द्वयोर्द्वयोर्
कैरा एव गृहीता नान्द्विमिति अत्रोच्यते अकारश्चाद्यो वासुदेवः प्रधानत्वात्
अकार एव गृहीतः इकारस्तु श्रीः सा वासुदेवस्य प्रिया अत इकारो गृहीतः ॥

॥ अथातः संप्रवक्ष्यामि प्रोक्तं यद्ब्रह्मयामले ॥ मात्रादिभेदभिन्नानां
स्वराणां षोडशोदयात् ॥ १ ॥ मातृकायां पुरा प्रोक्ताः स्वराः षोड
श संख्यया ॥ तेषां द्वावेति मौ त्याज्यौ चत्वारश्च नपुंसकाः ॥ २ ॥
शेषा दश स्वरास्तेषु स्यादेकैको द्विके द्विके ॥ तेषां अतः स्व
राख्यास्ते स्वराः पंच स्वरोदये ॥ ३ ॥ लाभालाभे सुखं दुःखं
जीवितं मरणं तथा ॥ जयः पराजयश्चेति सर्वं ज्ञेयं स्वरोदये ॥ ४ ॥
स्वरादिमातृकोच्चारो मातृव्याप्तं जगत्त्रयं ॥ तस्मात्स्वरोद्भवं
॥ सर्वं त्रैलोक्यं सचराचरम् ॥ ५ ॥

उकारस्तु रुद्रः एकारः सूर्यः ओकारश्चन्द्रः अतो अकारादुत्तरोत्तरात् पंच ह्रस्वा
एव गृहीताः यतस्त एव शुभाशुभं प्रकटीकुर्वन्ति अकारे लयस्थलं आकारे ल
वितदेवफलं अलभ्यमाद्यकारश्चोत्पीडितः आकारस्यापि स एव दोषः एव
मिकारादयो विज्ञेयं ॥ २ ॥ तेषां अतः स्वरा इति ॥ ३ ॥ अथैषां ग्रहणांसि
द्धिं प्रकटयति ॥ लाभालाभे सुखं दुःखमिति एषां स्वराणामुदये लाभप्रश्ने ला
भं विजानीयात् तथा अलाभमपि सुखप्रश्ने सुखं दुःखमपि रोगपृच्छादि
नां जीवितमरणप्रश्ने जीवितं मरणं च विद्यात् एवं सर्वत्र प्रश्ने स्वरा
एव फलप्रकाशकाः ॥ ४ ॥ स्वराणां सर्वत्र प्रधानतामाह ॥ स्वरादिमा
तृका इति ॥ सर्वेषां चराचराणां उच्चारो नाम ग्रहणं अकारादिमातृका
भिर्वेति न ह्यकारादिमातृकां विना वर्णा उच्चारयितुं शक्याः अ
तो मातृकाभिर्जगत्त्रयं व्याप्तं अत एव प्रश्ने स्वरा एव फलप्रकाशकाः ॥ ५ ॥
अथ पुनः स्वराणामेव प्रधानतां प्रकटयति ॥ अकाराद्या इति अ इ
उ ए ओ एते पंच स्वरा ब्रह्मादयो देवाः तत्र अकारो ब्रह्मा इकारो विष्णुः
उकारो रुद्रः एकारः सूर्यः ओकारश्चन्द्रमा भूमिः ॥ अन्योर्थः प्रयोजनकर्म
अकारस्वरोदये ब्रह्माणं ध्यात्वा कर्म कार्यं इकारोदये विष्णुं ध्यायेत्

॥न॰ ति॥ उ॰ टी॥ ॥४॥ ५

उकारोदये रुद्रं ध्यायेत् एकारे सूर्यं ओकारोदये चंद्रम् ॥ एवं तत्र उद-
ये निवृत्त्याद्याः पंचकलाः अकारोदये निवृत्तिर्नामकला इकारे प्रतिष्ठा
नामकला उकारे विद्या प्रतिष्ठिता शांतिरेकारे स्थिता ओकारे रतिः शा-
न्तिः निवृत्तिः शब्देन यात्रा निवृत्तिः अकारोदये यदि प्रश्नः अकारस्य उद-
लमितस्य यात्रा निवर्तनं वदेत् इकारोदये उदिते प्रतिष्ठा भवति उकारो-
दये प्रश्ने उदिते रुद्रं ध्यात्वा विद्याख्या एकारोदये सूर्यं ध्यात्वा शांतिप्र-
श्ने शुभं वदेत् ओकारे चंद्रं ध्यात्वा अतिशांतिर्याख्या अतिशांतिर्मुक्तिः मु-
क्तिप्रश्ने मुक्तिर्वाच्या इच्छाद्यं शक्तिपंचकं अकारादिपंचसु क्रमेण इच्छा
ज्ञान प्रभा॰ श्रद्धा॰ मेधा॰ इदं शक्तिपंचकं स्थितं तत्र उदये तदाश्रितं त-
स्योदयो ज्ञातव्यः ॥६॥ अपोन्यत्र। मायाद्याश्रिता। अकाराद्यं पंचस्वरा
मायाद्याश्च क्रमेण चतुरस्रं पंचकं तत्कार्यरूपभेदं तत्राकारोदये यस्य चतु-

अकाराद्याः स्वराः पंच ब्रह्माद्याः पंच देवताः। निवृत्त्याद्याः
कलाः पंच इच्छाद्यं शक्तिपंचकम् ॥६॥ मायाद्याश्च क्रमेण
धराद्यं भूतपंचकम् ॥ शब्दादि विषयास्ते च कामबा-
णा इतीरिताः ॥७॥ पिंडं पदं तथा रूपं रूपातीतं निरंजनं ॥
स्वरभेदस्थितं ज्ञानं ज्ञायते गुरुतः सदा ॥८॥ अकारा-
द्याः स्वराः पंच तेषां मध्ये भिदस्त्वमी ॥ मात्रावर्णाः प्र-
तिये नाग कृतिशादितः ॥ प्रसूतो भावतो ये
मात्रास्वरः स हि ॥१०॥ इति मात्रा स्वरचक्रम् ॥१॥

रसं चक्रं नाभ्यं पूजनीयं चालदा अकारोदये चक्रं तत्र पूजयेत् ॥ इकारे हृ
चक्रं उकारे त्रिकोणं चक्रं एकारे षट्कोणं ओकारे वर्तुलं चक्रं
अकारादि पृथ्व्यादि भूतपंचकं पृथ्व्यादिपंचकं अकारोदये पृथ्
वीगतप्रश्नः इकारोदये जलगतप्रश्नः उकारोदये ऽनलगतप्रश्नः
एकारोदये वायुगतप्रश्नः ओकारोदये आकाशगतप्रश्नः इत्येवं तद्
भवं वदेत् ते च स्वरा गंधादि विषयाः तत्राकारो गंधविषयः इकारो रस
विषयः उकारो रूपविषयः एकारः स्पर्शविषयः ओकारः शब्दविषयः
एतादृशा अकारादिस्वरोदये तत्तदुक्त प्रश्न विषये शुभाशुभं वदेत् ॥
अयमर्थः गुरूपदेशादेव ज्ञायते अस्यार्थस्य योजनं किमपि नेष्या
ख्यातं अस्मादृशि केनरोऽर्थः सद्गुरूपासनया बुध्यते इष्टदेवताप्रसादात्
तथा च वक्ष्यति तथा च वक्ष्यति पिंडं पदमित्यादि अत्र यादृशमात्रं
प्रकटं न तु परमार्थतः लिंगरूपः ये पिंडं पदं तथा रूपमित्यादि
त्यदर्शयति यथायं मे: अयमस्य इति एते न क्रमं भवति स्वरा स्या-
तीसदाभूयात् ७॥८ अथाकारादिस्वराणां मुख्य० प्रयोजन
नुपदिशति अकाराद्या इति अकारादि पंच स्वरा मात्रादयो भेदाः
दपकं रूपकं पंचसु भवति ॥६॥ तत्रादौ भेदा न वक्तुं सर्वलमुपदिशति गमु मोभा
वतेति येन नाम्ना अमरस्य प्रसूतो भावनेन नाम्नादितः ज्ञानं केति तत्र नाम्नि आद्यवर्णे
यामात्रा स मात्रास्वरः यथा देवदत्तनाम्नि आद्यवर्णे एकारस्तेन एकारमात्रा विद्यते अतो दे

यदत्तस्य मात्रा स्वरो एकार एव पुनर्यथा यज्ञदत्तस्य नाम्नि यकारस्य आद्यवर्णत्वा
न्तत्पूर्वो आकारो विद्यते ततो यज्ञदत्तस्य मात्रा स्वरोऽकारः एवं सर्वत्र नाम्नि
एवं कृष्णादिनाम्नां मनुजानां मात्रा स्वरा ऋकारश्चेति शेषाणां यथा इ स्वरो ग्रा
ह्य इत्यर्थः एवं हरिकेशादिनाम्नि अथ च महाभाष्ये अकारे इकारभोगः यद
र्शितः अतो अकारस्य मात्रा स्वरो इकारः ॥ १० ॥ इदं मात्रास्वरचक्रम् ॥ २ ॥
अथ वर्णस्वरमाह कादिहान्ता इति स्वरादधः अ इ उ ए ओ स्वराणामधः ह
कारान्तान् ककारादारभ्य हकारपर्यन्तान् वर्णान् विलिखेत् किं विशिष्टान् का
दिवर्णान् ङ ञ ण वर्णवर्जितान् कवर्गचवर्गटवर्गाणां पंचमवर्णान् ङ
ञ ण वर्णान् परित्यज्य संलिखेत् तिर्यक्पंक्तिक्रमेण लिखेत् पंचत्रिंशत्त्रको
ष्ठके पंचाधिकत्रिंशतकोष्ठं कृत्वा ३५ ॥ यथा चक्रम् ॥ ११ ॥ नरनामादि
दिमो वर्ण इति अतो दृष्टान्ते देवदत्तस्य नाम्नि आद्यवर्णो दकारः स दका
र ओकारस्वराधो लिखितोऽस्ति अतो देवदत्तस्य वर्णस्वर ओकारः यज्ञ
दत्तस्य नाम्नि यवर्गीयो यकारः स तु उकारस्वराधो लिखितस्तिष्ठति एवं
यज्ञदत्तस्य वर्णस्वर उकारः ॥ १२ ॥ ङञणा इति । चेद्भवन्तीति । यत्रकुत्रापि च

कादिहान्तान् लिखेद्वर्णान् स्वराधो ङ ञ णोज्झितान् ॥ तिर्य
क्पंक्तिक्रमेणैव पंचत्रिंशत्कोष्ठके ॥ ११ ॥ नरनामादि
मो वर्णो यस्मात्स्वरादधः स्थितः ॥ स स्वरस्तस्य वर्णस्य
वर्णस्वर इहोच्यते ॥ १२ ॥ ङञणा ङ ञ ण वर्णा नामादौ
संति ते न हि ॥ चेद्भवंति तदा ज्ञेया गजडास्ते यथाक्रमं ॥ १३ ॥
यदि नाम्नि भवेद्वर्णः संयुक्तान्तरलक्षणः ॥ ग्राह्यस्तदा
दिमो वर्ण इत्युक्तं ब्रह्मयामले ॥ १४ ॥ ॐ ॥ ॥

देशो विषये ङ ञ ण वर्णा भवंति तदा तत्फलपरिपाकः गजडानां फले
न समः ॥ १३ ॥ अथान्यविधमाह ॥ यदि नाम्नीति । यदि यस्य कस्यचि
न्नाम्नि आदिमो वर्णः संयुक्तो भवति तदा तत्र वर्णस्वरः को ग्राह्य इत्याकां
क्षायामाह ॥ ग्राह्यस्तस्यादिमो वर्णः तदधस्था वर्णस्वरः यथा श्रीपतिरि
ति कस्यचिन्नाम्नि तत्र शकार उपरियो वर्णः शकार इकारादधः स्थि
ति यद्वृश्चा श्रीपतेर्वर्णस्वर इकारः एवं सर्वत्र विचारः अथ यस्य क
स्यचिन्नामानि बहूनि संति तत्र मात्रास्वरः कस्य नाम्नः ग्राह्य इ
त्याकांक्षायां स्वरज्ञा एवं वदंति तंपराचार्यभाषिते बहूनि यस्य नामानि
नरस्य स्युः कथंचन ततः प्रसिद्धनाम्ना ग्राह्यं स्वरविशारदैः प्रसिद्धमन्य
स्य अथान्यवर्णस्वरं जगति उच्यः बवौ शसौ षखौ ङञौ ते यावितिप
रस्परं उभौ तुल्यफलौ भिन्नस्वरस्याधः स्थितावपि तेन विं जयपरा
जयौ भवतः ॥ अथ गृहवर्णस्वरनिर्णये तंपराचार्यः ॥ यदा स्वराद
कं नाम न ज्ञायते स्फुटं नरं ॥ देशे ग्रामे पुरे हर्म्ये नरे नामादिवर्णतः ॥
वर्णस्वरो भवेत्तेषां फलं सम्यक् प्रतिष्ठितम् ॥ स्वरस्य मात्रा संज्ञो ज्ञान
वर्णत्वं तु यामले ॥ ॥ १४ ॥ ॥ ॥

ऽदिविषये जयपराजयौ तुल्यौ ५४ ॥

मतस्वरादवलीबालेति ॥२५॥ द्वादशवार्षिकादिमात्रांतानां अंतर्भोग पलान्याह शाक्रपुष्येति ॥२६॥ सार्धपूर्लेति ॥२७॥ गजध्नागेति ॥२८॥ वार्षिकांतरोदयप्रमाणंपलानि १४१३८१८ तं१०५८९०५ अत्वंतरोदयप्र०प० २३५६३ मासांतरोदयप्र०पलानि ९८१८१ तांतरोदयग०प० ४९०५ दिनान्तरोदयप्र०प० ३२७ घटं तरोदयप्रमाणंपलानि ३० इति २९ अथातोग्रहस्वरमाचष्टे ॥ अस्वरोमेषेति ॥२०॥ उस्वरेति ॥२१॥ स्वराधःस्याधयेदिति २१॥ अस्वरो मेषसिंहाली कोर्पः मेषसिंहालीरूपएव मेषसिं २ वृश्चिकेराशीनां रू पस्यतस्यराशेर्योऽधिपतिः सस्वराधिपतिः यथा अः स्वरोमे षसिंहालिरूपः तत्रमेषवृश्चिकयोर्भौमः स्वामी सिंहस्यसूर्यः भो

मतस्वरादवलीबालोबालाद्दृद्धस्वरोबली ॥ दृद्धात्कुमारोब लीयान्कुमाराजेरुणोबली ॥२५॥ शाक्रपुष्यौतथाहलश्चि द्वादशाब्दिके ॥ इंडमंचगजाःसप्त रुद्रावर्षेचमानकं ॥२६॥ सार्धपूर्णंतथा तेषांगजबाणायनेपलाः ॥ वह्निबदवाण वह्निअनेत्रे अतुपलानिच ॥२७॥ गजारूपंगजाधमेमासे मानेत्वंतरोदयगेस्वरे ॥ नवपूर्णंनवेवेदाःपक्षोभागप्रमाणकं ॥२८॥ अत्रवह्निमवेमानंदिनमानक्रमेणच ॥ चवहीघटिका हालीइःकन्यायुग्मकेर्कटः ॥२९॥ अथग्रहस्वरमा ॥ अस्वरोमेषसिं बौ ॥२०॥ भौमस्यूर्कौ सचंद्रार्के बुधशुक्रौरमंत्रिणः सौरिसौरी तथाजीवोमेषादीनामधीश्वराः ॥२२॥ इतिग्रहस्वरचक्रम् ॥

मस्पयोः अस्वरस्वामिनौ एवंकन्यामिथुनयोःस्वामीबुधः कर्कस्यचंद्रः तेनबुधचंद्रौ इकारस्वामिनौ धनुर्मीनस्वामीगुरुः तेनगुरुःउकाराधिपतिः वृषतुलाधिपतिःशुक्रः सचएकारस्वामी मकरकुंभयोरधिपःशनिःशनि रोकारस्वरस्वामी ॥ अथोदाहरणम् ॥ देवोचाचीचतुष्टयं रेवतीनक्षत्र स्यचरणाः इकारेवर्णे चरेवतीनक्षत्रं रेवतीनक्षत्रेणमीनराशिः उकारःमीनराशिप्रतिमः मीनस्वामीगुरुः गुरुःउकारस्वामी अतोदेव दत्तस्यग्रहस्वरउकारः तथायज्ञदत्तस्यनोयायियुवर्णचतुष्टयं ज्येष्ठा न्तरस्यचरणाः तत्रयकारेणयज्ञदत्तस्यज्येष्ठानक्षत्रं ज्येष्ठानक्षत्रेण वृ श्चिकराशिः अस्वरोवृश्चिकेरूपः वृश्चिकस्वामीभौमः तेनयज्ञदत्तस्य ग्रहस्वरोओकारः ॥ इतिग्रहस्वरचक्रम् ॥

॥ मात्रास्वरचक्रम् ॥

लृ							
ए							
उ							
इ							
अ							

॥ स्वरराशिचक्रम् ॥

अ	इ	उ	ए	ओ
मे	इमि	क	वृद्	म३
वृ	क	तु	ध	कुं
सिंह	सिं	इ·२	मद	मी·

॥ वर्णस्वरचक्रम् ॥

अ	इ	उ	ए	ओ
क	ख	ग	घ	च
छ	ज	झ	ट	ठ
ड	ढ	त	थ	द
ध	न	प	फ	ब
भ	म	य	र	ल
व	श	ष	स	ह

॥ ग्रहस्वरचक्रम् ॥

अ	इ	उ	ए	ओ
मे	क	ध	तु	म
सिं	मि	मी	वृ	कुं
वृ	क	०	०	०
र·	चं·	गु·	शु·	श·
मं·	बु·	००	००	००

॥ जीवस्वरचक्रम् ॥

अ	इ	उ	ए	ओ
अ	व	क	च	ट
१	६	५	५	५
त	प	य	श	ळ
५	५	४	४	[illegible]

षोडशाक्षर इति ॥१॥ अवर्गाद्यष्टवर्गाणां इति देवदत्तनामतः उदाहरणं दकारस्य त्रिसंख्या दकारोपरि एकारस्यैका दश वकारांतर्गतो ऽकारस्यैकसंख्या वकारस्य चतुर्थसंख्या दकारांतर्गतोऽकारस्यैकसंख्या दकारस्य त्रिसंख्या संयोगी तकारद्वयस्य द्विसंख्या अकारस्यापि एकसंख्या एवं षड्विंशतिः २६ पंचभक्तेशेषमेकं १ तेन देवदत्तस्य जीवस्वरो अकारः ॥२॥ इतिजीवस्वरचक्रं ॥ अथ राशिचक्रं । मेष

षोडशाक्षरवर्गः स्यात्कादिवर्णेषु पंचकाः ॥ चतुर्वर्णे यवेशे वर्गौ संख्यावर्गेषु कीर्तिताः ॥ अवर्गाद्यष्टवर्गाणां वर्णसंख्या तु नामतः ॥१॥ नाम्नि वर्णस्वराभ्यास्या वर्णानां वर्णसंख्यया ॥ खंडिताः पंचभिर्भक्ताः शेषं जीवस्वरं विदुः ॥२॥ इति जीवस्वरच० ॥ मेषवृषा वकारे च मिथुनाद्याः षडंशकाः ॥ मिथुनांशत्रयं चैव मिकारे सिंहकर्कटौ ॥१॥ कन्यातुला उकारे च वृश्चिकाद्यास्त्रयोंशकाः ॥ एकारे वृश्चिकांत्यांशाश्चापः षट् च मृगादिमाः ॥२॥ अंशास्त्रयो मृगस्यांत्याः कुंभमीनौ तथौ स्वरे ॥ एवं राशिस्वरः प्रोक्तो नवांशकक्रमोदयः ॥३॥ इतिराशिस्वरचक्रम् ॥

वृषौ इति मेषनवांशाः ९ वृषनवांशाः ९ मिथुन ६ एवं २४ मिथुनांशत्रयमिति मिथुनांशत्रयं ३ कर्क ९ सिंह ९ एवं २१ कन्यातुलेति कन्याया ९ तुलाया ९ वृश्चिकस्यांशाः ३ एवं २१ एकारे इति एकारे वृश्चिकस्यांशाः षट् धनस्य नव ९ मकरादिमाः षट् ६ एवं २१ अंशास्त्रय इति मृगस्यत्रयोंशाः ३ कुंभमीनयोरष्टादश १८ एवं २१ अथ नक्षत्रचरणेनोदाहरणं अश्विन्यादीत षुलक्षत्रपादानाम स्वरः स्वामी पुनर्वस्वादि पंचनक्षत्रोत्तरफाल्गुन्येक चरणसहित चरणानामि स्वरः स्वामी उत्तराफाल्गुनी चरणत्रयसहित हस्तादिनक्षत्रचतुष्टय अनुराधा चरणद्वयसहितपादानामुस्वरः स्वामी ॥ अनुराधा चरणद्वय ज्येष्ठादिनक्षत्रचतुष्टय श्रवणत्रयसहितैकविंशति चरणानामेकारस्वरः स्वामी ॥ श्रवणचरणैकधनिष्ठादिरेवत्यंत चरणैकविंशति चरणानामो स्वरः स्वामी ॥ अथोदाहरणं देवदत्तस्य रेवतीचरणेन ओकारो राशिस्वरः ॥३॥ इतिराशिचक्रम् ॥

॥न· ति॥
॥ज· टी॥
॥६॥

6

॥ नक्षत्रस्वरचक्रम् ॥

॥अ	इ	उ	ए	ओ॥
रे	पु	उफा	अं	श
अ	पु	ह	ज्ये	ध
भ	श्ले	चि	मू	श
कृ	म	स्वा	पूषा	पूभा
रो	पूफा	वि	उषा	उभा
मृ	००	००	००	००
आ	००	००	००	००

॥ पिंडस्वरचक्रम् ॥

॥अ	इ	उ	ए	ओ॥
क	ख	ग	घ	च
छ	ज	झ	ट	ठ
ड	ण	त	थ	द
ध	न	प	फ	ब
भ	म	य	र	ल
व	श	ष	स	ह

अकारे सप्त ऋक्षाणीति रेवती· अश्वि· भर· कृत्ति· रोहि· मृग· आर्द्रा
नानां सप्तानामकारः स्वामी पुनर्वस्वादि पुष्य· श्ले· म· पूर्वफा· पंच
नक्षत्राणामिकारः स्वामी उत्तराफा· ह· चि· स्वा· वि· पंच नक्षत्राणा
मेषामुकारः स्वामी अनुराधादि ज्येष्ठा· मू· पूर्वाषा· उत्तराषा· पंचनक्ष
त्राणामेकारः स्वामी श्रवणादि उत्तराभाद्रपदांतानां पंचानामोकारः
स्वामी ॥ अत्रोदाहरणम् ॥ देवदत्तस्य रेवतीनक्षत्रेण नक्षत्रस्वरो

अकारे सप्त ऋक्षाणि रेवत्यादिक्रमेण च ॥ पंच पंच इकारादौ वेद ऋक्षस्वरोदयः ॥ १ ॥ इति नक्षत्रस्वरचक्रम् ॥
नाम्नि वर्णस्वरास्तत्संख्या संख्या मात्रास्वरास्तथा ॥ पिंडेषु
रहितेशेषे पिंडस्वर इहोच्यते ॥ १ ॥ इति पिंडस्वरचक्रम् ॥
मात्रादिस्वरभेदेन स्वरानुत्पाद्य नामतः ॥ योगे कार हृतेशे
षे योगस्वर इहोच्यते ॥ १ ॥ इति योगस्वरचक्रम् ॥ ॥

अकारस्वरः इति नक्षत्रस्वरचक्रं ॥ नाम्नि वर्ण इति अत्रोदाहरणम्
देवदत्तस्य नाम्नि दकारस्य वर्णस्वरः ओकारस्तस्य संख्या ५ वर्णस्व
संत्रीणि ३ द्वितीय तकारस्य वर्णस्वर उकारस्तस्य
कारस्तथा ३ त्रिसंख्या एवमेकत्र संख्या पिंडिता चतुर्विंशतिः २४
इस्वरचक्रम् ॥ मात्रादिस्वरभेदेति अथोदाहरणम् देवदत्तस्य ना
मज्ञा मात्रादयः स्वराः मात्रास्वरः मात्रास्वरः एकारः तस्य संख्या ४ वर्ण
स्वरो ओकारस्तस्य ५ ऊह स्वर उकारस्तस्य ३ जीवस्वर अकारस्तस्य
एक १ राशिस्वरः ओकारस्तस्य ५ भस्वरो अकारस्तस्य एक १ पिंड
स्वर एकारस्तस्य चतुष्टयं ४ एवं देव· नाम मज्ञा मात्रादि पिंडांत स्वराणां
संख्या योगे जाता २३ अस्या जाता शरः ५ शेष ३ गयं अतो देवदत्तस्य
योगस्वर उकारो संपन्नः इत्येवं नामतो नेसर्गकान्यपि मात्रादिस्व
रचक्राणि समाप्तानि इति श्री हरिवंशराम महादेव विरचिता पांनरपति
जयचर्या स्वरोदये जयलक्ष्मी टीकायां मात्रादिस्वरचक्राध्यायो द्वितीयः २ ॥

॥ द्वादशवार्षिकचक्रम्				
१२	१२	१२	१२	१२
अ	इ	उ	ए	ओ
१ १ २	१ १ २	१ १ २	१ १ २	१ १ २
४३	४३	४३	४३	४३
३८	३८	३८	३८	३८

॥ अयनस्वरचक्रम् ॥				
अ	इ	उ	ए	ओ
दे	व	द	न	०
मा	व	ग	धी	रा
४	५	३	३	५
नू १	खिं ४	यो ३	०	०

वार्षिकस्वरचक्रम् ॥				
अ	इ	उ	ए	ओ
६६	३६	०	०	०
२६	२६	२६	२६	२६
२१	२१	२१	२१	२१
४५	४५	४५	४५	४५

॥ अथ एभिर्नामजस्वरैर्देवदत्तस्य द्वादशवार्षिकसमयादारभ्य नाड्यंत
समयावधौ दिनकुचर्यामाह ॥ ओंकाराद्ये समिके ति नामजाः स्वराः मा
त्राया अष्टौ ने समिका ओंकाः गतो नाम ततः उत्पद्यते गतो ने समिकाः १ ॥
अत एव सर्वेषां पंचकपंचकयोजने द्वादशाब्दादिसमयेषु द्वाद
शवर्ष० वर्ष० अयन० ऋतु० मास पक्ष दिन नाड्यंतेषु अष्टधा कालेषु
तत्कारणमाह प्रभवादिरिति प्रभवादिक्रमेण प्रभवविभवादयस्तेषु
द्वादिवाह स्वस्वानां वर्षाणां द्वादशद्वादशाब्दकैः प्रत्येकं अकारादि
यः पंचस्वरा उदयंति एतदुक्तं भवति प्रभवादिद्वादशवर्षाणि अकारः स्वामी ॥
ओंकाद्ये समिकाद्यष्टौ मात्रा यानामजाः स्वराः । एते षाम्
दयान्वस्ते वा द्वादशाब्दादिकालजाः ॥ १ ॥ प्रभवादिक्रमेणै
वा स्वरा एषमस्वरादिकः ॥ उदयो द्वादशाब्दानां एकं द्वाद
शाब्दिकः ॥ २ ॥ अस्यांतरोदयो वर्षे एको मासो दिनद्वयम् ॥ ॥
लोकाब्धिनाडिकाओंका अष्टत्रिंशत्पलानि च ३ ॥ इति
॥ द्वादशवार्षिकचक्रम् ॥
अस्यावेव उदयः ततः प्रमाथिनामा संवत्सरस्तदारभ्य द्वादशसंवत्सरैः
इकार उदयति तेन किं तावदिकारस्वरोधिपतिः स्वरनेदादि द्वादश
संवत्सरैः उकारस्वर उदयति तावदुकारो राजा ततः शोभनसंवत्स
रप्रभृति द्वादशसंवत्सरैः एकारस्वर उदयति तेन किं तावदेकारस्व
रो राजा अथ राक्षससंवत्सरादि द्वादशसंवत्सरैः ओकारस्वर उद
यति तेन किं तावदोकार एव राजा ॥ अत्रोदाहरणम् ॥ संवत् १५७२
समये शाके १४३७ एतावद्ये प्रभवादयो गताब्दाः तेषामानयनं र
त्नमालासंहितायामुक्तं तथा च शाकेंद्रकालः पृथगाकृतिघ्नः २२ घ्नः
शशांकनन्दाब्धियुगैः ४२९१ समेतः ॥ शराद्रिवस्वीन्दु १८७५ हृतः
स लब्धः षष्ट्यावशेषे प्रभवादयोब्दाः अनेन गणितविधिना प्रभवा
दयः आप्ताः वर्ष ३९ मास १ दिन २५ घटी ५ पल ३० एतावत्संवत्स
राः शाके १४३७ समये चैत्रशुक्लप्रतिपदि गताः एषां द्वादशवर्ष ३६
राः शाके १४३७ पर्यंतमकाराद्यधिपतिरासीत् सांप्रतं प्रमाथिनाम
१।१।२।३।४।५।३६ पर्यंतमकारोधिपतिरासीत् तत एतेन
संवत्सरमारभ्य द्वादशसंवत्सरावधि इकारस्वर इत्थं रोवर्ते तेन
किं देवदत्तनाम्नोदाहरणे० नामतः पिंड स्वरोस्य उकार उदितो लि
किं देवदत्तनामोदाहरणे० नामतः पिंडस्वरोदयोः कर्मसिद्धिं यास्यति अथ वर्तमा
न उदयवलात पिंडस्वरोदयोः

॥न॰ति॰॥
॥ज॰टी॥
॥७॥
7

तत्रमाघिनामादिद्वादशवर्षदशासु इकारास्वामिनीति तद्दशास्वरा
णांभुक्तिभोग्यस्वरो तद्दशाकालप्रमाणमाह अस्यांतरोदयेति
वर्ष २ मास १ दिन २ घटी ४३ पल ३८ एतैर्वर्षादिभिः द्वादशासु
उदयस्वरात् अंतर्दशास्वरा वार्षिकेचक्रम् २॥ अथ प्रभवादीनां सं
वत्सराणां प्रत्येकमंतर्दशासु भोगः तावदीश्वरः अंतर्दशावि
भागकरणं दिनचर्यापालेखं २॥३॥ इति द्वादशवार्षिकचक्रम्॥
अथ प्रभवादीनां संवत्सराणां प्रत्येकमस्वराधिपतीनाह॥ प्रभवा
द्यमेकैकेति अकारादिकाः पंच स्वराः प्रभवाद्यब्दमेकैकं प्रति उ
दयो भवति कोर्थः प्रभवादीनां प्रत्येकं अस्वरादिकः स्वामी भवति
तथा उदाहरणं प्रभवे वर्तमाने अकारस्य उदयः विभवे वर्तमाने
इकारस्योदयः शुक्लनाम्नि वर्तमाने उकारस्योदयः प्रमोदनाम्नि
वर्तमाने एकारस्योदयः प्रजापतिनाम्नि वर्तमाने ओकारस्वरो
दय एवं प्रश्नाद्येषु प्रवर्तमानेषु अकारादयः पंच स्वरा द्वादश
प्रभवाद्यब्दमेकैकमुदयस्वस्वरादिकः॥ द्वादशाब्दस्य
वर्षाणां तद्भुक्तिर्वार्षिके स्वरे॥१॥ इति वार्षिकस्वर॥
चक्रम्॥ अस्वरोदयेति रवे स्वामी इस्वरस्योत्तरायणे॥
वर्षभुक्त्यर्द्धमानेन भोगः षाण्मासिकः स्वरे॥२॥
॥ इति अयनस्वरचक्रम्॥ ॥ ॥

धाउदयंति तत्र अकाराद्येकस्वरोदये एकादशस्वराणामुदयः
स्यात् एतदुक्तं भवति प्रभवाद्येकैकवर्षदशासु प्रभवादिपतिः
स्वरांते एकादशस्वराणामंतर्दशा स्यात् स एवोदयः अर्थात्तद
ओदयकालमाह द्वादशाब्दस्येति द्वादशाब्ददशास्वराणां भुक्तिः व
र्षमेकं मासमेकं इत्यादि तत्र वर्षाणां भुक्तिः मासमेकं दिनद्वयश
लोकाद्धिनाडिका अष्टत्रिंशत्पलानि चेति मास १।२।४३।३८
एषां प्रभवाद्यंतर्दशास्वराणां भुक्तिः तत्र यदा प्रभवः प्रवर्तते व
र्षपर्यंतमस्वरस्य दशा तत्रांतर्दशा आदौ अस्वरस्यैवांतर्दशाभ
समेकादिभुक्तिः तदुपरि इकारोपरि उकारस्यांतर्दशावतिः तस्यापीयमेव भु
क्तिः इकारोपरि उकारस्यांतर्दशा तद्भुक्तिः क्रमाल्लेन॥ उकारादुप
रि एकारस्योदयः स्याकारस्यैवोदयो भवति एवमेकादशस्वराणां
तद्दशासु उदयंति एतेन किं द्वादशाब्दादिनाड्यंत तद्दशाकालं ए
कादशधा विभजेत्॥ मंथोक्तो तद्दशाको लोलभ्यते इदमग्रे
वक्ष्यति च॥ अथायनस्वरोदयमाह॥ अर्थात्तद्दशाभुक्तिः दिन
१६॥२१॥४५॥१॥ इत्ययनस्वरचक्रम्॥ अथुनावर्त
तादि स्मृतेषु अस्वरादीनामुदयमाह अकारादुदिति मगादित
दिदयमानुभोगान्यद्रक्तेतव स्युः शिशिरोपसंतिइतिसंहितो

कन्यात्‍ शेषादिराशिषु रविभोगादुसंक्रान्त्यादयः षडत्रत्रवो भवंति मासद्वया त्मको ऋतुः यावन्मेषवृषयोरविः मिथुनराशिवादशांशाभ्यां रविः एवं द्विसप्तत्संशाः ७२ नान्येव द्विसप्ततिदिनानि तेषु द्विसप्ततिदिनोदये रका रस्योदयः एवं मिथुनांशाष्टादश १८ कर्कस्य त्रिंशदंशाः सिंहस्य चतुर्विं शतिः एवं द्विसप्ततिदिनानि ७२ तैरिकारस्योदयः ॥ सिंहस्य षडंशाः द्द कन्यातुलयोः षष्ट्यंशा ६० वृश्चिकस्य च षडंशाः एवं कन्यादि सप्ततिदिना नि भवंति तैरुकारस्वरस्योदयः ॥ वृश्चिकस्य चतुर्विंशति अंशाः २४ धनुः संपूर्णः मकरस्याष्टादशांशाः १८ एवं द्विसप्तत्यंशाः ७२ एभिरेकारस्व रस्योदयो भवति मकरस्य शेषद्वादशांशाः १२ कुंभमीनयोरंशाः एवं द्वि सप्ततिदिने ओकारस्वरस्योदयः अनेन क्रमेण आकारादिस्वराः पंचे यमसंतादि ऋतूदये उदयं लभंते इत्युक्तं ॥१॥ अथात्र ऋतुषु प्रत्येकस्वर दशासु अंतर्दशास्वरान्‍ लभ्यान्‍ विमाह षड्दिनानीति सुगमम्‍ ==

अकारादिस्वराः पंच वसंतादि क्रमोदयाः ॥ एकैकस्मिन्‍ स्व रेऽप्याद्विसप्ततिदिनोदयः ॥१॥ षड्दिनानि रसा नाड्योव न्हिवेदपलानि च ॥ अंतरोदयमानं स्याद्दतुनाम्नि स्वरोद ये ॥२॥ इति यामले ऋतुस्वरचक्रम्‍ ॥ नभस्य मार्गवैशा खेअस्वरस्योदयो भवेत्‍ आश्विन श्रावण ज्येष्ठ कारो नायकः स्मृतः ॥१॥ उकारस्तु त्रपौषस्यादेकारो ज्येष्ठकार्ति के ॥ ओकार उदयं याति माघफाल्गुनमासयोः ॥२॥ द्वे दि ने व्यद्यनाड्यश्च त्रयस्त्रिंशत्पलानि च ॥ अंतरोदय एको मासावत्र वै मासिकस्वरे ॥३॥ इति यामले मासस्वरचक्रम्‍ ॥ अस्वरः कृष्णपक्षेशः शुक्लपक्षे षाडस्वरः ॥ पक्षाभ्यां तरेभुक्तिः मासमुख्य धूमानतः ॥२॥ इति पक्षस्वरचक्रम्‍ ॥ अकारादि क्रमान्नस्य नंदादितिथिपंचकम्‍ ॥ दिनस्वरोदयो नित्यं स्वस्वति थ्यादिजायते ॥१॥ अस्यांतरोदयः पंच घट्यस्तारा पलानि च ॥ तिथ्यादौ घटिकाः पंच पलानि सप्तविंशतिः ॥ अंतरोदय एकोऽमा दिनस्वरस्य सूरिभिः ॥२॥ इति यामले दिनस्वरचक्रम्‍ ॥ घटीस्व रो घटीः पंच पलानि सप्तविंशतिः ॥ अस्यांतरोदयः प्रोक्तो घटिका र्धप्रमाणतः ॥२॥ इति यामले घटीस्वरचक्रम्‍ ॥ ॥ छ ॥

अथ मासस्वरोदयानाह ॥ नभस्य मार्गवैशाखेति ॥१॥ उकारस्त्वेति ॥२॥ द्वे दि नेति सुगमम्‍ ॥३॥ इति मा० स्व० चक्रम्‍ ॥ अथ पक्षस्वरमाह ॥ अ० स्वरः कृष्णपक्षेति ॥ तथा च दिन २ दंड २१ पल ४५ इति पक्षस्वरच० ॥ अथ दिनस्व० अकारादादि ति सार्द्धश्लोकः ॥ इति दि० स्व० चक्रम्‍ ॥ अथ घटीस्व० तिथ्यादावित्ति १ इति घटीस्वरचक्रम्‍ ॥

॥ ऋतुस्वरचक्रम्‍ ॥

अ	इ	उ	ए	ओ
७२	७२	७२	७२	७२
६	६	६	६	६
३२	३२	३२	३२	३२
४३	४३	४३	४३	४३

अ	इ	उ	ए	ओ
कृ	शु	०	०	०
१५	१५	१५	१५	१५
२१	२१	२१	२१	२१
४५	४५	४५	४५	४५

पक्षस्वरचक्रम्‍

॥ मासस्वरचक्रम्‍ ॥

अ	इ	उ	ए	ओ
मा	श्रा	चै	ज्ये	मा
मा	आ	पौ	का	फा
वै	आ	०	०	०
२	२	२	२	२
४३	४३	४३	४३	४३
३५	३५	३५	३५	३५

॥न·ति·॥
॥ज·री॥
॥८॥

8

॥ दिनस्वरचक्रम् ॥ श्रीः ॥ घटिस्वरचक्रम् ॥

अ	इ	उ	ए	ओ
नं	भ	ज	रि	पू
५	५	५	५	५
२७	२७	२७	२७	२८
२६	२६	२६	२६	३६
३०	३०	३०	३०	३०

अ	इ	उ	ए	ओ
१	२	३	४	५
६	७	८	९	१०
११	१२	१३	१४	१५
५	५	५	५	५
२७	२७	२७	२८	२७

अथ द्वादशाब्दादिनाड्यंतेषु अंतरोदयमाह ॥ द्वादशाब्दादी
ति अत्रांतरोदये कालमानं पंचधा उक्तं वर्षमास इति यतः
तैरेव पंचधा कालमानैः पूर्वं परिलमत्रि ॥ कुत्रोक्तमाह वर्ष
मेकं मासमेकमित्यादिकस्य परिपाकवर्ष १।२।४३।३८ कस्यापि
मासादिभिः कस्यापि द्वे दिने गयो नाड्यादिभिः ॥ तावद्वर्षादिरूपं मा
नं ॥१॥ अथ भुक्तभोग्यांतरोदयस्वरात्कलं गणितमाह ॥ द्वादशाब्द
इति ॥ अथोदाहरणम् ॥ अधुनाऽभवादिद्वादशसंवत्सरे इकारस्व
शेभुक्तः वर्तमानकाले प्रभवादिसंवत्सरादारभ्य द्वादशवर्षपर्यंत
मिकारस्वरस्योदयो वर्तते शाके १४३७ समये चैत्रशुक्लप्रतिप
दिनस्य भुक्तवर्षाणि चत्वारि ४।१।२५ पंचपंचाशद्दिनानि
नवर्षाणि वस्यधिकशतत्रय ३६० गुणितानि दिनसहितानि
१४९५ शरगोब्धिसुधांशवः षष्ट्या गुणिते जातं ८९७०० एता
निभुक्तदंडानि षष्ट्या गुणिते पलानि ५३८२००० अथ द्वादश
दांतरोदयपलानि २४१३७८० व्योमकुंजरखोलाब्धिसुधाकर
युगेदवः ॥ द्वादशाब्दांतरोदये हारः अनेन हारेण इकारस्वरभुक्ता
दपलेभ्यो लब्धा भुक्तस्वरालयः ॥ इकारादारभ्य इउए स्वराभुक्ता
ओकारो नर्दशाधिपत्वेन वर्तते ॥ तस्यापि भुक्तभोग्यदिनानि ३१६
१५२१ भोग्यदिनानि ७५।५२ एतावता ओकारस्य उदयः चैत्रशु
क्लप्रतिपदारभ्य आषाढकृष्णप्रतिपत्पर्यंतं विद्यते ॥ तदुपरि
आकारस्यांतरोदयो भविष्यति ॥ अथ वार्षिकस्वरोदयांतरोद
योदाहरणम् ॥ अधुना षोडशः संवत्सरश्चित्रभानुः शकाब्दो
गतः शकाब्दास्तु भुक्ताश्च भवंति भोग्यवर्षस्य परिचायकाः
यथा आदौ केल्यारंभे चैत्रशुक्लप्रतिपदि भुक्ताश्चैवं न ततो वर्षे
प्रमाणदिनेषु व्यतीतेषु एतस्मिन् शुक्लप्रतिपदि एकं वर्षं गतं
लिख्यते ॥ तद्वर्षभोग्यस्य द्वितीयस्य परिचायकं ॥ तथा शका

दा एवैकेषु व्यतीतेषु वर्षेषु शकाब्द सम् हा जाता ॥ तत्र बार्हस्पत्य वर्षाणि प्रभ
वंति तस्योपपत्तिः सिद्धांतादिषु वराहसंहितासु रविभगणप्रमाणं
रविवर्षाः गुरुभगण वराहमिहिरोक्ताः जिनयमवेदभुजत्रुहव्य
भुजः ॥ एकैकस्मिन्वर्षे कियत्कालाधिकु गुरो राशिभोगः तत्र प्रमा
णेन वराहमिहिरेण जिनयमत्रुहव्यभुजो भगणाः कल्पिताः गुरु
भगणा द्वादशघ्ना गुरुवर्षाः स्युः ततो रविवर्षभगणेभ्यो गुरुवर्षा
धिकाः द्वयोरंतरे गुरुवर्षाधिका ततो ३६४२२४ गुरुभगणः भगण
द्वाः ४३७०६८८ सौराब्दाः ४३२०००० अंतरं ५०६८८ अपवर्तांकः २३०४
शकादौ गुरुः २८।३९।२२ गुरुवर्षशेषं रविवर्षाणि च केनापवर्त
त्यं गुरुभगणानां प्राग्गुणकाराः ॥ २२ द्वाविंशतिः हारजाताः शराद्रि
वसिंदवः १८७५ गुणभागहाराभ्यामेकवर्षेण गुरोर्मध्यमगत्या रवि
वर्षाभ्यंतरे भोगो लभ्यते राशिः १।०।२१।१७ प्रभवादे भोगो रुपराशि
रेव तदुपरि अग्निमवर्षस्य अंतिमकला रविकलाभोगः शुक्रे रवाग
कृति पंचकलाभोगः गत्यर्हं गुरोः अलस्येन भोगेन कलाविकलाभ्यां
प्राप्तदिनानि चत्वारि दंडाभ्यां दंडाद्वयोदशाधा अग्निमवर्षं(?)
चैत्रशुक्लप्रतिपदः १ आदेवगयोदशदंडसहितं चतुर्भिर्दिनैः प्रवृत्ताः
एवं तृतीयवर्षस्य प्रवृत्तिरष्टभिर्दिनैः षड्विंशति दंडैः प आदेवप्रवृ
त्तिर्भवति एवं सर्वेषां प्रवृत्तिर्ज्ञातव्या अतएवास्माभिर्व्याख्यानं टीका
यां कृतं ॥ शकाब्दा भुक्तसंवत्सरा अहर्पंते क्षेपादिनानि भोग्यस्य वर्षस्य
गतान्येव तेनाग्निमवर्षे स्य फलप्रवृत्तिर्वक्तव्या अस्माकं मतमेतत् ॥ ॥
गणितद्वारेण दर्शितं अन्येपि ऊहयिष्यंति ॥ ननु तानि दिनानि प्र
भववर्षस्य भुक्तानि भुक्तवर्षेभ्यो भुक्तफलानि न प्राप्यंते यथा गुरोरेव
भगणद्वयः अथोदाहरणम् शाके १४३७ गतशकाब्दात् प्राप्त
वर्षं भुक्तवर्षाणि षोडश सप्तदशं मध्य सुभानोः ५८ पंचाशद्दि
नानि ५६ भुक्तान्यागतानि तेन चैत्रशुक्लप्रतिपदे १ शाका
के १४३६ समये माघशुक्ले चतुर्थी सप्तदशमः सुभानुः प्रवृ
त्तः तस्मात् भुक्तदिनानि पंचपंचाशत् ५५।४५ पंचचत्वारिंशद्दं
डाः सुभानोरधिपतिरिकारस्वरः तस्य भुक्तपलानि सप्तशताधि
कं लक्षद्वयं २००७०० अपवर्तिकस्वरांतर्दशाभोगपलानि
११७८११ सुधांशुधरस्मि नागपर्वतैः [illegible] आयं हारेरा
शिरंतरोदयस्वरभुक्तपलेभ्यो हारप्राप्तः वार्षिकस्वरात् अंतर्द
शा स्वराः इकारस्वरात् द्वितीय उकारस्वरस्तेष्यां प्रवर्तते त
स्य भोग्यदिनानि नव ९ द्विचत्वारिंशद्दंडाः ४२ तेन किं जा
तं चैत्रशुक्लदशम्यां द्विचत्वारिंशद्दंडोपरि एकारस्यांतरोदय
स्य प्रवृत्तिर्भविष्यति वैशाखशुक्लद्वादश्यां दंडे पंचविंशति २५।४०
चत्वारिंशत्पलपर्यंतम् ॥ अधुना चैत्रशुक्लप्रतिपदिकस्याप्त

॥न॰ति॰॥ ॥ज॰टी॥ ॥५६॥

१

स्वरस्य उदयोंतरोदयश्च विद्यते तदुदाहरणम् अयुरोदक्षिणे
स्वामी इस्वरश्चोत्तरायणे इति वचनात् चैत्रप्रतिपदि उत्तरायणे
इकारोदयः प्रवर्तते तथा चायनन्निर्णयेव सारः दक्षिणायनं
सवितुः कर्कटाद्यं मृगादितश्चाप्युदितिवचनात् ॥ शाके १४३६
समये पौषशु॰ १२ द्वादश्यां संमकरेऽर्कः तत आरभ्य चैत्रशुक्ल
त्रयोदश्यां तमे षोऽर्कः ॥ उत्तरायणं तेन चैत्रशुक्लप्रतिपदि इकार
स्वरस्यैव उदयो विद्यते ॥ अथांतरोदयानामुदाहरणम् मृगादिषु
भोग्याः ७८ एषां पलानि २८०८०० अष्टदशाताधिका अष्टाविंश
तिरयुतानि ॥ अयनेस्वरांतरोदयपलानि ५८९०९ असावंकरा
शिरयनस्वरांतरोदयभोगः अयमेव हारः अनेनायनभुक्तपलेभ्यः
आप्तमंतरोदयस्वरात्ययः ३।४९।५ एकोनपंचाशद्दंडाः चैत्रशु
क्लप्रतिपदि एकोनपंचाशद्दंडोपरि उकारस्वरोदयः ॥ वैशाखव
दितृतीयायां दं॰ ३३ पर्यंतं ॥ अथ ऋतुस्वरोदयांतरोदयोदा
हरणम् अथ ऋतूनां प्रवृत्तिः सूर्यसंक्रमतः तथा च संहिताकारः
मृगादिराशिद्वयभानुभोगात् षडृतव इति वचनात् मकरसंक्र
मणादारभ्य चैत्रशुक्लप्रतिपदि अष्टादशदिनानि मीनसंक्रमणा
तृतीयानि मीनादारभ्य वसंतऋतुः एतेन अकारः स्वरोदयो वि
द्यते ॥ अथांतरोदयः अथांतर्दशाकालः षट् दिनानि ६।३६।४३
एषां पलानि २३५६३ तमांशेषु उत्पद्यते अस्याव अंतरोदयहा
रः अथोदयस्वरः अथोदयस्वरस्य भुक्तपलानि ६४८०० स्वरव
नागाब्धिरसाः असौ भाज्यराशिः एभ्यो हारआप्तं अंतरोदयस्य
रोदयः ६।२६।३८ पलानि ९ ते नवर्तते अस्यां तरोदये अ
कार इकारो भुक्तस्वरौ उकारस्वरस्य अंतरोदयो वर्तते तस्या
भोग्ये चैत्रशुक्लप्रतिपद्दिनमेकं अष्टत्रिंशद्दंडाः नवपलानि चै
त्रशुक्लतृतीयायां अष्टत्रिंशद्दंडपर्यंतम् ॥ अथ मासस्वरो
दयोंतरोदाहरणम् चैत्रशुक्लप्रतिपदारभ्य चैत्रशुक्लप्रति
पत्पर्यंतं षोडशदिनानि तत्क्रमात् अंतरोदयस्वरस्य विभागः द्वे
दिने चत्वारोनाड्यः ४३ अष्टाविंशत्पलानि च ॥ एषां पला
नि भागहारः ९८१८ नागेन्दुगजखेचराः उदितस्वरस्योकार
स्य भुक्तपलानि ५०६००३ असौ भाज्यराशिः भाज्यभक्तः पंच
मांशो नवविंशति दंडाः तदुपरि एकारस्वरस्यांतरोदयः चैत्र
शुक्लचतुर्थ्यां दं॰ ५ पर्यंतं ॥ अथ पक्षस्वरस्योदाहरणम् ॥
अस्वरः कृष्णपक्षेशः शुक्लपक्षेश इस्वरः चैत्रप्रतिपदारभ्य
इस्वरस्य उदयो विद्यते चैत्रशुक्लप्रतिपदि उदयोंतरोदयो
पि इकारस्यैव ॥ अथ दिनस्वरोदयोपि इकारस्यैव ॥ अथ दि
नस्वरोदाहरणम् ॥ चैत्रशुक्लप्रतिपदि अकारस्य उदयः आदौ

पंचदंऽसप्तविंशतिपलानि पर्यंतमंतरोदयोऽपि प्रकारस्यैव ॥१॥२
इति पदीस्वरचक्रम् ॥ द्वादशाब्दानि नाड्यंता इति ॥१॥ वर्षमासा
दिति ॥२॥ द्वादशाब्दस्वरा इति ॥३॥ लब्धेति ॥४॥ अथानन्तरं द्वादशाब्दादी
नां उदितां तरोदयस्वराणां पंचबालादिकावस्थेति नामस्वरवशे
न द्वादशाब्दस्वरादीनां पंचबालादिकावस्था भवंति अवस्थाकल्प
ने तेषामवस्थाभेदेन वनास्ति ते तु सर्वेषां साधारणाः अतः स
र्वेषां स्वनामस्वरवशेन तेषां पपगवस्थाः परिकल्पनोदितस्य द्वा
दशाब्दादिस्वरस्य कस्यचिन्नामवशेन बालसंज्ञा भवति कस्यचि
न्नामस्वरवशेन कुमारसंज्ञा भवति कस्यचिद्युवेत्यादि संज्ञा परिकल्प
ते ॥५॥ ताः पंचसंज्ञा आह ॥ आद्यो बालः कुमार इति ॥ अत उक्तं नाम

द्वादशाब्दादिनाड्यंताः स्वस्यानाद्यस्वकालतः ॥ उदयांते
पुनस्तत्रांतरे रेकादशोदयः ॥१॥ वर्षमासदिवानाडीपला
नि च क्रमादिदम् ॥ कालमानं मयाप्रोक्तं पंचधात्र स्वरोदये ॥२॥
द्वादशाब्दस्वरादीनां भुक्तं पलमयं तु तत् ॥ तद्भक्तं स्वस्वमानेन
लब्धं शेषं द्विकं भवेत् ॥३॥ लब्धे भुक्तस्वरा ज्ञेयाः शेषे चै
वोदिताः स्वराः ॥ अस्मिन्वर्षप्रादिभक्ते तु भुक्ताः स्युरुदितः स्व
रः ॥४॥ उदितस्य स्वरस्यस्य नामस्वरवशेन ताः ॥ पंचबालादि
कावस्थाः स्वस्वकालप्रमाणतः ॥५॥ आद्यो बालः कुमारश्च युवा
वृद्धो मृतस्तथा ॥ निजावस्थास्वरूपेण फलदा नात्र संशयः ॥६॥
किंचिल्लाभकरो बालः कुमारस्त्वर्धलाभदः ॥ सर्वसिद्धो युवा
प्रोक्तो वृद्धे हानिर्मृते क्षयः ॥७॥ यात्रायुद्धविवादे च नष्टे दृष्टे
ऽजान्विते ॥ बालस्वरो भवेद्दृष्टो विवाहादिशुभेऽशुभा ॥८॥

स्वरवशेन संज्ञा भवति नहि नामस्वरवशेनैव केनप्रकारेण तथा व्याख्या
यते य एव नामस्वरः स एव द्वादशाब्दादिस्वरांतरोदयस्य प्रथमो बालसंज्ञः ना
मस्वराद्द्वितीयः स्वरः कालजस्तदा कुमारस्वरसंज्ञो भवति नाम जाग्रती
यो युवासंज्ञः चतुर्थो वृद्धसंज्ञः पंचमो मृतसंज्ञ इति अनेन प्रकारेण ना
मस्वरवशेन संज्ञाः कल्प्यन्ते ताः संज्ञा निजावस्थास्वरूपेण फलदाः यस्य
यः संज्ञास्वरः संसंज्ञास्वरूपफलदः ॥६॥ किंचिल्लाभकरेति ॥७॥ युत्रेदंफ
लं परिणमति तस्या को ज्ञो माह यात्रायुद्धेति ॥८॥ सर्वेति ॥९॥ शुभा

सर्वे शुभकार्येषु यात्राकाले तथैव च ॥ कुमारः कुरुते सि
द्धिं संग्रामे सततो जयः ॥९॥ शुभाशुभेषु सर्वेषु मंत्रयंत्रा
दिसाधने ॥ सर्वसिद्धिप्रदो ज्ञेयो यात्रायुद्धविशेषतः ॥१०॥
दाने देवार्चने दीक्षायां मंत्रप्रकल्पने ॥ वृद्धस्वरो भवेद्ध
वेणा रणे भंगो भयं गमे ॥११॥ विवाहादिशुभं सर्वं संग्रामा
यशुभं तथा ॥ न कर्तव्यं शुभं किंचिज्ज्ञानेन मृत्युस्वरोदये ॥१२॥

शुभेष्विति ॥१०॥ दाने देवार्चनेति ॥११॥ विवाहादीति ॥१२॥ ॥५६

अथ पंचवालादिकावस्थानां यथोत्तरं बलमाह॥ मृतो बाल इति सु
गमं॥२३॥ यस्मा यस्य तृतीयोपुरुषः सतस्मात्सजयं लभते यस्मा
यस्य च तुर्यः तस्मात् स वृद्धतोरणे भंगं प्राप्नोति यस्य यस्माद्वितीयः
सद्वितीयात् सर्वतो जयं लभते योयस्येति योधयोर्द्वयोर्यस्मा
दल्पस्वरः स पंचमः सम्मृत्युदायकः यतः पंचमस्वरस्तु सेना
कथितास्तेभ्यो सहयुद्धं न कुर्यात् स्वबलस्वरात् वृद्धमृत इति
मृतबालयोः स्वरयोः स्वरयो बालस्वरो बली बालवृद्धयोर्वृद्धः
वृद्धकुमारयोः कुमारो बली कुमारयुवयोर्युवा बली अर्थान्मृ
तबालयोरधिको बालो वृद्धः बालवृद्धयोर्वृद्धो बलिवलः एवमुत्त
रोत्तराधिके तथाधिके बलं कस्येन॥२४॥ अथ विशेषान्तु द्वंद्वा
दिचातुरंगयुद्धसमबलफलमाह॥ मृत्युर्हीनेति॥ उभयोर्भटयो

मृतो बालस्तथा वृद्धः कुमारस्तरुणः स्वराः॥ यथोत्तरब
लाः सर्वे ज्ञातव्याः स्वरवेदिभिः॥२३॥ योयस्य पंचम
स्थाने स स्वरो मृत्युदायकः॥ तृतीये तु भवेत्सिद्धिः शे
षा मध्यफलप्रदाः॥२४॥ मृत्युर्हीनस्वरे नाम्नि जयो
नाम्नि स्वराधिके॥ समनाम्नि भवेत्साम्यं संधिर्जयपर
राजयौ॥२५॥ एकस्वरे भवेत्साम्यं द्वितीये युद्धकृत्
प्रदः॥ तृतीये तु फलं स्वल्पं तुर्ये बंधः पराजयम्॥२६॥

युद्धे हीनः स्वरे सति मृत्युः यो हीनः स्वरः सोऽधिकस्वरान्मृत्युं समेवेति
वृद्धस्वरान्मृतिं प्राप्नोति वृद्धो कुमारतः मृतस्वरो बालस्वरात् मृतिं
प्राप्नोति बालस्वरः कुमारस्वरात् मृतिं प्राप्नोति कुमारो युवस्वरा
त् यत उक्तं मृतो बालस्तथा वृद्ध इति अकारादाकारोऽधिकमालक
आकारादिकारः इकारादीकारः ईकारादुकारः उकारादेकारोऽधि
कस्वरः एकारादैकारः एवमग्रयोरपि अथायमर्थः कथं स्या
त्यातः कविशेषोऽनेन भवति तत्रोच्यते मृतो बालस्तथा वृद्ध इत्यत्र
यथोत्तरबलाः कथिताः ते नार्थेनैव कविना कथं नोक्तं अत्र नाम्नी
ति हीनस्वरतो उक्तानि तु नाम्नि बालादिका वस्था हीनाधिका नोक्ता
स्वराधिके नाम्नि जयः उभयोर्भटयोर्यस्य नाम्नि हीनः स्वरो भवति सो
धिकः स्वरान्मृत्युमेति उभयोस्तुल्यमेव फलं॥ अत्रोदाहरणम्॥
एकस्य एक एव नाम्न आद्यवर्णे अपरस्य द्विस्वरः अधिकस्वरात्
हीनस्वरो म्रियते स्वराधिकेऽयमेव जयः तथा एको द्विस्वरः अ
न्यस्त्रिस्वरः तथापि अधिकस्य जयः तथा व्यवस्थान पूस्वरा आकारा
दयो यथोत्तराधिकाः अनुमर्थं कृत्तो लतां ज्ञाजानंति समनाम्नि
भवेत्साम्यं समस्वरे नाम्नि द्वयोर्भटयोस्तुल्यमेव फलम् तत्तुल्यता
तामाह संधिर्जयपराजयौ एकद्वित्रिचतुःपंचमात्रिके यो योनाम्नो तुल्य
तायदि तदा सम भवति मैत्री अथवा संग्रामे जयः संग्रामादुभयोरपि

यथो त्तरवला बुद्धे ज्ञातव्याः स्वर
पारंभेः॥ तत्रैव॥ एकमात्रक द्विमात्रका
दितत्तल॥ एकमात्रा कवर्णे त्रि विवर्ण
अद्विमात्रि
कः॥ २॥

पराभवः पलायनमेव पराभवः इयमेव समता तथाच समरसारे हानिर्मृतिर्विजय
मात्तयाधिकामा तुल्या जयंच समरवादिवं विसंधिषु॥ तुल्यमात्रे त्यर्थः॥ तथाच
मातृकायां एकमात्रो द्विमात्रश्च त्रिचतुः पंचमात्रकः क्रमिकस्तु यकः केतुकोव
र्णः पंचमात्रकः॥ अन्यत्र स्वरसंजनयोः संख्या नाम्नोः शरं पहीनाधिके जयो
हीनेच तिसाम्ये संधिर्वा समरागमः॥ २५॥ एकस्वरेति एकस्वरे द्वयोर्बालस्वर
समुमेव नकस्यापि जयो न पराजयः बालकुमारयोः संग्रामे ऽधकलं कुमारस्य
ल किंचिज्जयः ताभ्यां कृतं पूर्ण धनः सर्वेषु देजयः बालवृद्धयोर्बालस्यैवं यः
बाले लक्ष्यो भूयमात्रे २६ अथ जयाभिलाषी शत्रुं यथा जयति तं जयसम
यमाह॥ शत्रोर्मृत्युः स्वरेति यस्मिन्काले शत्रोर्मृत्युः स्वरो भवति एवं शत्रोर्मृ
त्युस्वरे स्वस्य चनिः स्वरे प्राप्ते तत्काले युद्धारंभे तु विजयो भवति नान्यथा
किंतु सत्यमेव सर्वजयहेतोर्मुख्यः प्रत्ययम्॥ २७॥ इदं तात्कालधुवास्य
रप्राप्ते पिलक्षणं समाचष्टे तत्काले मात्रकेति॥ २८॥ अतोविति ते
काले विद्यावादादिच तु विपयुद्धकाले नामजो मात्रकः स्वरः स्वस्यच
मस्वरम्यास्यः मात्रास्वरवशेन युद्धकाले नाडीस्वरस्योदयः स्वस्य प्रवास्वरा

शत्रोर्मृत्युस्वरे प्राप्ते त्वनिःप्राप्ते स्वकीयके॥ तत्काले प्रारभे
युद्धं विजयो भवति ध्रुवम्॥ २७॥ तत्काले मातृकोग्या
द्यादिनवर्णस्वरस्तथा॥ पत्नीग्रहस्वरो ज्ञेयो यामे जीवस्व
रोदयः॥ २८॥ अतोराशंपशाकोग्यास्य वयमासेधिष्यसं
भवः॥ अद्दैपिंडस्वरो ज्ञेयो योगो द्वादशनाडिके॥ ३९॥
सर्वकालं बली वर्णः सर्वव्यापी न संशयः॥ तस्मात्सर्व
प्रयत्नेन वर्णे बीदत्यं बलाबलम्॥ २०॥ ॥ ॥

ख्यो भवति शत्रोर्मृतारव्यः एवं सति युद्धं कुर्यात् जय एव स्यात् अत्रोदा
हरणम् देवदत्तविराजयोर्युद्धे तत्काले नाडीस्वरे आकारे प्राप्ते इकारो मा
त्रास्वरयोर्बलेन देवदत्तस्याकारो युवा विराजस्याकारो मृत्युस्वरः एवंल
क्षणे तत्काले प्रारंभे युद्धमिति सर्वथा देवदत्तस्य जयः अथानयोर्जयका
ले दिनस्वरो यधुकारोदयः इकारवकारयोर्वर्णस्वरयोरोकारो आकारस्य
द्वयोर्हि द्धकुमाराख्ये तद्वशाज्जयो विराजो देवदत्तं जयति॥ अथ देवदत्त
स्य ग्रहस्वर एकारः तद्बलात्मस्मपक्षे आकारस्योदयः सद्भूः युद्धे इकारस्यो
दयः सेमृतस्वरः मृताद्भूतोजयप्रदः॥ देवदत्तस्य जीवस्वर ओकारः तद्बला
त् वैशाखभाद्रपदमार्गेषु आकारस्य उदयः ते समाः कुमाराख्याः युद्धे बलं
देवदत्तस्य॥ आषाढश्रावणाश्विनमासेषु इकार उदयति जीवस्वरबला
त् युवाख्या मासाः युद्धे देवदत्तस्य जयप्रदाः चैत्रपौषयोर्लृकारोदयः
तौ जयस्वरबलाद्वृद्धौ देवदत्तस्य युद्धे भंगप्रदौ॥ ज्येष्ठकार्तिकमासे
एकारस्योदयः जीवस्वरबलान्मृत्युमासौ देवदत्तस्य युद्धे मृत्युदौ इति
मासिवलाबलं॥ देवदत्तस्य रेवती प्रथमपादे जन्मसमयत्वात मीनरा
श्यधिष्ठितत्वात् राशिस्वर ओकार एव तद्बलात्॥ अतुस्वरे इकारोदये
कुमारोदयः तत्रमध्यतो जयः॥ अतुस्वरे इकारे युवाख्ये अत्यंतो जयः
उकारे अतुस्वरोदये सद्भाख्ये युद्धे देवदत्तस्य पराजयः॥ एकारे अतु

॥न॰ज॰॥ ॥ज॰दी॥ ॥११॥

स्वरे आद्ये राशिस्वरबलान्मृत्युः॥ देवदत्तस्य नक्षत्रस्वरो ऽकारः अ
कारस्वरबलात् अस्वरोदयि लिस्वामीति न्यायात् अयनस्वरो
बालः दक्षिण स्वरः कुमारः बालायनस्वरे युद्धे भंगः कुमारस्वरे
सङ्गतो जयः॥ अथ पिंडस्वराज्ञेया इति न्यायात् देवदत्तस्य पिंड
स्वर इकारः तद्बलाद्वार्षिकाकारस्वरोदये मृत्युस्वरोदये तद्वर्षे
युद्धे मृत्युः॥ एवमिकारस्योदये बाले पराभवः॥ उकारे वार्षिक
स्वरोदये कुमाराख्ये सङ्गतो जयः एकारे वार्षिक स्वरोदये सर्व
जयः॥ ओकारे वार्षिक स्वरे वृद्धाख्ये युद्धे पराजयः॥ अथ देव
दत्तस्य योगस्वर उकारः तद्वशाद्द्वादशवार्षिक स्वरे बालसंज्ञके यु
द्धे पराजयः॥ अकारे द्वादशवार्षिके पिंडस्वरात्कुमाराख्ये सङ्गतो
जयः॥ इकारे द्वादशवार्षिक स्वरे योगस्वराद्युवाख्ये युद्धे सर्वजयः॥
उकारो द्वादशवार्षिकोदये योगस्वरबलाद्वृद्धाख्ये सङ्गतेः पराभ
वः॥ एकार द्वादशवार्षिकः स्वरोदये मृताख्ये सङ्गतो मृत्युः॥ ए
वं बलानि युद्धे देयानि॥ १९॥ अथ सर्वस्वरबलान्ययमन्यद्
दमेव सर्वकाले सर्वस्माद्बलवत्तरं बलमाचष्टे॥ सर्वकालेव

यथापदो हस्तिपदे प्रविष्टाय था हि नद्यः खलु सा
गरेषु॥ यथा हरे देहगताश्च देवा स्तथा स्वरा वर्ण
कुलोदरस्था:॥ २१॥ साधनं मंत्रयंत्रस्य तंत्रयोगं
च सर्वदा॥ अधो मुखानि कार्याणि मात्रा स्वरबले
कुरु॥ २२॥ वर्णस्वरबले सर्वं कर्तव्यं च शुभाशु
भम्॥ सिद्धिदं सर्वकार्येषु युद्धकाले विशेषतः॥ २३॥
मारणं मोहनं स्तंभं विद्वेषोच्चाटनं वशम्॥ विवादं
विग्रहं घातं कुर्याद्वह स्वरोदये॥ २४॥ अन्नपाना
दिकं सर्वं वस्त्रालंकारभूषणं॥ विचारं भं विवाहं
च कुर्याज्जीवस्वरोदये॥ २५॥ आसादाराम हर्म्या

लीवर्ण इति एतावता वर्णस्वरादेव सर्वकालेषु द्वादशवार्षिक
अयनर्तुमासपक्षदिननाडीषु सर्ववादजयं बलाबलं कुर्यात् २०
पुनरेव तद्बलं समर्थयन्नाह यथापदेति स्वरा वर्णबलेन व
लिनः अबलेनाबला: २१ कथं ते मां कथनेन किं प्रयोजनमि
त्याह साधनं मंत्रयंत्रेति २२ वर्णः स्वरेति २३ मारणं मोह
नमिति २४ अन्नपानादिकं सर्वमिति २५ आसादारामेति २६

क्ति देवतास्थापनं तथा ॥ राज्याभिषेचनं दीक्षाकर्मणि राशि
के स्वरे ॥ २६ ॥ शांतिकं पौष्टिकं यात्रा प्रवेशं बीजवापनं ॥ स्त्री
विवाहं तथा सेवा कर्त्तव्या मध्यस्वरोदये ॥ २७ ॥ शत्रुसैन्ये देशभंगं
च कोष्ठयुद्धं च वेष्टनं ॥ सेनाध्यक्षं तथा मैत्रीं कर्त्तव्यः पिं
डकोदये ॥ २८ ॥ योगेन साधयो घोरं देहस्थं ज्ञानसंभवम् ॥
आर्त्तवं शाभवं चैव शाक्तेयं च तत्तीयकम् ॥ २९ ॥ शुक्लस्वरे
शांतिकं पौष्टिकमिति २७ शत्रुसैन्यं देशभंगमिति २८ योगेनेति २९
इति षोडशस्वरविवरणम् ॥ तिथिवारं च नक्षत्रमिति तिथिस्वरोदयः वार
स्वरोदयः ग्रहस्वरोदयः नक्षत्रस्वरोदयः एषां उदयाः एकैकरूपकं उक्ताः यत्र
वर्णस्वरवशात् तिथिवारनक्षत्राणां त्रयाणां उपाखं भवते यात्रायां युद्धे वादे
च विशेषतः १ अथ का पंत्रपिलनेकतस्यात्र तदाह यत्र दिन इत्यादि वाह य
स्य नादि मवर्णमिति २ अनेनेति यद्दिने तिथिवारर्क्षं जं मतं नामित्र स्यते
शत्रो नाम वशेन तद्दिने मे आभिचारं लक्ष्यं तु साधयेदित्यर्थः ३ इति तिथिवारनक्ष
त्रस्वरबलम् ॥ अथ बालकुमारादीनां संख्याऽप्रमाणमाह ॥ बालस्वरादि

दये षोडशस्वरविवरणं ॥ तिथिवारं च नक्षत्रं एकैकरूपकं स्मृतं
वितं यत्र देकत्र संमीलय कुर्यात् स्वरादयः ॥ १ ॥ यस्य नामा
दिमं वर्णं तिथिवारर्क्षजं मतं ॥ तद्दिनं वर्जयेत् तस्य हानिः स्यात्
करं यतः ॥ २ ॥ अनेन स्वरयोगेन शत्रुसैन्यं पराभवं ॥ दिकं ॥ मं
त्रयंत्रक्रियाहोमं साधयेत् तद्दिने बुधः ॥ ३ ॥ इति तिथिवारन
क्षत्रस्वरचक्रम् ॥ बालस्वरादिकावस्थाभानुसंख्या भवं
तिता ॥ उदयं ते क्रमेणैव स्वस्वधप्रिप्रमाणतः ॥ १ ॥ घटिका ॥
रवेर्दिने पतेमासेऽत्र स्वयं नेतथा ॥ वर्षे द्वादशवर्षे च अवस्था
जायते स्वरे ॥ २ ॥ भपलानि पलं पंच सांघ्राहोर्धं दिनद्वयं ॥ ध्रुव
कं पक्ष मासोऽद्वंमवस्था प्रमितिः क्रमात् ॥ ३ ॥ शुक्लस्वरप्रमाणं

कावस्थेति १ द्वादशावस्थाकुत्र भवंत्यात्कांक्षयाह घटिकास्वेति २ घटि
कादिकाले ऽवस्थानांस्थितिप्रमाणमाह भपलेति ३ शुक्लस्वरेति अथवा
लादीनां प्रत्येकं द्वादशावस्थोदाहरणम् चैत्रशुक्लप्रतिपदां शुक्लघटिका ३३
दिनावस्थाहारप्रमाणं पंच घटयः पंचेहारे ऽगाघाः ५५ वस्था शुक्ला दशमं
घटी सप्तमावस्था नियेते पंचस्व प्रतिपद्वालसंज्ञा कुमार इत्यादयो ऽमलाचत
त्र बाला सप्तमी राज्यदा
कुमारस्वा शांतिकरी ७
सकामत्वष्टिपुंवारस्वा
हज्ञस्वारात्रिनिद्रा ॥ म
तास्वावन्हिदाह ॥ एता
बालाद्यावस्था पंचघटी
प्रमाणेन त्रयस्त्रिंशत्
घटिकाः प्रतिलीनाः ॥
तत्र देवदत्तस्य दिनच
र्यायां वर्णस्वर उकार
वशेन देवदत्तस्य प्रति

०	०	॥तिथिवारनक्षत्रस्वरचक्रम्॥							
अ	इ	उ	ए	ओ	मं	बु	ह	शु	श
क	ख	ग	घ	च	र	चं	०	००	००
छ	ज	झ	ट	ठ	र	पुं	उ	अ	अ
ड	ढ	त	थ	द	आ	ति	षि	आ	ध
ध	न	प	फ	ब	भ	अ	षि	म	श्री
भ	म	य	र	ल	कृ	म	स्वा	पू	पूभा
व	श	ष	स	ह	रो	पू	वि	उ	उभा
१	२	३	४	५	मृआ	००	००	०	०
६	७	८	९	१०	००				
११	१२	१३	१४	१५	००				

॥न॰॥जा॥
॥जं॰टी॰॥
॥४२॥

12

प्तकुमाराख्या॰ तद्दलासु देवदत्तस्य शांतिकरी अवस्था भविष्यति अत्रे
णोदाहरणेन सर्वेषामवस्थाफलं निर्णेतव्यं एतानि पंच वस्थाफला
नि द्वादशद्वादशसंख्यानि स्वस्वभुक्तिप्रमाणेन घटिकाख्ये दिनेप ज्ञेमाने
मत्स्वयने लग्नेत्यादिसमयेषु वक्तव्येस्यर्थः ४ अथावस्थानि खनमा
ह मूलाचबालाचेति ५ स्वस्थेति ६ उत्साहेति ७ वैकल्यशोकेति ८
छिन्नाचेति ९ अलंकितेति १० एवमिति ११ इतिवालस्व
रादीनां षष्ठिरवस्था ॥

तु स्वस्वभोगेन तद्भवेत् ॥ गतावस्थागतां केन शेषं तत्काल
गामता ॥४॥ मूलाच १ वाला २ शिशु ३ हासिकाच ४ कुमा
रिका ५ यौवन ६ राज्यगाच ७ क्लेशाच ८ निंद्या ९ ज्वरिता १०
प्रवासा ११ मूलाच १२ वाला स्वरजा अवस्था ॥५॥ स्वस्था शुभा मोद
निहर्षा वृद्धिर्महोदया शांतिकरी सदर्पा ॥ मुदा शुभा शांतेष्टलोद
याच मांगल्यदा द्वादशधा कुमारे ॥६॥ उत्साह धैर्यौ गत्र जयौ वला
च संकल्प योगा च सकाम तुष्टिः ॥ सुखा चेति क्रोध धनेश्वराचे
शांताभिधा १२ द्वादशधा युवाख्ये ॥७॥ वैकल्य १ शोकाचैर २
तथाच मोघा ३ च्युतेंद्रिया ४ दुःखित ५ रात्रिनिद्रा ६ ॥ अद्धिः प्र
मंगाच ८ तपाचे ९ क्लिष्टा १० ज्वरा ११ मूता १२ द्वादशधा चवृद्धे ॥८॥
छिन्नाच १ वंधा २ रिपुघातकारी ३ शोषा ४ मला ५ ज्वालन ६ के
शदाच ७ अलंकिता ८ मेदकरीच ९ दाहा १० मृत्युः ११ तथा १२
द्वादशमृत्युजाइमा ॥९॥ एवं षष्ठिरवस्थास्तु स्वरवस्था
पंचकेसदा ॥ सर्वासु तासु विज्ञेयं स्वनाम सदृशं फलम् ॥१०॥
इति वालस्वरादीनां षष्ठी स्वरावस्था ॥ पूर्वस्मिन्न आ स्वर
स्वामी इस्वरो दक्षिणे तथा ॥ उकारः पश्चिमे ज्ञेय एसौम्ये म
ध्य ओस्वरः ॥१॥ यस्यां दिशि उदयं याति स्वरस्तस्यां पंचमीं दिशाम् ॥
वर्जयेत्सर्वकार्येषु यात्राकाले विशेषतः ॥२॥ पृच्छितेपृच्छक
स्यायुः स्वरस्यास्तमितां दिशाम् ॥ हानिर्मृत्युर्भयं भंगो जाय
ते नात्र संशयः ॥ इति दिशाभोगचक्रम् ॥

पूर्वादिषु स्वरस्य बलमाह पूर्वस्मिन्स्वरेति ॥१॥ यस्यां दिशीति पंचमीं
दिशां वर्जयेदित्यत्र मात्रायेषां स्वराः तेषां कस्य चलेन दिशां पंचमी
र्तां वर्जयेत् किमपि नोक्तं अत एव ज्ञायते केवलेरभिप्रायः वर्णस्व
रादेव योवर्णस्वरो यस्य तस्य तस्मादिके तत्पंचमीं वर्जयेत् यथा देव
दत्तस्य वर्णस्वर ओकारः ओकारस्य मध्ये स्थितिः मध्यात्सोदक्षिण
न देवदत्तस्य पंचमी दिक् उत्तरा देवदत्त उत्तरां यात्रां युद्धे विवादे च
सर्वदा वर्जयेत् संग्रामे तेनामध्ये तां दिशां न समाश्रयेत् ॥२॥ आ
यादिकस्वरे अस्तमिते अशुभफलमाह ॥ पृच्छके पृच्छक इति ३ ॥ इति

॥ दिशास्वरचक्रम् ॥

स्वरावस्थाभोगचक्रम् ॥ दिशास्वरचक्रम्॥

घ	दि	प	मा	ऋ	अ	वर्ष	द्वाव
दि	०	१	२	६	१५	३०	३६०
घ	५	२५	३०	०	०	०	०
पल २७	०	०	०	०	पक्ष	मास	अब्द १

०	पू. नंदात्र	०
उ. ४ रिक्ता	५ म पूर्णा	द. २ भद्रा
०	प. ३ जया	०

तिथ्यादावित्ति तिथ्यादौ तिथिआरंभसमये तत्प्रादितो यो तिथिः स्वरः त
स्मात्स्वरात्सार्द्ध ५॥२७ पंचघटीस्वरउदयति चेत्तद्युर्थस्य बालकुमा
रादिलक्षणो घटीस्वरो भवति तस्य प्रश्नः फलं ब्रवीमि ॥२॥ तत्करण
माह तिथिभुक्तघटीति उदाहरणम् चैत्रशुक्लप्रतिपदि गतस्वरस्य गत
तिथिभुक्त संख्याघट्यः पंचदश १५ तस्य पलानि नवशतानि ९०० अर
लवर्ज्जिहृतानि ३२७ लब्धं स्वर २ द्वयंशेषं २४६ शेषे आकारात्तृतीयस्व
र उदितः यदि देवदत्तेन प्रश्नः कृतः समीपात् प्राक्दक्षिणपश्चिम
वा उत्तरे वस्थितेन प्रश्नः कृतः सर्वतोभद्रचक्रे लक्षणेना सितादि

तिथ्यादावुदयं याति तिथिस्वराद्घटिकास्वरः ॥ बालस्व
रादिकः प्रश्ने फलं तस्य वदाम्यहं ॥ १ ॥ तिथिभुक्तघटीसं
ख्यां कृत्वा पलमयीं ततः ॥ अक्षवर्ज्जि ३२७ हृते शेषे स्वर
स्तत्कालसंभवः ॥ २ ॥ यदुद्दिश्य कृतः प्रश्नः फलं तस्य
प्रजायते ॥ यत्र नोद्दिश्यते किंचित्तत्र गच्छ शुभाशुभम् ॥ ३ ॥
बालोदये यदा पृच्छा लाभार्थं स्वल्पलाभदा ॥ राजा तैचि
रोगे च गमे हानिः तथैव च ॥ ४ ॥ कुमारोदयवेलायां
लाभो भवति पुष्कलः ॥ राज्यो नाशं जयं युद्धे यात्रा
सर्वत्र सिद्धिदा ॥ ५ ॥ युवोदये भवेद्राज्यं लक्षा च्छेदं च तत्
त्क्षणात् ॥ संग्रामे शत्रुहंता च यात्रा च सफला भवेत् ॥ ६ ॥
वृद्धोदये न लाभः स्यात् क्लेशी नाङ्केश वर्द्धनम् ॥ संग्रा
मे भंग मायाति यात्रायां न निवर्तते ॥ ७ ॥ मृतोदये य

कः यत्कार्यमुपलक्ष्य प्रश्नः लक्षणात्तत्कार्यहानिर्वक्तव्या संग्रामादिसाह
सकर्मणि च पराभंगः युद्धे मृत्युर्नैराज्ये रोगे मृत्युः इत्यादीन्निवदेत् २
अथ वासादिक वालाया तदर्थमाह यदुद्दिश्य इति यदि देवदत्तेना
न्यमुद्दिश्य प्रश्नः कृतः यत्तदन्यस्य देवकार्यं भविष्यति तदा यत्तद्वत्ते
वर्ण स्वरवशेन वालायादि दिशमवधार्य फलं ब्रूयात् यदि लाभादि
कं नोक्तं कस्याप्यभिधानमपि न तदा देवदत्तस्यैव नाम स्वरवशे

॥न॰ज॰॥
॥ज॰ही॰॥ नअस्तमितबालादिदिशं ज्ञात्वा फलं ब्रूयात् ३ अथ बालादिस्व
॥१२॥ रफलमाह। बालोदयेति ॥४॥ कुमारेति ॥५॥ युवोदयेति ॥६॥ वृद्धोद
येति ॥७॥ मृतोदयेति ॥८॥ अथ स्वराणां संज्ञां तस्माम्नाय प्रश्नफ
लमाह। ओजःस्वरा इति ओजःस्वराः अ उ ओ एते त्रयो विषमाः पुमां
13 सः पुरुषाः समस्वराः इ ए अन्ये विषमस्वराः योषित्स्त्रीसंज्ञकाः
स्वस्वरोदये विषमाख्यः पुरुषःस्वरोदये पुंसां फलं भवति समाख्य
समस्वरोदये स्त्रीत्वं स्त्रीजातीनां फलं भवति एतावता स्वस्व
रोदये लक्षणाख्यकार्याणि सिद्धिं यान्ति ॥९॥ तद्दलान्त्यचक्र
श्नमाह गर्भार्थे इति प्रष्टा पृच्छति अस्मिन्गर्भे पुत्रः पुत्री वा भवि
ष्यति तस्मिन्सति तत्काले अकारस्य उकारस्य ओकारस्योदये
भवति तदा पुत्रो भविष्यतीति वाच्यं ॥ तत्काले इ ए अनयोरुद
दा प्रष्टा पृच्छति स्वंप्रयोजनं॥ तत्सर्वमत्युदं ज्ञेयं पुत्रेष्ट
त्युः सुभंगके ॥८॥ ओजस्वराः पुमांसः स्युः स्त्रियो युग्मे
स्वरान्विदुः॥ स्वस्वस्वरोदये जाते पुंसां स्त्रीत्वं च तत्फल
येत् ॥९॥ गर्भार्थे पुंस्वरे पुत्रः कन्या कन्यास्वरोदये ॥॥
युग्मे युग्मं तथैव नष्टे मातुर्मृत्युरसंशयं ॥१०॥ युग्मना
डीस्वरयोः पुंसोः पुयुग्मं स्त्रीयुग्मं स्त्रियोः॥ तयोस्तु पुं
स्त्रियोः पुंस्त्री युग्मं गर्भे विनिर्दिशेत् ॥११॥ इति या
मले तात्कालिके स्वरचक्रे प्रश्नभेदाः ॥ ॥१४॥

यत्तदा गर्भप्रश्ने कन्या वाच्या युग्मे युग्ममिति पुंस्त्र्याख्यस्वरोदये
युग्मं वदेत्। नष्टे स्वरोदये अस्तमिते पापविद्धे गर्भस्य नष्टता
वाच्या संक्रमे पुंस्त्र्याख्यस्वरोदये समाप्तौ मातुर्मृत्युर्वाच्यः १०
अथ युग्मस्वरोदये प्रकारमाह युग्मनाडीति युग्मस्वरस्त्रियौ स्वरः नाडी
स्वरस्तत्काले पंचघटिकात्मकौ तत्रोदयस्वरः तौ यदि विषमौ पुंसं
तकौ भवतः तदा पुत्रद्वयं वदेत् एवं स्त्र्याख्यौ दिनस्वर नाडीस्वरौ
द्वयं तदा कन्यां वदेत् तौ यदि पुंस्त्रियौ तयोरेकः पुमान् एका स्त्री तदा
पुत्रकन्ये भवतः इति वदेत् अनयोरेकस्मिन्नष्टे तस्य नष्टता स्वरस्य
नष्टता अस्तमितत्कालेन गर्भवधेन वा ॥११॥ इति नाडीच
॥ ॥ २ प्रश्नभेदाः ॥ ॥

अथ जन्मनक्षत्रचरणवर्णवशात्फलमाह ॥ जन्मर्क्षे जन्मपादेति
यस्य जन्मनक्षत्रस्य चरणे जन्मलग्नचरणस्य यो वर्णः अइउएओ कु
लिके त्यादि चरणवर्णाः तद्वर्णीयः स्वरो भवति तत्स्वरवशात् जन्मकाले
यो नाडीस्वरः तस्मिन्बालकुमारादिसंज्ञा स्थापनीया ॥ यथा देवदत्तस्य
जन्मरेवत्याः प्रथमचरणे तत्र एकारस्वरो विद्यते जन्मनि नाडीस्वर उका
र आसीत् एकारवशात् नाडीस्वरस्तत्संज्ञो जातः तत्स्वभावेन जन्मफ
लम् ॥ १ ॥ बालकुमारादिनाडीसंज्ञकस्वरे जन्मफलमाह चपलः
कातर इति ॥ २ ॥ व्यवसायीति ॥ ३ ॥ सर्वलक्षणसंपूर्ण इति ॥ ४ ॥ स्त्रीजित
इति ॥ ५ ॥ क्लेशी समत्सर इति ॥ ६ ॥ इति तात्कालिकस्वरचक्रे जातस्य
शुभाशुभनिर्णयः ॥ अथ भट्टयोर्द्वन्द्वयुद्धे विशेषमाह ककारादीति
शेषाः आईऊऐऔ अं अः इत्यादयः सप्त दीर्घाः धनपफबभमयरलव
शषसह इत्यादयो वर्णाः कृष्णपक्षे बलिनः स्वस्मिन्स्वास्ति शुक्लपक्षे स्वस्व
यन्मर्क्षे जन्मपादे यस्य वर्णो योक्षरः तेन नाडीस्वरो ज्ञेयः
स्वभावः प्राणिनामिह ॥ १ ॥ चपलः कातरो मूर्खः कृपण
श्चाजितेंद्रियः ॥ असत्यो बहुभाषी च जातो बालः स्वरोदये ॥ २ ॥
व्यवसायी कलाभिज्ञः स्त्रीरतः सुभगः सदा ॥ दीर्घायुर्विग्रही
शूरः कुमारोदयसंभवः ॥ ३ ॥ सर्वलक्षणसंपूर्णो राजा भव
ति धार्मिकः ॥ सार्वकालं जयी युद्धे जातो युवोदये शिशुः ॥ ४ ॥
स्त्रीजितो धार्मिकः कामी विवेकी स्थिरसाहसः ॥ सत्यवादी
सदाचारः पुमान्वृद्धोदयोद्भवः ॥ ५ ॥ क्लेशी समत्सरः क्रूरो
निष्कामो विकलेंद्रियः ॥ सर्वकार्यालसो दुष्टो जन्म यस्य
मृत्योदये ॥ ६ ॥ इति यामले तात्कालिके स्वरचक्रे जातस्य
शुभाशुभनिर्णयः समाप्तः ॥ ककारादिहकारान्ताः पंच
स्वस्वरास्तथा ॥ बलिनः शुक्लपक्षे शेषाः सर्वे सितेतरे ॥ १ ॥
एकस्वरः एकवर्णः पक्षयोरुभयोर्यदि ॥ तत्र पक्षबलं त्याज्यं
शुक्लकृष्णविभेदतः ॥ २ ॥ एकपक्षान्तरे चैकः स्वरश्चेद्योध

जयः येषां योधानां ककारादिहकारान्ता वर्णा अइउए स्वराश्च नाम्नि आ
दौ भवन्ति तेषां बलं सितपक्षे भवति एवं शेषेरपि कृष्णपक्षे बलं ज्ञेयम् ॥ १ ॥
अथ योधयोः स्वरवर्णयोः पक्षबलं सममेव तत्र योधस्य जयार्थं विवेल
यमित्याह एकः स्वरः एकवर्णः इति योधयोः सितपक्षे स्वर एव वर्णो
यदि तदा पक्षबलं शुक्लपक्षे गौरवर्णस्य बलं अथ कृष्णपक्षे श्यामस्वरवर्णे
योर्यदि तदा यः कृष्णवर्णः स जयी कृष्णपक्षे शुक्लपक्षे गौरवर्णः कृ
ष्णपक्षे वर्णो यो भवति कृष्णस्य शुक्लपक्षे वर्णः स्वरश्च तदा पक्षे जय
पराजयौ तुल्यौ ॥ २ ॥ अथ भेदान्तरमाह एकपक्षान्तर इति
शुक्लपक्षे वर्णे यदि कृष्णपक्षे स्वरः योधयोः कृष्णपक्षे वर्णः शुक्ल
पक्षे स्वरः एवं योधयोर्यदि तदा शुक्ले गौरो जयी भवति कृष्णपक्षे कृष्णो

॥न॥ज॥
ज॥दी॥
॥२४॥

14

२ भवति ह्रस्वो द्वावपि द्वावपि दीर्घौ यतः ककार स्वरनिकटे । अथवा द्वावपि दीर्घौ तदा खकार वर्णभटो जयी २ ७

जयीभवति अत्रवर्णनामेव प्राधान्यं न स्वराणां यतः शुक्लकृष्णयो रपि वा प्रोक्तं ३ अथ पक्षस्वरवर्णयोरेकत्वे भेदं तुल्ये सति जयप्र कारमाह पक्षवर्णः स्वरैरिति स्वरवर्णशुक्लकृष्णयोरेकत्वे सति यः स्वरा सन्नवर्णो ह्रस्वगौरो वा शुक्लो वा स जयीभवति । दीर्घयोधयोर्द्वयोः उच्चस्वरो दूरवर्णश्च एवं द्वयोर्यः स जयीभवति ॥ अथोदाहरणं योध योरेकस्वनाम वर्णः ककारः ह्रस्वः अन्यस्य खकारो द्वावपि तुल्यक्रमा णे ह्रस्वौ द्वावपि दीर्घौ तदा कवर्णभटो जयी २ अथवा खकारगकार व र्णभ्यां भटयोर्नाम तदा स्वरासन्नः ह्रस्वयोर्मध्ये खकार वर्णभटः गव र्णभटं जयति दीर्घत्वे तदा गकार भटः खकारभटं जयति एवं वर्ण

धयोर्द्वयोः ॥ शुक्लेगौरे पक्षे कृष्णे शुद्धे जयति निश्चितम् ॥ ३ ॥
पक्षवर्णस्वरैकत्वे शुक्लेगौरे भटे यदि ॥ स्वरासन्नान्तरो
ह्रस्वो दीर्घो दूरान्तरो जयी ॥ ४ ॥ ऽमारणनामवर्णे कं
पुद्धकारकयोर्यदि ॥ तत्र युद्धेबलं देयं यायी स्थायी
विभेदतः ॥ ५ ॥ योधयोः सर्व भेदैक्ये स्वरे प्रनिकुमा
रके ॥ यायी जयी तथा स्थायी वालवृद्धांतिमस्वराः ॥ ६ ॥

स्वरचक्रे ह्रस्वदीर्घयोः स्वरासन्नदूरवर्णे जयं बलं दद्यात् ४॥ अथ शुक्लकृष्णपक्षादियलमाह दीर्घो दूरान्तरो जयी सन्नार्थे तयोः सर्वभेदतुल्यता यां जयोपायमाह ऽमारणनामवर्णेति सर्वभेद तुल्यता यां स्थायी यायी भेद एव जयोपायः अथ सर्वभेदैक्य ये यस्याधिको न जयभेदलाभो भवति तथाचार्यं द्वयुद्धकार्ये तु स्वस्य योधस्य बहु भेदफलानि देयानि पश्चात्स्थायि जाय्य भे देनाधिकं कुर्यात् ५॥ अथ स्थायियायि बलमानमाह योध योः सर्वभेदेति द्वयोर्योधयोः एवं स्नेसर्व जयभेदैक्ये तु स्ने सति यायी जयीभवति कुत्र जयीभवती त्याकांक्षा यां प्रनिकुमार के स्वरे सति तत्काले नाडी स्वरे प्रनिकुमारे वा प्राप्ते यायी बला मा श्रयेत् कालवृद्धांतिमे वालवृद्धमृतस्वरे युद्धकाले स्थायी ज यति स्थायीबलं समाश्रयेदित्यर्थः पुनः स्थायी यायी बलं पुन रुक्त्या प्रकटयति कुमारयुवयोर्यायी जयीभवति नापरः वा लवृद्धांतिमे स्थायी जायीनो जयिनो जयः ६॥ अथ सर्व कार्ते सर्वकार्येति विशिष्टोपमाह आयेति पाविति पश्चा त्तिथि प्रधानस्वरो नोक्तः अधुना उच्यते अकारे नंदा स्थायः तत्राकारादिको सप्तवर्णः अकछडधमवाः तत्र प्रतिपदा

॥ स्वरप्रकरणे विशेषः ॥

॥ अ ॥	॥ इ ॥	॥ उ ॥	॥ ए ॥	॥ ओ ॥
क १ छ ६ ठ ११	ख २ ज ७ ड १२	ग ३ झ ८ ढ १३	घ ४ ञ ९ ण १४	च ५ ट १० त १५
अ	इ	उ	ए	ओ
ध भ व	न म श	प य ष	फ र स	ब ल ह ३५

अकछा वर्णस्याद्यः षष्ठोऽध्यो वर्णो एकादशपंचमयो वर्णे इति विभागः एवमिकारादिषु तिथीनां विभागः ॥ ७ ॥ अथास्मिन् चक्रे को विचार इत्याह वर्णतिथ्यादि इति तिथिवर्णद्वौ स्वरचक्रे तिथ्याख्या तिथीनां तिसृणां माख्या नाम भवति किं तन्नामेत्याह जन्म

आद्ये तिथौ त्रयो वर्णा द्वौ द्वौ वै शेषयोर्यदि ॥
एवं तिथित्रये ज्ञेया वर्णसंख्या तिथिस्वरे ॥ ७ ॥
वर्णतिथ्यादितिथ्याख्या जन्महानिमृतिस्तथा ॥
भीर्जन्मनि रुजा हानौ मृतौ मृत्युर्न संशयः ॥ ८ ॥
॥ इति यामले स्वरप्रकरणे विशेषनिर्णयः ॥

हानिमृतिस्तथा आद्यतिथिरेव जन्मनाम भवति द्वितीयस्य हानिसंज्ञा तृतीयस्य मृति नाम एतदुक्तं भवति अकछा यस्य नामवर्णे तस्य प्रतिपज्जन्मसंज्ञा षष्ठी तस्य हानिसंज्ञा एकादशी मृतिः यस्य छध्यो वर्णो तस्य षष्ठी जन्मसंज्ञा एकादशी हानिः प्रतिपन्मृतिः यस्य मध्यो वर्णे तस्यैकादशी जन्मसंज्ञा प्रतिपद्धानिसंज्ञा षष्ठी मृतिः एवमिकारादिषु वर्णतिथिसंज्ञा कल्प्या अथ गवाणफलमाह भीर्जन्मनि जन्मसंज्ञे तिथौ भीर्भवति संग्रामायधुमकर्मणि हानौ तिथौ रुजो भवति । मृतौ तिथौ मृतसंज्ञे तिथौ मृत्युर्भवति अथ सर्वासां तिथीनाम निष्फलत्वं वर्णतु किमपि कर्म न कर्तव्यमिति कालत एव नास्ति तत्रातिथि न सीति विचार्य कवेरभिप्रायं व्याख्यास्यामीति आद्येति पौत्रयोर्वर्णतिथिचक्रं नाम वर्णवशात् मृतसंज्ञेषु तिथिषु जन्महानिमृतिसंज्ञा तास्वष्टदष्टरुग्नशत्रु समागमादिषु मृतानि तिथिफलमिदं बोद्धव्यमिति ॥ ८ ॥ एतावत्स्वरचक्राणि समाप्तानि ॥

न॥ज॥
ज॰ टी॥
॥१२॥
15

अथ नामजकालजस्वरमुत्थाय तेः षोडशस्वरैर्दिनफलं वक्तुं दि
नचर्यां ग्रन्थकारमाह ॥ यदुक्तमिति ॥१॥ योगपिंडद्वेति २॥ तस्याध
स्यास्तिखे दिति ॥ आदौ योगस्वरं स्थापयेत् । ततोऽपिंडद्वेराश्याया
स्थापयेत् ॥ तेषामधो द्वादशाब्दादिकालजान् स्थापयेत् ॥ तत्र योग
स्वरकोष्ठकाधः द्वादशाब्दकालजं स्वरं स्थापयेत् ॥ पिंडस्वरादधो वा
र्षिकस्वरं स्थापयेत् ॥ नक्षत्रस्वराधोऽयनस्वरं स्थापयेत् ॥ राशि
स्वराध ऋतुस्वरं स्थापयेत् ॥ जीवस्वरादधो मासस्वरं स्थापयेत् ॥ ग्रह
स्वरादधः पक्षस्वरं स्थापयेत् ॥ वर्णस्वरादधः तिथिस्वरं स्थापयेत् ॥
मात्रास्वराधो नाडीस्वरं स्थापयेत् ॥ तदधः किं स्थापयेदित्याह स्वस्व
भोगेन संयुक्तानिति द्वादशवार्षिकादि स्वराधः एकादशांशिकान्त
रोदयस्वरभोगात् वर्षमेकं मासमेकं दिनद्वयं लोकोऽपि नाडिका अ
ष्टत्रिंशत्पलानि स्तोकीन् स्वस्वभोगात् स्वस्वाधः स्थापयेदित्यर्थः ॥३॥

यदुक्तं यामले तंत्रे ज्ञानं गुरुप्रसादतः ॥ स्वराद्दिनफलं
वक्ष्ये पुंसां कर्मप्रकाशकं ॥१॥ योगपिंडद्वेराश्या
ख्य जीवखेटाक्षरस्वरान् ॥ उत्थाय नामतः स्थाप्योमा
र्गा तन्स्थापयेत्क्रमात् ॥२॥ तस्याधः स्याल्लिखेच्चा
ष्टौ द्वादशाब्दादिकान्स्वरान् ॥ स्वस्वभोगेन संयुक्ता
न्भोगश्चैकादशांशकः ॥३॥ यथोत्तरबला योगादि
काः कालस्वरास्तथा ॥ कालोदयस्वराश्चापि ज्ञात
व्याः स्वरवेदिभिः ॥४॥ आकारादिस्वराधस्थाः स
ख्या वेद ४ प्रमाणकाः ॥ विन्यस्यैकमयोगेन तेच
विंशोपकाः स्मृताः ॥५॥ योगात् द्वादश
वर्षैस्ववस्थापिंडतोऽब्दकैः ॥ भस्वरादयने ज्ञेयो रा
शिस्वरादृतुस्वरे ॥६॥ जीवान्मासस्वरे वस्याग्रहात्

अथ निर्णीतफलकथनाय नामजानां कालजानां स्वराणां यथो
त्तरबलमाह यथोत्तरबला योगादिति ॥४॥ आकाराद्याः स्वराधस्था
इति अ ४। इ ४। उ ४। ए ४। ओ ४॥ एवं योगेन विंशतिः २०॥५॥
योगात्द्वादशो वर्षैरिति ॥६॥ जीवान्मासस्वरेति ॥७॥ द्वादशाब्दादि
कः कल इति ॥८॥ स्वरो व्रताग्निकाविति ॥९॥ द्वादशेति ॥१०॥ शु
भाशुभेति ॥११॥ विंकुस्येति ॥ अथोदाहरणद्वारेण कलितार्थं
यथाज्ञानं तत्कारणं दर्शयामि ॥ लिखन्नको दुर्गारेखा चतस्त्र
स्तिर्यगास्थिताः ॥ नामजान्कालजांश्चाष्टौ तत्रोक्तविधिना लि
खेत् ॥ तत्रैदेवदत्तस्य दिनचर्या ॥ अत्र शुभाशुभराशिद्वये विचारः ॥
अथ शुभपक्षे ॥ योगस्वरादुकारात द्वादशवार्षिकां ततोदय उकारो

प्रवालस्य संख्या ४ नलग्नस्वरोऽकार आयनस्वर इकारः कुमारस्तस्य सं
ख्या ४ राशिस्वर ओकारस्तद्दशायां ऋतुस्वरः अकारः कुमारः तस्य संख्या
४ जीवस्वरो ओकारस्तद्दशायां मासस्वरो प्रवालस्तस्य संख्या ४ तदंतर्दशायां पि
वा ४ वर्णस्वर उकार तद्दशायां दिनस्वरः कुमारः तस्य संख्या ४ अत्र स्वरोदयो
ऽपि प्रवालस्तस्य संख्या ४ मात्रकास्वर एकारः तद्दशायां नाडीस्वरो प्रवालस्तस्य सं
ख्या ४ अंतरोदयोऽपि प्रवा ४ एवं शुभसंख्या ३६ ॥ अथाऽशुभपूर्ते यो
गस्वर उकारस्तद्दशायां द्वादशवार्षिकस्वर इकारो मृतः तस्य संख्या ४ पिंड
स्वर एकारस्तद्दशायां वार्षिकस्वर इकारो वृद्धस्तस्य संख्या ४ अंतरोदय उका
रः स तु मृतस्तस्य संख्या ४ ऋतुस्वरोऽकारः अंतरस्वरोदय उकारो मृतः
तस्य संख्या ४ राशिस्वर उकारस्तद्दशायां ऋत्वंतरो वृद्धस्तस्य संख्या ४
ग्रहस्वर उकारः तद्दशायां पक्षस्वरोदयांतरोदयौ मृतौ तत्संख्या अष्टौ
८ एवमशुभसंख्या अष्टाविंशतिः २८ शुभसंख्या ३६ शुभाशुभयोः
॥ पक्षस्वरे तथा ॥ वर्णादिनस्वरे तेषामात्रास्वराद्युदीस्वरे ॥७॥
द्वादशाब्दादिकः कालो मात्राकारादिकस्वरे ॥ स्थितस्त
त्र शुभो न स्यात् संचार्यः स्यात् शुभोऽपि च ॥८॥ स्वरौ ह्वक्रांति
मौ दुष्टौ बालपूर्वे दलं तथा ॥ शेषं सार्धद्वयं मध्यमिति ते
षां शुभाशुभः ॥९। द्वादशवार्षिकाद्याये स्वांतरोदयसं
स्थिताः ॥ ते शुभा एकतः स्थाप्याः अशुभास्त्वन्यतः पृथक् ॥१०॥
शुभाशुभस्वरूपस्य राशियुग्मस्य मध्यतः ॥ एकस्मात् त्यति
ते शेषे शेषं तद्दिनजं फलम् ॥११॥ विंशत्या ताडिते
शेषे चतुःषष्ट्या विभाजिते ॥ लब्धा विंशोपका ल
ते शुभाशुभप्रकाशकाः ॥१२॥
६४
तेरे शुभपक्षस्य शेषं शुभसंख्या ८ विंशत्या ताडिते शेषे चतुःषष्ट्या वि
भाजिते अनया हृत्किया गुणिते जातं १६० चतुःषष्ट्या ६४ लब्धं
२।३२ पादार्धं शुभं फलं ॥ किंतु शुभफलं तद्विचार्य लिख्यते ॥ कविना
नोक्तं । शुभपक्षे प्रवालो द्वादशांतरोदयः ॥ मासस्वरो प्रवा ॥ अंतर्दशा प्रवा
दिनांतरोदय नाडीस्वर प्रवा नाड्युदयोऽपि प्रवा ॥ अंतरोदयोऽपि शुभ
पक्षे यत्नः स्वरः पंचदशतो येनि सर्गबलिन तेग्राह्याः तत्र योगस्व
रान् यथोत्तरबलिनो नाडीस्वरो नाडीस्वरस्याऽपि पक्षे मात्रास्वरः
मात्रायां स्त्रीजनानां फलं वदेदिति ग्रंथकारः ॥ देवदत्तस्य चैत्रशु
क्ल प्रतिपदि आरंभसमये सार्धपंचघटी शुभफलं भविष्यतीति पा
दोर्ध्वं किंचिदशुभफलं आकांक्षाअपरैर्वा स्थिता ॥ अथास्य शास्त्र
स्य परमप्रयोजनं दिग्विजयिनां राज्ञां विजयः येर्यैर्भूवलादिभिर्वि
जयो भवति चातुरंगसंग्रामं जयति ॥ यानि भूवलान्यावश्यके नरहा
ऽणि तान्यस्मिन्नेव स्वरोदये अंतरांतराणि एकत्रीकृत्वाऽत्र प्रतानि
लिख्यंते प्रथमतो नामवर्णबलात् यद्यपि मात्रादयः स्वरा उक्तास्तथा
ऽपि तेषां वर्णस्वर एव प्रधानः मात्रादयो राज्ञां द्वादशवर्षाभ्यंतरे दिनकु
लकल्पनार्थं कथिताः ॥ तथा च स्वरोदयकारैरेवोक्तं वर्णस्वरसाम्यं

सर्वकालं बलीवर्णे इति द्वंद्वयुद्धार्थे चापि वर्णस्य मामाच्युमु क्रं
तथाच ककारादि इति इत्यादिना द्वंद्वयुद्धे वर्णस्वरबलादेव ज
य उक्तः अथादौ पंच स्वराणां दिग्बलं ग्रासं पूर्वस्मिन स्वरः
स्वामी इति यस्यादिशीति विशेषबल इत्यंतं ॥ अथान्यु स्वराणां
बलं मतोबालस्तथा वृद्ध इति योयस्येति मत्यु हीनेति एकमा
त्रेति पारमेरित्यंते ॥ अथान्यु युद्धबलाबलं ॥ शत्रोर्मृत्युस्वरे
ति नान्यथेत्यंतं ॥ अथ द्वंद्वयुद्धे बालादिपंच स्वराणां बलाब
लं मतोबालस्तथेति एकग्रति पिवाद्यैः कुमारस्तरुणस्वरैः
यद्दिने जयपदा स्याज्या बालवृद्धांतिमस्वराः ॥ अन्य द्वलाबलं ॥
प्रमाणं नाम वर्णेक्यमिति ॥ कुमारयुगयोर्यायीति ॥ आकहोत्र
गोभवेद्यायीप स्थाज्ञामी स्थिरः स्मृतः ॥ आकयानी चापि यायी
स्यात्स्थाद्वातीपरस्मृतः ॥ यायी काले जयं यायी लभते नात्र
संशयः ॥ स्थायी स्थिरे त्वप्याहानिं स्वकालादितरेतरे ॥ पूर्वादि
दिक्स्वरगतः सुखं पनि जयो भवेत् ॥ जयः सघातः स्यादायोः शे
षयोरजयो भवेत् ॥ अथान्य द्वलं ॥ पृष्ठे पुरतश्छाया दक्षिणे
के पवामगा ॥ जयी जायी वहत्येके जयी स्थायी विधुः स्वरे ॥
वामाग्रगा शशिच्छायायातु पृष्ठे दवहेसति ॥ जयः सूर्ये वहे स्यात्तु
तयो वामे शुभः शशी ॥ अथान्य द्वलम् ॥ समरसारे ॥ प्राचीउ
दीची वा चेद्रेति ॥ आक्रोम्यवहिरा हूसेयमपश्चिममरुच्छिवां
ने च ॥ तिथिवत्रि पिपदमस्मात्स्वहेराहूराहु योगिनीजयदा ॥
पृष्ठे दत्ते योगिनीराहू युग्मेति ॥ अथान्यो योगिनीराहुः ॥ रमगुवु
गुशाचवाराः पूर्वतोस्मादिगीशात्क्रमति युगयुगा ४ शाभुरन्निद्वंद्वे
न शुक्ले ॥ अहनि निशि च वामे सुक्रोयामेन ऊहमे रिपुबलशत
हेला पृष्ठगस्याग्रहंती ॥ नागा ८ ग्नि ३ रस ६ रूपा १ ब्धि ४ नगा ७ स्र
ग्रहराधकैः ॥ कालाः सूर्यादिवारेषु वर्ज्यनीयाः कवोरले ॥ समुद्र
४ स्य ७ क्षि २ वं ३ ह्यहि ८ गुण ३ र्तु ६ ग्रहराधकैः ॥ सूर्यार्क्यबुधाः
शनी यमनिशा नौपा कृपाः पूर्वतः सव्ये स्यानयते भ्रमस्य गुरुसौ
शुक्रे चतुर्थी दिशि ॥ यामार्द्ध न चरेत्स्वयं निशि दिने गत्यापुनर्यामया
पत्ते चास्ति न संसके जयदो दले च पृष्ठे तमः ॥ भानुवारक्रमादे
ते वर्जनीया जयार्थिभिः ॥ समरसारे ॥ योरेशा मे ज्याः विनिवेष्य
ति ॥ वारत्रवेजे घटिकाद्विनि ष्वेति ॥ स्वराश्याधिपखेटस्य वैरि
णो रोदयेरश्मि ॥ वर्जयेत्सुमन वश्यं द्वंद्वे कौटे कवौ सदा ॥ शुक्रारश
निस पर्याणी शानादि पुराशयः ॥ अत्स्ययापो गतीचौदिनेऽर्त्स्यो
दग्गुरोर्दहम ॥ द्वितीययामार्द्ध नरवस्तूर्यः तत्पक्रमार्द्धंति तत्तल्ल
ली यां ॥ यामे च यामे च पुनस्तल्लीयां प्रागंत्य खंडे नयमो गतोते ॥
ईशादिको णं रवि वन्हि हंति प्रदक्षिणं शीतमयूखमाली ॥ यामे

॥ अथ दिनफलस्य चक्रम् ॥

योग	पिंड	नक्षत्र	राशी	जीव	ग्रह	वर्ण	भांश
द्वादशा द १२	वर्ष १	अयन ६	ऋतु ७२	मास ३०	पक्ष २५	तिथि ६	घटी ५॥२६
१	०	०	०	०	०	०	०
१	१	०	०	०	०	०	०
२	२	३६	६	२	१	०	०
४३	४३	२१	३२	४३	२१	५	०
३८	३८	४५	४३	३८	४५	२७	३०
०	आ४	इ४	उ४	ए४	ओ४	०	०

तृतीयां च ततस्तृतीयां द्वितीय यामे विनिहंति याम्यां ॥ स्वकार्यस्य ग्रहरार्ये
न हंति चन्द्रोग्नि दिक्क्रमात् ॥ हिता याञ्याभिमुखेन हित्वा षष्ठीश्च संगर: ॥
आगादीशार्कि सितकुजराहुयमेंदुसौम्य वाक्पतय: ॥ वस्यांवासरनाथ:
तद्दिग्भागे घोरि पुं हंति ॥ हंति सूर्य: शनि भौमं बुधं हंति कुजो गुरुम् ॥ तमो
भौम: एव जो भौमं शशी शुक्रं विधुं गुरु: ॥ यादिक सादिक ग्रहर्तस्या दिक्नाथ हत
दिग्गजा: ॥ दिक्नाथकाल होरायांवा सरेच विशेषितेः ॥ विरुद्ध ग्रहराहु
राहुशनिसूर्य गुरु रथ्यायां रवि बल चंद्र बल होरादी नामशाम बलस्य घात
माह समरस्यांग्रे वामांसे विरुद्ध यामदले जेति अथ यस्य योधस्य ज
न्मराशेर्जन्मोदया द्वाय तस्य संख्ये स्थाने ग्रहाभवंति न दशानन्नदंगे घातमा
ह लग्नाद्राशेश्च तुसः शशी १ रवि १२ शीव ११ दिक १० व्योम गो ९ दीपि ८
वेद ४ स्थाने षर्ष ५ ऋतु ६ तं स्यो रवि शशि कुजविस्तृ ज्य शुक्रादि खेदा: ॥
घातं कुर्युर्ययोक्ता: शिरसि च वदने हृत्प्रदेशे समृद्धि वस्त स्तरुजे देशेगुह
इति तदनुगं पिंडोगं डभागे ॥ शनि चंद्रो गुरुस्तर्य सितौ कुजबुधौत्य
जेत् आगादि धुनि षिद्धा युधायामेष्वलं विशेषत: चंद्रपुत्र पातकायां
का स्वोच्छ लिखेद्रेखा षड्रे खानिर्षगाश्रिता: नपुंसकोत्य रहिता स्वरान्
वर्णान् लिखे बुध: कचवे गांन रहितानंकाश्चाधोलिखेत्क्रमात् वाण
५॥५ वह्नी ३॥३ ऋतू ६॥६ नाग ८॥८॥८॥९ नंकानंते ९ वहं लिखेत्
योधयोवर्णमात्राणां संख्या कुर्यात्पृथक्पृथक् द्विचो षेके १ जयी श्र
न्ये: शेषयोध: पराजयी ॥ गलूभिर्भाजिते प्राप्ते योधयोर्यदि शेषके
शून्य० वेदा ४ रामा ६ वाण ५ शैल ७ रामा ३ भवो १ भुजौ २ मात्रका
यां क्रमाज्जेता वशात्क्रमशोभट: ॥ यस्य वेदा ४ जयी योध: शेषयो:
श्चान्य वेदयो: वेदत्वौ ४॥६ जयिन: घट्स्य वाणजेता रसार्कयो: ६
५॥ शैलार्थयोजेयी शैले: ५॥७ शैलाग्न्यो ३॥७ विजयी श्रुचि: ॥

जयभाग्यं स्यात्सेनायाः संग्रामे गुरुशुक्रयोः ३।१॥ सर्वस्माज्जायते नो बाहु
किं प्रनर्वाहुरुशुक्रयोः ३।२ अग्न्यस्त्रे ५ अग्नि ३ भुज २ वेद ४ मतंगज ८
र्तु ६ खेन ९ अब्धि ४ वह्नि ३ गगनं ० जिनयो निषेकोः यस्य दधोन
17 रमितीरहितो द्विरुपैः ३२ जेतास्तवबलपोऽश्वहतोधिको वः॥ अ
पचक्रे यम सेनापतिः कार्यो द्वितीये शत्रुपलायनं अयबलानां
नियमुमोह स्वरछाया तिलार्केन्दुयोगिनी राहुभूबलं॥ आयुधे
पतिष्ठते नोन्यथा बलवत्तरम्॥ स्वराके अकाराद्याः स्वराः पंचशू
शादिषु संस्थिता इति अयकायेति पृष्ठे के परतः छाया दक्षिणे
के पवामगेति सूर्यचंद्रयोर्हृच्छाया पृष्ठस्थो वायुः सूचये
यं अथार्केन्दुरिति प्राचीमुदीचीवेति चन्द्रभानुबलं प्रासंगेनां
समानुरिति भानुबलम् आक्लोमाग्नीत्यादि योगिनी राहुः भूबलं
किं तेत्रपालीप्रधानान्नदी जयपराजयचक्रं द्वंद्वे हि बलं अथ स्व
रोदयांश्चाद्बलानि लिखितं तु अष्ट ३ए कर्णिका यं होडाचक्रं प्रतिष्ठि
तं द्वंद्वयुद्धे महाहवे कवोकोटेच विद्वद्भिः क्रमेण द्विचार्यते॥ आ
दित्यमुज्जमानक्षे योधयोर्जदि जन्मभं॥ तद्दिनक्षे यदा युद्धं जाय
ते विजये स्थिरोः॥ चातुरंगे चकोटे च फलं लग्नवशात्स्मृतं॥ भूपतेर्ज
न्मनक्षत्रे न जन्मचरलग्नोदये॥ अर्काक्रांते यदा युद्धं जायते मृत्यु
र्विहितः॥ अन्येषु त्रिषु पादेषु युद्धं घातायके बलं॥ घातः शिरसि
वदने घातः स्याद्धृदयोदरे॥ यस्मिन्नाशे रविस्तस्मात्सप्तमो यदि
योधयोः॥ राशिस्तस्य विधो युद्धं घाताय मरणाय वा॥ दुर्गरोधे
वधे देवं चातुरंगे कवा वपि॥ यस्य कस्यापि योधस्य मृत्युं पातं वदे
त सुधीः॥ योधयोः सप्तमे राशौ सूर्याक्रांते भतो यदि॥ प्रकोष्ठे दक्षिणे स्क
धे घातः शिरसि जायते॥ मुखात्स्व दक्षिणांगे तु दुर्गभंगः प्रजायते॥
को दधिपो म्रियते राजा वा युधि नश्यति॥ ५॥ सप्तमात्सप्तमं यो
धो वर्जयेद्दर्कतः स्वयं॥ अथान्यत्संग्रहत्वात्पिहोडाज्ञानेन सूर्यभात्॥
दशमे योडुभे युद्धं तज्जन्मचरलग्नोदये॥ मृत्युः स्यात्तस्य पातेन दक्षिह
स्तो दशाङ्गवः॥ द्वादशर्क्षे यदा युद्धं भास्करान्नायते भटः॥ जालेन ह
स्तो भज्यते परं जीवति युद्धतः॥ रविभाद्योधभे युद्धं जायतेऽष्ट
चतुर्दशे॥ जन्मपादे दयो घातो ह्युपाताद्विनश्यति॥ तथा पंचद
शे युद्धं सूर्यभाद्योधभं यदि॥ जन्मपादोदये वा तेः पतनान्म्रिय
ते भटः॥ एकोनविंशभेप्येवं संग्रामे म्रियते भटः॥ एकविंशति
मे युद्धं हस्तपादादि नश्यति॥ पृष्ठे वा जायते घात स्तत्रैक्षेत्रे मृ
तो भटः॥ चतुर्विंशतिनक्षत्रे योधभं भानुभाद्यदि॥ जन्मपादे दि
क्संख्ये तु लाघवधयोर्धृतिः॥ द्वादशैकादशे १२।११ मृत्युर्मुहू
र्नैमगमीनयोः॥ मुहूर्तं वर्जयेद्धां रलेद्वंद्वे विशेषतः॥ सूर्यभा
द्दशमेऽस्ते द्वादशेप चतुर्दशे॥ तिष्यके विंश चतुर्विंशे सूर्यभाद्

जयेद्रणम् २०।२२।२४।२५।२९।२८ चतुर्भिर्घटिकाभिः स्यादुदयाद्यो
गिनीभ्रमः प्राच्यां १ धनदे २ वह्नौ ३ नैरृत्ये ४ दक्षिणे ५ ज
ले ६ पवने ७ गिरिशे ८ त्वेषां भ्रमस्तेव पुनः पुनः ॥ यस्योदयास्यां जा
नाति चातुरंगे जयी भवेत् ॥ योगिनी जयदा पृष्ठे दक्षिणे च स
दा भवेत् ॥ अथ तात्कालवारोदयः यस्मिन्नहनि यो वारस्तस्य
भुक्तिरुदाहृता ॥ चतस्रो घटिका ४ तस्मात्षष्ठः पुनरुदेति च ॥ घटिका
भिश्चतसृभिर्ज्ञेयस्तत्कालवासरः ॥ यथा सोमे त्वर्कः शनिः षष्ठः शनेर्गुरु
र्यथा ॥ यस्य योधस्य यो राशिस्तस्य योऽधिपतिः स्मृतः ॥ तस्य वारे तदुद
ये वश्ये निःफलतां व्रजेत् ॥ तत्कालदिननाथाश्चेद्वैरिणश्चापि निःफलाः ॥
द्वंद्वयुद्धे रणे वापि विश्वे युद्धे पराजयं ॥ यथा यस्य जयो भंगो ज्ञायते च परिस्फु
टम् ॥ मेषादीनां चराशीनां ध्रुवकं कथयाम्यहम् ॥ रामाक्षा ५३ रामविशिखा ५३
वसुरामा ३८ जलधीशरवः ५४ तिथयः १५ खाब्धयो ४० द्व्यब्धि ४२ पंचा
ताः ५५ पंचभूमयः १५ षड्राम ३६ षट्सरित्राथाः ४६ षड्ताः ५६ ध्रुवका
श्चमी ॥ मेषादीनां क्रमाल्लेख्या योधयोर्ध्रुवयोर्युतिः ॥ कार्यवन्हि ३ हृताशेषा
त्फलं वै ज्ञामि संगरे ॥ आक्रगहारी जयी द्वंद्वे शेषे रलभते जयं ॥ एकशेषेऽप
वामन्ये पश्चात्घाती जयं लभेत् ॥ आक्रगहारा पराप्यंचगत्वाप्य ग्रहनि
ष्यति ॥ पश्चात्घाती पराप्यंचपश्चाद्गत्वा हनिष्यति ॥ द्वंद्वयुद्धे विशेषं च
वक्ष्यामि किमपि स्फुटम् ॥ यस्मिन्दिने निशानाथः सप्तमो जन्मराशितः ॥
यस्य योधस्य स जयं लभते नात्र मे मतौ ॥ जन्मपादोदये पृष्ठे दक्षिणे वा नोऽ
भिजायते ॥ तस्माद्भूमेस्तोवा त्वो रणे कोटयवाकनौ ॥ सप्तविंशतिन
क्षत्रेस्तु यम्भायदि योधभे ॥ संग्रामे मृत्युमाप्नोति जन्मपादोदयभटः ॥
अथ दग्धतिथयो रणे वर्ज्याः ॥ कोदंडादिषु मत्स्येषु सचतुर्थेषु नाड्यपि ॥
द्वितीयाद्याः समादग्धाः सिते कमलबोधने ॥ २॥४।६।८॥१०॥१२॥ ए
ता स्तिथयो दग्धा वर्जनीयाः सदा रणे ॥ मेषलग्नेऽजमरणं कन्यायां
गोग्रहस्य च ॥ स्त्रीपुंसोः कर्कटे मृत्युः तुलायां कुक्कुटस्य च ॥ सिंहस्य वृ
श्चिके मृत्युः कन्यामीने मृतिं लभेत् ॥ तुलायां मिथुने मृत्युर्वृश्चिकस्य वृ
षे मृतिः ॥ धनुषो वृषभे मृत्युर्धनुषि मकरस्य च ॥ तुलायां कुंभमरणं
मीनस्य मिथुने मृतिः ॥ अथान्यत्संप्रवक्ष्यामि संयागाद्वारयोधयोः ॥
पक्षी मरणमाप्नोति संग्रामे रविवासरे ॥ मार्जारमृत्युश्चन्द्रे हि भौमे
न्हि मृगभूपतेः ॥ श्वनो बुधे न्हि मरणं नागानां गुरुवासरे ॥ अश्वका
नां भृगुदिने शनौ मृत्युर्गजाजयोः ॥ अथ गादिभए युद्धे राविधा
रादिषु क्रमात् ॥ तदर्द्धयामहोरायां वर्जयंति विशेषतः ॥ उदया
द्विमुहूर्तेन मेषवृश्चिकयोर्मृतिः ॥ परतो द्विमुहूर्तेन मिथुनाव
मुहूर्ते धनुम परतो मरणं कर्कटस्य तु ॥ कोदंडतौलि
लयोर्मृतिः ॥ मुहूर्ते परतो भवेत् ॥ पादत्रभागं शशि २ संयुतायां द्वि
सिंहानां मरणं परतो भवेत् ॥ आक्रांतकस्य मृतिमेति योधः शेषश्च
भाजितायां धरण्यां २ समाजे ॥ हरेत्पाल भाव्यं गरामा ३६ चितानि
जलये विधुतो यदिकस्य ॥

18

द्विपेः ८ शेषदिश्यं फलकः कीर्तितो सौ ॥ शुभो दक्षिणगेऽपृष्ठे चवा
मः प्रोक्तो वामभागे च भंगप्रदः स्यात् ॥ सलाकामसरे केचक्रे मासदग्धा
दिकं तारके ॥ अथ चक्रे न्यसेन्मासधिष्ण्ये मासविधुं तथा ॥ दिन
धे दिनशीतांशुं तस्माज्ज्ञात्वा कालिकं विधुं ॥ सपादयुग्म २।१५ घ
टिकाभुक्तिः समुदयोद्भवेत् ॥ धिष्ण्यमेवं च दण्डो १५ भानुं स्थापयेत्
सर्वदा बुधैः ॥ दक्षे पृष्ठे रविं कुर्यात् वाममग्ने निशाकरम् ॥ जयतो
द्धन्सन्देहो एको विशालमाहवे ॥ अथ चरयोगिनी ॥ ऐन्द्र स
मीरणदिशि त्वथ दक्षिणे च ईशे तथा वरुण आग्निकोणे ॥ कुबे
रनैरृत्यके कुरुच नभिर्नाडीस्थिता सा चरयोगिनी ह ॥ एवं प्रति
पदादेर्घटिके दिशि तिष्ठति ॥ ईशानयाम्ये च तथा प्रभंजने श
चीपतौ नैरृते तनुश्च वेश्वरे ॥ कृशानुकाष्ठा वरुणे कुर्मिनी
डी दय स्यात्तिथियोगिनी ह ॥ जयदा याथिनां वामे स्यात्पितो
दक्षिणे भवेत् ॥ उभयो जीयते युद्धे योगिनी वामदक्षिणे ॥
दक्षिणे जयदा श्रीका वामे चैव पलायनं ॥ वामे पृष्ठे सम्मुखे भं
गो जयदा पृष्ठदक्षिणे ॥ अथ संग्रामे योगिनी ॥ ऊर्ध्वं पश्यति
वाणभूपरिश्मि २५ तुं पादद्वयं खेन्दुभि १० वामं बाहु विधु त्रि
भि ३१२ परम पार्श्व चरामेन्दुभि ॥१३॥ उन्नं नं द्वयदा १२ रव्यभि
हितं पश्येत्सदा योगिनी दृष्टि तां परिवर्जयन्ति विबुधाः सर्वा
र्थसिद्ध्यै सदा ॥ अथ राहुः ॥ शार्वीतकेमरुच्छेककरक्षोयक्षाग्नि
पाशिनां ॥ दिक्त्वाद्येन दलेराहुर्भ्रमत्यन्हो परेण च ॥ वारुण ५
वन्हि ३ धनेश ७ निशाचर ४ त्रिदशनाथ १ मरुद् ६ यम २ शूलि
नां ८ ॥ अथ तिथि तु विशाख कलेन च प्रथमकेन ततोऽपरेण
च ॥ जन्मनक्षत्रमारभ्य गणयेद्दिनभं बुधः ॥ सूर्यनक्षत्रमा
रभ्य गणयेन्नामभं बुधः ॥ नवभिर्लुहरेज्ञागं शेषतो वाहनं
वदेत् ॥ गर्दभ तुरगो हस्ती मेषजंबुकसिंहकाः ॥ काको मृगो
मयूरस्तु नवैते नरवाहनाः ॥ गर्दभे धननाशः स्यादश्वे च वि
जयो भवेत् ॥ गजे वहुगजावाप्तिर्मेषे योगमवाप्नुयात् ॥
जंबुके भंगमाप्नोति सिंहे युद्धे जयो भवेत् ॥ वायसे च भवेद्
कष्टं मृगे कार्यं च सिध्यति ॥ मयूरे धनलाभः स्याद्यात्रा(काले)यां
फलमादिशेत् ॥ इति वाहनचक्रम् ॥ अथ वारादिकाले रवे
तानुलिखेत्स्वाद्यादि पृष्ठगो ॥ यत्रांशजो भवेन्नत्र कालप
शो हि पंचम ॥ दक्षे पृष्ठे शुभः कालः पाशो वामाग्रगः शुभः ॥
अथ तात्कालकालः ॥ रुद्रः ११ शरीरं कालस्य पात्रं वेद ४ प
कर्तरी ॥ वह्निं शोतिपि सं पुच्छे वसु शेषे क्रमात् दिशः ॥

अथ भ्रमिः॥ नेत्रपाली॥ विलोमेष्ट चेत्तोमासा चैत्राद्यादिक चतुष्ट
ये॥ ग्रहराः सव्यमार्गेण मासस्थानादिगतपते॥ नेत्रपालीमहाभ्रमिबं
लानां च वलोत्कटा॥ वह्निनां स्याद्दलवंती भूरन्या १४ दत्तिणे॥ इंद्रोंत
मेण॥ स्यादुक्रमच्छितिरतः ग्रहराहुभुजंग्या कामाद्यभ्रमति वायुसु
दिक्षुनूनम्॥ शाक्रा १ लकेश ७ वरुणं ५ तके ३ ना ५ कातु काष्ठा
सु चैत्रमुखमासपरिभ्रमेण॥ अर्कोदयेभ्रमति भूस्तनईश ११ सर्प
१२ सर्पाष्ट ८ तुल्यघटिकागतिरेककालः॥ रुद्रा ८ बुनाथ ५ शिखि ३
गुह्यक ७ राक्षसे ४ ऽ १ वातां ६ तके ३ श जल ५ वह्निधनाधिपानां॥
चैत्रादिमासकपरिभ्रमणेन चैनं राहुर्विशुद्धमनयोऽवनिमेकवार॥
रौद्रे १ वायु ६ जले ५ नद्रे ८ वारुणे ५ ऽग्नौ ३ दुराक्षसे ४॥ प्राच्यां १
तके ३ जले सौम्ये ७ चैत्रमासादिसंक्रमः॥ दिनं दिनार्ध यामं च प्रह
रार्धं ततः॥ एवं भुजंगक्रमेण दक्षपक्षगतो जयी॥ अथ लो
हपातस्थानं॥ संघट्टचक्रे प्राग्रुक्ते कृत्तिकाद्ये त्रिकोणके॥ ग्रहयोग
फलं वाच्यं नानापातसमुद्भवम्॥ एकरेखागते लोहं राहुकार्किशिखी
दुभिः॥ मंदार्कशत्रुभिर्लोहं तेनेत्थं लोहमादिशेत्॥ कृत्तिकात्रयरेखा
यां भानुभानुजराहवः॥ तत्र चक्रगतश्चंद्रो मेषे लोहं विनिर्दिशेत्॥॥
तवायुपातः सकृत्सकृच्चैव तर्थनाऽप्यास्वलुधीरचंद्रः॥ वेबोदयेचाद्यु
रेखाजीवे भौमे धानुजे तत्र संस्थे॥ कुंभे मीने जायते चायुपातः चैव द्रक्षी
केतू॥ लग्ने कीटे संस्थितो भौमचंद्रौ राहुश्चार्यानिश्चितं वज्रपातः॥६॥
पित्र्ये पूर्वे ११।१ रुद्रदिक्संख्यरेखा भानुर्भौमो धीवरः सजलश्च॥ सिंहे
लग्ने जायते वह्निपातो मध्यं पादं नश्यते दुर्गनायाः॥ रक्ता कृष्णा एकरेखा
[illegible] ग्रहाः स्युः पिंगारक्ता राशयः संस्थिताश्च॥ अन्यद्भुतो जायते लो
हपातो दिवसस्यार्धेन नमाकुर्धं नोद्राः॥८॥ शनिलयाभास्कर एकरेखाग
तस्थितौ लेखतु एक एव॥ सिंहे च भानुर्मकरे शनिश्च उभे च लग्ने खलु
वीर्य लोहम्॥ अमुरेदुस्थेरेखायां रंध्र ९ दिक १० सुत ५ सप्तमाः ७॥
चंद्रचोऽपि स्थितो तत्र वायुपातं विनिर्दिशेत्॥११॥ एकोनविंशरेखायां
जीव सूर्य महीसुताः॥ लग्नांशे प्रथमे लोहं द्वितीयांशे तु वज्रकम्॥१२॥
यत्र रेखास्थितः सूर्यो रेखायां तत्र चंद्रमाः॥ राहुलग्नगतश्चैव लोहपा
तं विनिर्दिशेत्॥१३॥ कृत्तिकायदृमीरेखा २ ख्या कीं यत्र संस्थितो॥
तत्र स्थाने महालोहं लग्नांशे यत्र वर्तते॥१४॥ यत्र रेखास्थित चंद्रो भू
सुतो वाक्पतिः कविः॥ जलजं यत्र लग्नांशे ब्रूया हृद्धि तदाद्भुतम्॥१५॥
चक्रे त्रिकोणे खलु आयरेखास्थिताः वेरावाद्यप्रयुक्तमस्वेटः॥
तत्स्थितसमायाति विधुर्हि रेखो वह्निः ध्रुवः स्यात्समये कृशानोः॥१६॥

॥१९॥न॥ज्ञ॥
॥ज्ञ॰ टी॰॥

19

आद्ये चरांशे खलु लोहपातं मध्ये चरांशे सलिलं च वायुः ॥ अंत्ये चरांशे
सलिलं सयत्नं प्रसिद्धपातं कथितं त्रिकोणे ॥१७॥ पाद्ये स्थिरांशे कथ
यंति वह्निं मध्ये स्थिरांशे सलिलं च वायुः ॥ आद्ये स्थिरांशे च चलोह
पातं उडीशयाक्यं कथयंति तज्ज्ञाः ॥१८॥ एकरेखागतश्चंद्रो रविणा
राहुणाऽसृजा ॥ जायते तदहर्युद्धं दारुणं लोमहर्षणम् ॥१९॥ शनि
ना यदि चंद्रः स्यादेकरेखागतस्तदा ॥ कश्चियुद्धे विघाते च निर्दिष्टो
दविशंकितः ॥२०॥ चंद्ररेखागतः क्रूरः संग्रामं सूचयेत्क्वचित् ॥ द्वौ
चेद्दव्यग्रपादे श्रंगयश्चेत्तैस्त्वधातकाः ॥२१॥ अवश्यायांथ नायु
क्तं क्रूरखेटद्वयं ग्रयम् ॥ एकरेखागतं चापि भवेदाहवसंस्थितिः ॥२२॥
तुषारकिरणैर्युक्तः क्रूरेण च यथ भेनवा ॥ संग्रामस्तत्र चक्रो नस्याद
परः क्रूरयुग्मभवेत् ॥२३॥ रोहिणे पोशनो ध्यां च नीहारा ध्यंपाश्रुतः ॥
एकरेखागतो युक्तो जलपातस्तथा भवेत् ॥२४॥ कृशानुकेतुभौमा
भ्यां गुरुणा भृगुणा जलम् ॥ लोहपातं विनार्काभ्यां युक्तः कुर्यान्नि
शाकरः ॥२५॥ सूर्याराभ्यां भयं कुर्यात्तमोकीभ्यां युतो मृतिम् ॥ ते
गुरुभ्यां युतः सिद्धिं समं शुक्रेण शीतगुम् ॥२६॥ धी ५ विक्रम ३ व्यय
१२ धन ७ धर्म ९ शत्रु ६ तनू बु १ वः ॥ शशांकोऽपसव्येन स्थितः सो
पि युतः स्मृतः ॥२७॥ ग्रहाणां क्रूरसौम्यानामिदं ज्ञात्वा बलाबलम् ॥
उपद्रुपातं च घातं च ब्रूयात्तदनुसारतः ॥२८॥ एकारेखागतैः क्रूरैः
राहुयुक्तो निशाकरः ॥ रक्तपातो भवेत्तत्र यावन्नैः संयुतः शशी ॥२९॥
गुरुणा भृगुणा ज्ञेन यदा चन्द्रः समन्वितः ॥ एकरेखागतो वापि जलपा
तस्तदा भवेत् ॥३०॥ आदित्येन यदा युक्तो महीपुत्रेण वा शशी ॥ एक
रेखागतो वापि युद्धं वाभ्यां महाहवः ॥३१॥ एकत्र बुधशुक्रौ च यदि तत्र गताः
शशी ॥ यदि तत्र [illegible]तो भानुः समुद्रमपि शोषयेत् ॥३२॥ एकरेखापदारू
ढौ चन्द्रमाधरणीसुतौ ॥ यदि लग्नगतो जीवस्तत्र दृष्टे न संशयः ॥३३॥
॥ अथ चंद्रस्य वक्रत्वमाह ॥ वह्निभादिंदुपर्यंतं यावंति स्युरुडून्यथ ॥
तेन द्विगुणितेकोनापसव्यं गणयेद्विधुम् ॥३४॥ लोहपातं वदे
त्ते संग्रामसैत्रसंस्थयोः ॥ वर्षासु जले पातं च वायुपातं च चौव
देत् ॥३५॥ अनले धनुपर्यंते वज्रपातं वदेत्सुधीः ॥ अर्कोदये
यस्मिन्राशौ ये ग्रहास्ते चैव पंचघटीपर्यंतं तिष्ठति तदुपरि द्वि
तीयराशौ स्थाप्याः पुनर्दशदंडोपरि तृतीयराशौ स्थाप्याः एवं सं
स्थाप्य चिंतयेत् ॥ इति पंचपातचक्रं त्रिकोणम् ॥ त्रिनाडि
केके त्रिकाये कलिचक्रे विपर्ययवत् ॥ दिननक्षत्रसंयोगाल्लोह
पातं तु दावदेत् ॥ इति त्रिनाडीचक्रम् ॥ वेधचक्रे वा दृष्टा
रे त्रिकोणे भयं सप्तमे ॥ पापग्रार्कोदये खेटलग्नं तेजो वविनि
दिशेत् ॥ पंचपंचघटीमाना लग्ना लग्नव्रजेद्ग्रहाः ॥ राहुके
तत्सर्वमार्गे संहारे कोदयो ग्रहाः ॥ भ्रमंति राहुवद्वक्रा अर्कात्सं

तारगामिनः ॥ क्रूरग्रहयुते विद्धे लग्ने लोहं विनिर्दिशेत् ॥ स्वस्थाधिक व
हुत्वात मकादिग्रहयोगतः ॥ शत्रुसंयोगतो घोरं मित्रसौम्ये न जायते ॥
इति द्वादशारलोहं ॥ अथ लोहपाते स्थानसंघट्टमाह ॥ अश्वादि सप्तके
रक्षे पुष्यवद्दू पुरीतिके ॥ चित्रादि सप्तके लोपे क्षेत्रे वैश्याचतुष्टये ॥ लो
हं वर्षति मार्गेषु पूर्वभाद्रपदागये ॥ ग्रामजलसमीपप्रकारे लोहपातं
प्राह ॥ तिथिः ५ पंचगुणा कार्या दिनभेन समन्विता ॥ त्रिभि ३ भक्तो शेष
मेकं जले लोहं विनिर्दिशेत् ॥ द्वयं ग्रामे तथा काष्ठे शेषे शून्ये पदाभवेत् ॥
संग्रामदेशाद्दृश्यमाह ॥ तिथिः ग्राकघटिका पंचदशो १५ युवीक्ष्यते शिवो
दश १० ग्रामे दशो १० दने दशग्रामे १० धस्थिते भयः ॥ पत्राणि भैरवी हरि
लग्न लोहं गवर्षति ॥ अथ कविचक्रमाह उत्पाते प्रकारे वा निशी
थे मृगयां गते ॥ शोकार्तस्य मनं प्राह्णे कोमध्ये मध्ये चेतसि ॥ विवाहमित्रसं
योगे शत्रुकंचसमागमे ॥ तीर्थे देवालये व्यग्रे सैन्यघाते निनायके ॥
वसुधाके विकाललु कपिनोऽवलम्ब्यते ॥ एतां ज्ञात्वा कविं कुर्यात्
महं तिनिरुपातं परं ॥ कविचक्रं प्रवक्ष्ये तं चतुरंगिनाडिकम् ॥
अग्निभागीलि अनलोलिपूर्वेशो उदकोणतः ॥ निर्गमे गीलिअनला
लिमध्या आग्नेदिशि विन्यसेत् ॥ लम्भधिष्ण्यानि चत्वारि मध्यस्थानि
चतुर्दिशि ॥ प्रवेशोऽप्युदक्रादिके विचक्रमिदं भवेत् ॥ कविः शिखी १
पिंगलिका २ कपोत्यकान्प्रवेशये ॥ पुष्करालीवान्तु निपालेऽवले
खी चटकी वकी ॥ जीवपत्तस्थिते चंद्रे गवेषाते विचाकुले ॥ गवे
षं निर्गमं ज्ञात्वा कविपुटं प्रकाशयेत् ॥ कविपुरु पत्रधिष्ण्ये तद
गर्ते त्रिपावकः ॥ तदा भवेन्मार्गगमो मार्गरोधश्च पृष्ठगे ॥ जी
ववारे ऽर्कभे शिरवां समपुटं गजायते ॥ खतावर्के त्रि पिंगला
पायिनो वह्निजं भयम् ॥ पुनर्वसौ भौमदिने कपत्यां पापिनोऽग्रे
तिः ॥ पुष्करालीवायां मंदे वह्निभे क्रियते गणो वेष्ये चंद्रे त्रि
वोहे रवी हयं तस्मात् पलायते ॥ चटक्यां वा ... ते त्रि पापी त
तैस्तेन्यपो मृत्तिः ॥ वक्यां पुष्यभे गुरुदिने पापी बंधनमाप्नुयात् ॥ सदो
तैस्तन्यपोदिति ॥ ... ॥ उदयालो स्वरौ पे षां जन्मस्थः
षाम विनिर्दोषामुहेरवी वर्जयेत्स्वयौ ॥ उदयालो खरौ पे षां ... ॥ क्रूरः प्रवेशभेय
सप्तमो विधुः ॥ तद्दिने तु भवतः सर्वे वर्जनीया कुवौरले ॥ क्रूरः प्रवेशभेय
त्रतद्दिशि स्यात्प्रवेशनं ॥ सौम्यास्वक्रे निर्गमसंशुभसद्दिशि निर्गमः ॥
जन्मस्थः सहमस्रूकः पंचमो नवमोऽपवा ॥ परस्यपरनोपस्यनद्भमंगं
विनिर्दिशेत् ॥ मृत्यवे २४ नःलत्वा प्रपुरस्थस्यं ॥ घातपातदिशं हि
त्वा कविपुटं समाचरेत् ॥ निर्गमस्त्रेस्थिते चंद्रे क्रूरखेटै विहिस्थितेः ॥
निशीथे वैष्ठकानुग्रानृविहन्तुः पौरवासिनः ॥ नीतौः सा धारले क्रूरे
पुरुयोगे त्रिपुष्करे ॥ केचिन्नरेशभात्के चित्स्थानभाच्च क्रमश्चि
रे ॥ इति कविचक्रम् ॥ सर्पभादि दुपपं तं यान्हि भागावशेषि
नम ॥ नरराकं १ भमौ तु २ श्लं १ रलें ० विनिर्दिशेत् ॥ नरेरगद्विगुलगु
क्रिभमोद्गरान्निवर्तते ॥ श्लेसंजायते सिद्धिः संग्रामेऽपि चतुर्विधे ॥ १

रविसोमकुजः सौम्य शनिजीवतमः कविः ॥ आद्यादिदिनभाज्ञी लिन्य
सेक्रूरस्थिते मृतिः ॥ जन्मभेऽकौ विभेमृत्युर्भंगः स्यात्कुजराहुगे ॥
शुभस्थानाश्रिते सिद्धिर्योद्धुर्लारामये कवौ ॥ अथ भैरवगौरीसं
वादे त्रिकोणसंघट्टे ॥ त्रिकोणं नवभिर्दंडरेखाभिर्वेधसंयुतम् ॥
कृत्तिकादिगते देवि चन्द्रः पापग्रहं त्यजेत् ॥ अपसव्ये भवेच्चंद्रः ॥
सव्ये चैव दिवाकरः ॥ एकरेखांगतौ लौ तु लौहं तत्र विनिर्दिशेत् ॥
कृत्तिकादीनि सव्यानि मघादीन्यपि सर्वतः ॥ मैत्रे यादीनि सव्यानि
वसुसक्षाप सव्यतः ॥ सव्यापसव्यमेवं तु गणयेद् ऋक्षमालि ॥ भौमश
गुरुयुक्तेन्दुरथवा राहुसंयुतः ॥ अग्निज्वालाकरिष्यंति लौहपाते
न संशयः ॥ एकनाडीयदाप्तोराव्हकौ केतुमंगलौ ॥ तद्दिने जायते
युद्धं चातुरंगे महाहवे ॥ शन्यकौ बुधचंद्रौ वा जायते दारुणो रणः ॥
कुजराव्होर्यदा दृष्टिश्चंद्ररेखायुतौ यदि ॥ एकनाडीसमायातौ चंद्रमा
धरणीसुतौ ॥ तत्र पश्चाद्गते जीवः पाषाणं जलपातनं ॥ उदयादिग
ताद्दंडा नवघ्नाः ५ नख २० भाजिताः ॥ मुक्त्वा त्यानर्ज संयुक्ताः शेषे ना
क्तालिका ग्रहाः ॥ इति संघट्टचक्रम् ॥ सेनापादौ कुन्तपरानरा
गं तत्पतिः स्मृतः ॥ उदरे खड्गिनः प्रोक्ता हृदये वाहकाहकाः ॥ स्कंधौ
गजाभुजोरथ्याकरांगुल्यो धनुर्धराः ॥ वाद्यवादनकं पृष्ठे मंत्री जिव्हा
द्विजारदाः ॥ देवज्ञो ज्ञीनवोप्याणं श्रवणो हेरवारकाः ॥ पताकाछ
त्रचमरध्वजाः केशकलापकाः ॥ सेनोपकरणं सर्वं रोमावलिरि
ति स्मृतम् ॥ वस्थाने द्वयं शीर्षे देयं १ श्रुतौ २ नेत्रे द्वयं द्वयं ॥ एकं १
घ्राणे २ रसने पायमेकं १ दंते वृसागराः ४ ॥ पृष्ठे २ स्कंधे २ भुजे २ गुल्यो
२ हृदये च २ द्वयंद्वयं ॥ एकैकं २ मुदरे २ गुह्ये १ चत्वारि चरणद्वये = ॥
सर्वोपकरणे शेषं न्यासः सेनास्वरूपकः ॥ यदंगस्याक्रूरखेटास्तदंगो
भियते परैः ॥ सौम्यग्रहाः यदंगस्था तदंगो जयमाप्नुयात् ॥ राहुस्था
ने गतो वाहाऽद्रविने मिरथ्याद्भयं ॥ पदातिभिः कुजस्थाने मंदस्थाने
गजाद्भयम् ॥ चतुरंगः कृतापीडा केतुस्थाने च जायते ॥ यदंगे सक
लाः क्रूरास्तदंगो मृत्युमाप्नुयात् ॥ मिश्रामिश्रफलाः सौम्यमंदा वाय
दिवालगाः ॥ मंदेशीघ्रो घ्रियाणस्य नृपः शाला दिनश्यति ॥ अत्रैव
राहुशिखिनौ राज्ञो बंधनदायकौ ॥ दृशांतिमन्तं भौमस्तरणिभं
गदायकः ॥ नाभेरधस्थिता पापा ऊर्द्धे सौम्या जयावहा ॥ विपरीता
मृत्युकराः सैनिकस्य नृपस्य च ॥ मिश्राभंगदायुद्धे पापयदिव
लान्विताः ॥ विजयो जायते राज्ञः सौम्या यदिबलाधिकाः ॥ ॥ २२

॥ इति सेनाचक्रम् ॥ ॥

योगे स्वकर्मतः पिंडे शरीरान्ते सुहृज्जनात् ॥
राशौ स्वकुलतो जीवे स्वविनाशे हनौ रिपौ ॥ २३ ॥
वर्णे स्वस्वामितो ज्ञेयं मात्रायां स्त्रीजनात्फलम् ॥
एवं ज्ञात्वा वदेद्विद्वान् दिने फलं शुभाशुभम् ॥ २४ ॥
इति यामले दिनफलस्वरचक्रम् ॥ गुह्याद्गुह्य
तरं सारम् अप्रकाश्यं प्रकाशितम् ॥ इदं स्वरोदयज्ञा
नं ज्ञानानां मस्तके स्थितम् ॥ १ ॥ सूक्ष्मात्सूक्ष्मत
रं ज्ञानं सुबोधं सत्यप्रत्ययम् ॥ आश्चर्यं नास्तिके
लोके आधारमास्तिके जने ॥ २ ॥ दुष्टे च दुर्जने
क्रुद्धे असत्ये गुरुतल्पगे ॥ हीनसत्त्वे दुराचारे स्व
रज्ञानं न दीयते ॥ ३ ॥ शान्ते शुद्धे सदाचारे गुरुभ
क्तैकमानसे ॥ दृढचित्ते कृतज्ञे च देय एव स्व
रोदयः ॥ ४ ॥ इति यामले स्वरप्रशंसा ॥
अथान्यत्संप्रवक्ष्यामि शरीरस्थं स्वरोदयम् ॥ हं
सचारस्वरूपेण येन ज्ञानं त्रिकालजम् ॥ १ ॥
कुंडलिनी महाशक्तिर्नाभिस्था हि स्वरूपिणी ॥
ततो दशोर्ध्वगा नाड्यो दशचाधोगतास्ततः ॥ २ ॥

योगेति २३ ॥ २४ ॥ इति दिनफलस्वरचक्रम् ॥ कथितस्वरनिर्णयस्य
सकलाशेषस्योपयोगितामुपदर्शयति ॥ गुह्याद्गुह्येति ॥ १ ॥ सूक्ष्मेति ॥
नास्तिके मिथ्यानादिनो आश्चर्यं विस्मयकारणं ॥ २ ॥ ३ ॥ ४ ॥ इति स्व
रप्रशंसा ॥ अधुना पंचस्वरव्याख्यानानंतरं देहस्थवामदक्षिणस्वर
योरुदयमुनिप्रोक्तस्वरूपयोः हंसचाराख्ययोः श्लोकानां व्याख्यानं यथा
ज्ञानं करोमि ॥ अथान्येति ॥ अथशब्दोऽत्रानंतर्ये ॥ १ ॥ अथानंतरं
पंचस्वरकथनानंतरं हंसचारस्वरूपेण शरीरस्थं स्वरोदयं दक्षिण
वामस्वरोदयं वक्ष्यामि ॥ कुंडलनीति ॥ यथा ॥ सदा उदयति दक्षिणः
स्वरो वामः स्वरो वा तथा व्याख्यास्यामि ॥ शक्तीनां मध्ये महाशक्तिः
देहिनां नाभिस्थाने विद्यते । तस्य नाम कुंडलिनीति । किंरूपा । अ
हिस्वरूपिणी सर्पिणी च कुंडलीभूता विद्यते ॥ सा देहस्थानां नाडी
नां मूलभूता ॥ तथा च ॥ तत इति ततः तस्याः कुंडलिनीभूताया दश
नाड्य ऊर्ध्वगताः दश नाड्योऽधोगताः ॥ २ ॥ द्वे द्वे तिर्यग्गते इति ॥ त
स्या एव कुंडलिन्याः द्वे द्वे नाड्यौ तिर्यग्गते ते ये एवं चतुर्विंश
ति नाड्यः कुंडलिनीशक्तेर्मूलमार्गजाताः ॥ ३ ॥ ताभ्य इति ॥
ताभ्यश्चतुर्विंशतिनाडिकाभ्यः सप्तोत्तराणि शतानि जायंते ॥

ताः शरीरस्य अतिपोषिकाः पुष्टिकारिण्यः यतः अन्नाहारात् अन्नादेः रस
वाहिन्यः यत्र यत्र प्रसृता विस्तृता तत्र तत्र रसमानयंति तत्तन्मार्गग
तारसाः शरीरं पुष्णंति ॥ ४ ॥ प्रधाना दश इति । तासां मध्ये दश नाड्यः
प्रधाना विद्यंते तास्तु दशसंख्यानां वायूनां प्रवाहिकाः ताभ्यो दश
वायवः शरीराद्बहिः प्रभवंति तासां दशनाडीनां नामानि वदामि ॥ ५ ॥
अथ नाडिकानां नामानि ॥ इडा पिंगलेति ॥ सुगमं ॥ ६ ॥ अथ वायू
नां नामानि ॥ प्राणोपानेति ॥ एते दश वायवः इडा नाडी हृदयाद्द
क्षिणनासापुटाभिमुखी तस्यां प्राणो नाम वायुर्वहति पिंगला
नाम नाडी हृदयाद्वामनासापुटाभिमुखी तत्रोदानवायुस्तिष्ठति

हृद्देतिर्यग्गता नाड्यश्चतुर्विंशतिसंख्यया ॥
कुंडलिन्या महाशक्तेः स्थलमार्गीभवंत्यमी ॥ ३ ॥
ताभ्यः सूक्ष्ममुखा नाड्यः शरीरस्यातिपोषिकाः ॥
शतानि सप्त जायंते सप्तोत्तराणि संख्यया ॥ ४ ॥
प्रधाना दश नाड्यस्तु दशवायुप्रवाहिकाः ॥ ना
मानि नाडिकानां च वातानां च वदाम्यहम् ॥ ५ ॥
इडा १ पिंगला २ सुषुम्ना ३ गांधारी ४ हस्तिजि
ह्विका ॥ ५ ॥ पूषा ६ यशा ७ चालंबुषा ८ च कुहूः ९
शंखिनी १० तथा ॥ ६ ॥ प्राणोपानः समान
श्च उदानो व्यान एव च ॥ नागः कूर्मः कृकरश्चैव देव
दत्तो धनंजयः ॥ ७ ॥ प्रकटे वायुसंचारो लक्ष्य
ते देहमध्यतः ॥ इडापिंगलासुषुम्नाभिर्नाडीभिस्ति
सृभिर्बुधैः ॥ ८ ॥ इडा नाडी स्थिता चंद्रः पिंगला भानु

गांधारी नाडी नाभेरधोगता तत्रापानो वायुः जिह्विका नाम नाभि
स्था तत्र समानो वायुः सुषुम्नायां तिष्ठति एवं नागादयः पंच प्र
बाह्याः पंचसु स्थिताः एकोर्ध्वः अन्योर्ध्वः स्थित एव नासापुट
हृदयाद्विपृष्ठ हृदयश्रोत्रपृष्ठहृदयमुखनाभिवायुब्रह्मरंध्रादिमार्गे
भ्यो दश वायवः प्रभवंति अग्रोर्ध्व सनकादियोगिनः प्रमाणं
एषां प्रयोजनाभावात् सुगमार्थाः ॥ ७ ॥ अथ दशनाडीनां मध्ये
तिस्रः स्थिताः ताभ्यो वायवो लक्ष्यंते ता आह प्रकटे वायु
रिति सुगमम् ॥ ८ ॥ इडा नाडी इति अस्यार्थो मे विधेयः ॥
॥ ९ ॥ शशिरूप इति ॥ अत्र वामनासापुटयोः
चंद्रः दक्षिणनासापुटयोर्वायुः संचरति स
शः शशिरूपी चंद्रः यः ससूर्यः सूर्यरूपी शंभुर्महे
शिवशक्तिरुच्यते शंभुः स एव हंससंज्ञः
॥ १० ॥

तस्यलक्षणंवहति॥हकारोनिर्गमइति अत्रश्वासप्रश्वासयोर्लक्षणंदकारेण: श्वयो
जनाभावात्मायाग्रुलानां॥११॥अथविज्ञानाज्ञानहेतुप्रयोजनमाह॥एकैके
ति॥१२॥ अथैतयो:प्रवहतो:पंचकलानां ज्ञानमाह मध्येपृथ्वीति वामे
वादक्षेवानासापुटेवायोर्वहति पूर्णेपृथ्वीनामतत्त्वं नासापुटादधोयो
वहति ओष्ठंस्पृशन्सवायुर्जलसंज्ञ: ऊर्ध्वंवहतिचानल: नासापुटस्यो
र्ध्वभागंस्पृशन्योवायुर्वहति तस्यवायोरनल इतिनाम तिर्यग्वायुप्रवा
हश्चेति दक्षिणस्वरे वामेवा द्वयोर्मध्येस्वोदयेयोवायुस्तिर्यग्वहति त
स्यप्रवाहवायोर्वायुतत्त्वमितिनाम नभोवहतिसंक्रमइति वामेवादक्षि
णेवास्वोदयेवहन् द्वितीयपुटादपिबहिर्नि:सरति द्वितीयपुटेक्रमा
दर्धेतेस्यपुटात्क्रमाद्व्रजति जावत्तावत्कालंस्थायित्वं तिष्ठति उभयो-

वाहिनी॥सुषुम्नाशंभुरूपेणशंभुर्हंसस्वरूपक:॥९॥
शक्तिरूप:स्थितश्चन्द्रो वामनाडीप्रवाहक:॥दक्षनाडीप्र
वाहश्चशिवरूपीदिवाकर:॥१०॥हकारोनिर्गमेप्रोक्त:
सकारेणप्रवेशने॥हकार:शंभुरूपस्यात्सकार:शक्ति
रुच्यते॥११॥एकैकघटिका:पंचक्रमेणैवोदयंतिता:॥
पृथिव्यापस्तथातेजोवायुराकाशमेवच॥१२॥मध्ये
पृथ्वीअधश्चापउर्ध्वेवहतिचानल:॥तिर्यग्वायु:प्रवा
हश्चनभोवहतिसंक्रमे॥१३॥धराद्येकैकतत्त्वस्यएकैक
घटिकोदय:॥अहोरात्रस्यमध्ये[illegible]तेनद्वादशसंमा:॥१४॥
आदौचंद्र:सितेपक्षेभास्करस्तुसितेतरे॥प्रतिपदादितोहा
॥ नित्रीणित्रीणिक्रमोदय:॥२५॥

सकालोग्रेव्याख्यातव्य:॥वामदक्षिणस्वरस्थानग्रहानाह वाम:स्वरआह
विश्चंद्रमुक्रगुरवोवामनाड्यांधरादिते:॥रविभौमयमा:सर्पकथिता:स
र्यनाडिगा:॥वामस्वरेवहतियावत्पृथ्वीतत्त्वंवहतितावद्बुधग्रहस्यो
दय: अप्तत्त्वेवहतिचंद्रस्योदय:॥तेजसिवहतिशुक्रस्योदय:॥वायु
तत्त्वेवहतिगुरोरुदय:॥ एवंदक्षिणवायौवहतिरविभौमयमराहव:॥
पृथिव्यादुदयक्रमेणउदयंति॥ग्रहोदयेअग्रेग्रहफलमादिशेत्॥यथा॥
लग्नवर्तिनिबुधफलंतथातदुदयेपि एवंसर्वग्रहेषुशुभाशुभफलम्॥१३॥
अथपृथिव्यादीनांस्थितिकालमाह॥धराद्येकैकतत्त्वेतिसुगमम्॥१४॥
अथदक्षिणवामयो:शाकग्रवेहनसमयमाह॥आदौचंद्र:सितेपक्षेत्रि
षुशाकरवेहनंसमयपक्षयो: तेनशिपंचदशास्वतिथिषुशाकवामस्य
प्रतिपत्सुप्रागुदयंस्वस्यपक्षयो: तेनतिथिषुचंद्रस्यचेतुर्थ्या
नेयउदया: दौदक्षिणस्यएवंतथाच प्रतिपत्त्रिषुचंद्रस्यचेतुर्थ्या
लिषुभास्वत: सप्तम्यादित्रिषुविधोर्दशम्यादिषुभास्वत: ततलिषु
विधो:शाकस्यादुदय:स्वरेवेरवि॥चिपत्तेअथमुदय: प्रतिपत्प्रभृतिरवे
सैष: पंचपंचघटीमानादेकैकस्यहि योभवेत् आदौचन्द्रस्ततसूर्य:
सितेन्येकृत्स्नतोविधु:एवंक्रमेणस्वरयो:पक्षेद्वादशसंक्रम:सुगम:॥२५॥

॥ नगाज॥
॥ जु० ल्हदी॥
॥ २२ ॥

अथ विपरीतोदयफलमाह ॥ चंद्रोदये यदा सूर्य इति शुक्लपक्षे प्रतिपदादि
षु यदि प्रातर्वेलायां उदयस्तद्दिने हानिः अशुभं किमपि उद्वेगो वा निःकारण
त् ॥ एवं कृष्णपक्षे चंद्रोदयः प्रातः तदापि हानिरुद्वेगोदयः ॥ १६ ॥
अथ वामदक्षिणस्वरयोर्वशीकरणमाह ॥ शशांकं चारयेद्दिनि ॥ वाम
स्वरश्चंद्रो दक्षिणस्वरो रविः ॥ तेन दिनाधिपो रविः रात्रिपतिश्चंद्रः
शशांकं चारयेद्दिनि प्रातरुत्थाय प्रतिपदादिषु त्रिषु त्रिषु आदौ चंद्रः
सितेपक्षे भास्करस्तु सितेतर इति सूर्योदयादारभ्य ग्रहनिरुक्ता नतिथ्यु
दये तिथिर्भ्रंताधिककाले आरब्धा भवति तिथ्युपलक्षणं तेन
शुक्लादौ प्रातः चंद्रोदयः कृष्णे सूर्योदयः ग्रत उक्तं शशांकं चारये
द्रात्रौ दिति अभ्यासात्स्वराभ्यासिभ्यो योगिभ्य उपदेशमादाय आ

चंद्रोदये यदा सूर्यश्चंद्रः सूर्योदये यदा ॥ अशुभं हा
निरुद्वेगस्तद्दिने जायते ध्रुवम् ॥ १६ ॥ शशांकं चारयेद्रा
त्रौ दिवा चार्यो दिवाकरः ॥ इत्यभ्यासरतो नित्यं स योगी
नात्र संशयः ॥ १७ ॥ यात्रादाने विवाहे च वस्त्रालंका
रभूषणे ॥ शुभकर्मणि संधौ च प्रवेशे च शशी शुभः ॥ १८ ॥
विग्रहे द्यूतयुद्धेषु स्नानभोजनमैथुने ॥ व्यवहारे भये
भंगे भानुनाडी प्रशस्यते ॥ १९ ॥ होमः शांतिकं चै
व दिव्योषधिरसायनम् ॥ विद्यारंभः स्थिरं कार्यं कर्त
व्यं च निशाकरे ॥ २० ॥ दूरयुद्धे जयी चंद्रः समासन्ने दि
वाकरः ॥ वहन्नाडीपदे चैव कृते यात्रादि सिद्धिदा ॥ २१ ॥

भ्यासं कुर्वन् रात्रौ वामस्वरमेव यथा वहति तथाभ्यासं कुर्यात् ॥
दिवा सकले दक्षिणस्वरमेव वहन् तिष्ठति एवमभ्यासात्
योगी भवति ॥ १७ ॥ अथ वामदक्षिणयोः स्वरयोः कार्ये एकैक
प्रधानतामाह ॥ यात्रादाने इति ॥ एतानि वामस्वरे वहति कुर्या
त् इत्यभिप्रायः ॥ १८ ॥ विग्रहेति ॥ भय इति भयोपस्थिते यदि
प्राणो दक्षिणस्वरे वहति तदाभयं भवति इत्यर्थः एवं भंगप्राप्ते
पि ॥ १९ ॥ होमश्चेति सुगमम् ॥ २० ॥ अन्यदाह ॥ दूरयुद्धेति दूर
युद्धे भाविवक्रकाले युद्धे सति चंद्रो जयी कोर्थः वामस्वरो जयी
दूरयुद्ध इत्युपलक्षणं दूरयुद्धे ज्ञानविषये जया यदा वामस्वर
बलेन प्रयाणं कुर्यादित्यर्थः समासन्ने दिवाकर इति तथा निकटस्थे
युद्धे सूर्यवाहेन युद्धाय प्रयाणं कुर्यात् परं तु वहन्नाडीपदेन यः
एव स्वरो वहति वामो वा दक्षिणो वा वामे वहति वामपादं चा
लयेत् दक्षिणे वहति दक्षिणं चालयेत् ॥ ॥ २२ ॥

तत्र पादचलने विशेषमाह सूर्येवहतीति सुगमं ॥ २२ ॥ अथान्यत् ॥ पृथ्वीजलेति
अपरप्रश्ने शुभप्रश्ने शुभाशुभम् वामे स्वरे कार्यारंभप्रश्ने पृथ्वीतत्त्वे वहति
जलतत्त्वे वा तदा वामस्वरवेलायां वामस्वरे कार्यस्य शुभं वदेत् तेजसि
तत्त्वे मिश्रफलं व्योममारुतयोः प्रवहतोः हानिः कार्यहानिः मृत्युरिति कष्टं वा
च्यं प्रश्नः दक्षिणस्वरे वहति शत्रुः प्रश्नफलं ब्रूयात् ॥ २३ ॥ अथ शत्रुर्विषय
रूपमाह ॥ आपः श्वेत इति शत्रुः प्रश्नविषये वस्तुनि पृथिव्यादिवर्णं ब्रूयात् ॥ २४ ॥
अथ योधयोः स्वरबलात् जयाजयमाह । योधद्वयेति यथा केनापि प्रश्नः कृ
तो देवदत्तयज्ञदत्तयोर्मध्ये को जेता भविष्यतीति प्रश्ने पूर्णस्वरे सति प्रथमो
जयी यस्य प्रथमं नामग्रहणं स जयी वाच्यः अर्थादितरः पराजयी अथ रि
क्तस्वे प्रष्टरि योधयोर्मध्ये यस्य पश्चान्नामग्रहणं कृतं स जयी वाच्य इत्यर्थः ॥

सूर्ये वहति चंद्रे वा पूर्णपादं प्रचालयेत् ॥ चंद्रे समपदे योगात्सूर्ये
समपदेः क्रमात् ॥ २२ ॥ पृथ्वीजले शुभे तत्त्वे तेजो मिश्रफलोदयं ॥
हानिमृत्युकरौ पुंसामशुभौ हि व्योममारुतौ ॥ २३ ॥ आपः श्वेतं क्षि
तिः पीता रक्तवर्णं हुताशनः ॥ मारुतो नीलवर्णः स्यादाका
शो धूम्रवर्णकः ॥ २४ ॥ योधद्वयकृते प्रश्ने पूर्णे च प्रथमो ज
यी ॥ रिक्ते सस्य द्वितीयस्तु जयी भवति नान्यथा ॥ २५ ॥ यु
द्धकाले यदा चंद्रः स्थायी जयति निश्चितम् ॥ यदा सूर्य प्र
वाहस्तु यायी च विजयी तथा ॥ २६ ॥ पार्थिवे समरं तत्पुन
संधिर्भवति वारुणे ॥ विजयो वह्नितत्त्वे तु नभो भंगो मृ
तिस्तु खे ॥ २७ ॥ पूर्णनाडीगतं पृष्ठे शून्यमंगं तदग्रतः ॥
शून्यस्थाने कृतः शत्रुर्म्रियते नात्र संशयः ॥ २८ ॥

पूर्णे रिक्ते नामग्रहे कथयिष्यति ॥ २५ ॥ अथ वामदक्षिणवहतोः स्थायियायिजयबल
माह ॥ युद्धकाले यदेति ॥ युद्धकाले यदा चंद्रो वामः स्यात्तदा स्थायिबलं द
क्षिणस्वरप्रश्ने तदा यायिबलम् स्वरप्रकरणे व्याख्यातम् ॥ २६ ॥ अथ युद्धका
ले प्रश्नकाले वा पृथिव्यादितत्त्वमाह ॥ पार्थिवेति ॥ खे आकाशतत्त्वे मृतिरि
ति शेषं सुगमं ॥ २७ ॥ अथ युद्धकाले पूर्णहीन वामदक्षिणयोः स्वरयोः क
र्तव्यमाह ॥ पूर्णनाडीगतमिति ॥ स्थायी वा यायी वा विजयकांक्षी युद्धे
युद्धकाले घातकाले पूर्णस्वरं पृष्ठे कुर्यात् अन्यमंगं पुरतः तदंगं सकलं च
वामं वा दक्षिणं वा शत्रुं सन्मुखे दद्यात् एवं शून्यस्थानकृतः शत्रुर्म्रियते
घातेनेत्यर्थः ॥ २८ ॥ अथ वामस्वरयोर्वशाद्दिग्बलमाह ॥ पूर्वोत्तरदिशा
इति । चंद्रे वहति वामस्वरे वहति स्थायी योधः पूर्वदिशि उत्तरदिशि वा स्थितो
जयात् ॥ यायी दक्षिणपश्चिमदिशि जेता जयाजयस्थिरो भवात् ॥ २९ ॥

अथ वामदक्षिणे वहति षड्बलमाह ॥ वामनाड्युदयइति ॥ युद्धकाले वा
मस्वरे वहति चंद्रो वाम सन्मुखः कार्यः ॥ दक्षिणः स्वरे वहति सं
ग्रामकाले सूर्ये पृष्ठ दक्षिण संक्रमेत् ॥ ३० ॥

॥न॰ज॰॥
ज॰टी॰
॥२३॥

23

पूर्वोत्तरदिशो श्चंद्रे भानो पश्चिम[illegible] याम्ययोः॥ स्थित
स्तत्र जयी युद्धे स्थायी यायी क्रमेण च ॥२९॥ वामनाड्यु
दये चंद्रः कर्तव्यो वामसंमुखः॥ सूर्यवाहे तथा सूर्यः पृष्ठ
दक्षिणगो जयी ॥३०॥ शयने वा प्रसंगे वा युवत्यालिंगने
पि वा॥ यः सूर्येण पिबेच्चंद्रं स भवेन्मकरध्वजः॥३१॥ जी
वेन गृह्यते जीवो जीवो जीवस्य दीयते॥ जीवस्थानग
तो जीवो बालो जीवांतकारकः॥३२॥ रात्र्यंते याम वे
लायां प्रसुप्ते कामिनीजने॥ ब्रह्मजीवं पिबेद्यस्तु बाला
प्राणहरो नरः॥३३॥ अर्केन्दुयोगे पुन्नार्या स्तस्मिन्काले
रते सति॥ तत्काले दीयते चन्द्रो मोहमायाति कामिनी॥३४॥
चन्द्रचारी विषं हन्ति सूर्ये बालां वशं नयेत्॥ सुषुम्ना
यां भवेन्मोक्ष एको देवस्त्रिधा स्थितः॥३५॥ भुक्तमात्रे
च मन्दाग्नौ स्त्रीणां वश्यादिकर्मणि॥ शयनं सूर्यवाहेन
कर्तव्यं सर्वदा बुधैः॥३६॥ आर्ते शोके विषार्ते च ज्व
रिते मूर्छिते पि वा॥ सज्जनस्यापि बोधार्थं चन्द्रचारं
प्रवाहयेत्॥३७॥ ऊर्ध्ववामाग्रतो दूतो ज्ञेयो वाम

॥अथान्यत्॥ शयनेति॥ यः सूर्येण पिबेच्चंद्रमिति शशांकं चारयेद्रात्रौ
दिवा चार्यो दिवाकर इति यदुक्तं॥ अत्र चंद्रोदयो रात्रौ भवति तं वा
मस्वरं दक्षिणेन पिबति कोर्थः दक्षिणमेव दिवानिशं चारयेत् अय
मस्माकमर्थः दिवा दक्षिणस्वरस्योदयो भवति तेन दिवा वामस्वरे ऽ
भ्यासं कुर्यात् मकरध्वज इव भवति सुन्दर इत्यर्थः वा शब्द उभय
त्र समुच्चयार्थः शयनप्रसंगे युवती यदालिंगति तदा यदि वामो वहति
तदा तं वामं दक्षिणस्वरेण पिबेत् स्वरेणैव रतो भूयादित्यर्थः॥३१॥
जीवेनेति जीवेन प्राणेन जीवः प्राणो गृह्यते कोर्थः दक्षिणस्वरे वह
ति यदि वामो भवितुमुद्यतो भवति तदा दक्षिणेनैव वामं पिबेत् वामस्व
रोदये दक्षिणमेव स्थिरं कुर्यात् एवं वामेन दक्षिणं पिबेत् एवं कृते जीवे
न गृह्यते जीवो व्याख्यानं एवं कृते वा स्वरस्थानगतो दक्षिणः दक्षिण
स्थानगतो वामः तत्कृते कालाज्जीवांतकारको यस्मात् बालो सुषुम्ना
मृत्युलक्ष्यांतकारकः कोर्थो मृत्युं जयतीत्यर्थः वा पूर्वकृते वा पुर्धार
णादायुर्वर्धते अमुमेवार्थमग्रे कुलयति॥३२॥ रात्र्यंतेति रात्रेरवसा
ने याम निद्रां विहाय ब्रह्मवेत्ता योगाभ्यासं कुर्यादिति गुरुपरंपरा तद
स्वराभ्यासं कुर्वन्नजपेत् तत्र वेलायां सुषुम्नायां वेलायां मृत्योर्जीवह
रो नरो भवति तथा च योगशास्त्रे शिवआलिंग्यतेश्यामालक्षणयस्मिन्काले म
ति तत्काले दीयते चंद्रो मोहमायाति कामिनी॥३३॥३४॥ चंद्रचारी
ति सुगमम्॥३५॥ अथ दक्षिणस्वरे यत्कर्तव्यं तदाह॥ भुक्तमा
त्रेति ॥३६॥ आर्तेशोकेति॥ भुक्तमात्रे त्याद्युक्तया

वेषु दक्षिणस्वरे वहति तानि तानि कुर्वीत एवं आंत इत्यादि कर्माणि चंद्रवा
ह प्रवाहयेत् ॥ ३७ ॥ अथ वामदक्षिणस्वरयोः प्रयोजनमप्यष्टमे वेत्स्य एवा
ह ॥ ऊर्ध्वं वामाग्रतः इति । अथ वामदक्षिणस्वराभ्यासी ज्योतिर्विद् दूतं प्रष्टारं लक्ष
येत् असौ पृष्टो वामस्वरानुगतो वा इति वितर्कयेत् तत्र निर्णीतार्थमाह यऊर्ध्व
स्थो भवति दूतो यत्र कुत्रचित् आत्मनः सकाशात् उच्चपीठादिप्रदेशस्थः स वाम
गतः स्थाप्यः वामस्थितः वामगत एव अग्रतः पृष्ठे तिष्ठति तदापि वामभागगत
एव बोद्धव्यः तथा तेनैव प्रकारेण पृष्ठे पश्चात् स्थितः दक्षिणे च स्थितः अध
स्तात् स्थितः आत्मनः सकाशात् नीचस्थ आत्मानं पृच्छति तत् ऊर्ध्वस्य बुध्वा
एवं पृष्ठदक्षिणाधःस्थं दूतं दक्षिणगतं ज्ञापयेत् एवं प्रश्नकाले पृष्ठदक्षिणगते
उच्चस्थो वामगतः नीचस्थो वामाग्रतोपि दक्षिणः ॥ ३८ ॥ अस्यार्थः प्रश्नो नरेण
वपूलयति सूर्ये च विषमान्वर्णान् समवर्णान्तु निशाकरे वा हस्तो भावने दूतः
तदा लाभो न्यथा नहि ॥ पूर्णनाडीगतो दूतो यत्पृच्छति शुभाशुभं इति । अथ पद्या

पृष्ठे स्थितः ॥ पृष्ठे दूते न वाधस्था सूर्यवाहगतो
मतः ॥ ३८ ॥ पूर्णनाडीस्थितो दूतो यत्पृच्छति शु
भाशुभम् ॥ तत्सर्वं सिद्धिमायाति शून्ये शून्यं न
संशयः ॥ ३९ ॥

ख्या सूर्ये दक्षिणः स्वरे वहति सति दक्षिणलग्नगतो दूतोभिलखित प्रश्नेवि
षमान्वर्णान् वदति एकत्रपंचादीन् तदा प्रष्टुर्नोक्ति तेष्र्णं स्यादिति वदेत्
एवं निशाकरे वामस्वरे वहति समवर्णान् द्विचतुःषष्ठाष्टादीन् स्वाभिलि
खिते प्रश्ने वदति तदा व्यभिलखितं भविष्यतीति वदेत् अन्यथा नहि
सूर्यस्वरे समवर्णान् वामे विषमान् इति अन्यथापि विपरीतं वदेत् पूर्णना
डीगत इति अस्यार्थोपि स एव शुभं कल्याणादि अशुभं संग्रामादि द्वयमपि
पूर्णनाडीगतस्य शुभं भवति शून्य इति ऊर्ध्ववामाग्रतो दूत इत्युक्तलक्षणे
न शून्यगतः सन्पृच्छति तदा शुभाशुभमपि दृष्टं तन्नष्टं भवति न सिद्धिमा
याति अत्र न संशयः कार्य इत्यर्थः ॥ ३९ ॥ अथ शुभाशुभादीनां लाभालाभ
ज्ञानमाह ॥ पृथिव्यादित्रितत्त्वेनेति अथ प्रष्टुः प्रश्नकाले वामदक्षिणः पूर्ण
गतस्य लाभालाभ जयपराजयादि प्रश्ने यदि पृथ्वीतत्त्व प्रश्नकाले भवति
अपत्त्वं वा तेजो वा स्यात् तदा शुभाशुभं आप्नोति कालं वदेत् सकः काल इत्याह
दिमामाद्वैकफलं पृथ्वीतत्त्वे वहति दिवसेन फलं भविष्यति आपतत्त्वे व
हति मासेन फलं तेजसि तत्त्वे अब्देन फलं परं तु तत्फलं शुभाशुभं किं जया
जय लाभालाभादि सर्वं पृथाकेनापि प्रश्नः कृतः यथा राजतो जीवनं कदा प्रा
प्तव्यं तदा पूर्णगतस्य दूतस्य पृथ्वीतत्त्वे वहति दिनैकेन प्राप्तव्यं तथा जीव

॥न॰॥ज॰॥
॥ज॰॥टी॥
॥२४॥

24

नमिति वदेत् अयमेव शोभनार्थः तथा दुष्टं व्योममारुतवह्निभिः स एव
प्रष्टा यदि शून्यगतः सन् पृच्छति वामदक्षिणयोरेकतमे वहति व्योममा
रुतवह्नीनामेकतमे च तदा दुष्टं फलं वदेत् जीवनं न प्राप्स्यामित्येवं
दुष्टमिति अथ पूर्णः स्वरे वहति पूर्णगतस्य प्रष्टुः व्योममारुतवह्निभिः
दुष्टं वक्तव्यं नो वेति कल्पे विरोधात् स एव प्रष्टा यदि शून्यग इति व्या
ख्यातं कवेरभिप्रायोऽयमेव व्योमतत्त्वे वहति दिनैकेन फलम्

पृथिव्यादित्रितत्त्वेन दिनैर्मासाब्दकैः फलम् ॥
शोभनं च तथा दुष्टं व्योममारुतवह्निभिः ॥४०॥

वायुतत्त्वे मासेन वह्नितत्त्वे वर्षेण फलं तत्र कस्यापि प्रष्टुरभिलषि
तं मम शत्रुः कदा मृतो भविष्यति तत्र पूर्णगतस्य प्रष्टुः पृथ्वीतत्त्वे
दिनैकेन मृतो भविष्यति। अप्तत्त्वे मासेन॥ तेजसि वर्षेण। पूर्ण
गतस्य इदमपि शोभनं शून्यगतस्य प्रष्टुः शत्रुर्मृतो भविष्यति शून्ये
इदमपि शोभनं अथान्यदपि विरुद्धं पूर्णः स्वरे पूर्णफलं शून्यस्वरे
शून्यं पूर्णे पृथिव्यादित्रितत्त्वेन शुभं फलम् व्योममारुतवह्निभिः
अशुभं फलं तत्र पूर्णे व्योममारुतवह्नितत्त्वानि भवंति तदा शुभाशु
भे मध्यमं फलं लाभे लोकलाभः अशुभे पूर्णे पूर्णगतस्य हृतस्य
शुभप्रश्ने पृथिव्यादित्रितत्त्वे शुभं पूर्णम् व्योममारुतादित्रितत्त्वे
पूर्णगतस्य शुभप्रश्ने मध्यमं फलं एवं शून्यगतस्य प्रष्टुः पृथिव्यादि
तत्त्वैः पंचभिः पूर्णं मध्यं कल्पयेत्॥ ननु पंच तत्त्वानि वह्नितत्त्वस्य
शुभेऽशुभे च प्रधानता तत्र का गतिरित्याकांक्षायामाख्यायते। एक
घटीपर्यंतं वह्नितत्त्वस्य समयः तेन प्राग्घट्या वह्नितत्त्वे शु
भं वदेत् उत्तरार्द्धघट्या दुष्टं वदेदिति इदमपि स्वराभ्यासगम्यं ॥४०॥

श्वासप्रवेशकाले तु दूतो वांछति जल्पितुम् ॥
तत्सर्वं सिद्धिमायाति निर्गमे नास्ति सुंदरम् ॥४१॥

अथ वामदक्षिणस्वरवशादेव अन्यमपि प्रश्नमाह॥ श्वासप्रवेश
काले त्विति॥ अत्र प्रश्ने वक्तुरेव स्वायत्तता स्वराभ्यासी त्वरमना
वामदक्षिणस्वरप्रवेशकाले दूतस्य प्रष्टुर्वांछितं फलं वदेत्॥ इद
मवश्यं भविष्यतीत्यर्थः॥ निर्गमे वामदक्षिणस्वरयोर्निर्गमे प्र
ष्टुर्वांछितस्य सुन्दरं नास्ति॥ इदं तव कार्यं न भविष्यतीत्यर्थः॥
अत्रापि भावाभावयोः कालं पृथिव्यादितत्त्वेनैव वदेत् ॥४२॥ ॥

॥४२॥४३॥ अथान्यदाह॥ आदौ शून्यगतेति आदौ शून्यस्थानगतः पृच्छति पश्चा
त्पूर्णः स्वरस्थाने उपविशति तदा सर्वार्थसिद्धिः स्यात् जीवितमरण लाभालाभज
यपराजयादिप्रश्ने सिद्धिरेव स्वस्य जीवनं परस्य मरणे स्वस्य लाभः परस्य नैलाभः
स्वजयः परस्य पराजयः इत्यादि सर्वप्रश्नसिद्धिर्ज्ञेया वामे वा मे ऽपीति आदौ पूर्णग
तः प्रश्नं यदि पृच्छति पश्चाच्छून्यस्थानगतः उपविशति तदा वामं वदेत् जीविते मर
णं मरणे जीवितं लाभे ऽलाभं जये पराजय इति वामप्रश्नार्थः॥४४॥ अथ गर्भ

व्यवहारखलौ वादी द्विषद्वाप्यवंचकाः॥ कुपितः स्वामिचौरा
द्याः पूर्णस्थाः स्युर्भयंकराः॥४२॥ सूर्ये चेद्विषमान्चले नु सम
वर्णे निशाकरे॥ वाहस्थो भाषते दूतस्तदा लाभो नहि॥४३॥ मो
आदौ शून्यगतः पृच्छेत्पश्चात्पूर्णे विशेद्यदि॥ तदा सर्वार्थसि
द्धिः स्यादिति जानीहि निश्चितम्॥४४॥ गर्भप्रश्ने यदा दूतः पूर्णे
पुत्रः प्रजायते॥ शून्ये कन्या युगे युग्मं गर्भपातश्च संक्रमे॥४५॥

अथ गर्भप्रश्ने स्वरबलमाह॥ गर्भप्रश्नेति। वामे दक्षिणे पूर्णे वहति सति उद्धेवा
माशतो दूत इत्यादि लक्षणेन पूर्णागतः सन्पृच्छति अस्मिन्गर्भे पुत्रः पुत्री वा
भविष्यतीति तदा पूर्णे सति अस्मिन्गर्भे पुत्रो भविष्यति शून्यगतश्चेत्पृच्छति
तदास्मिन्गर्भे कन्या भविष्यतीति वदेत् युगे युग्ममिति आदौ पूर्णगतेन प्रश्नः कृ
तः पश्चाच्छून्यगतो भवति तदा युगे युग्मं वदेत् एकः कन्या एकः पुत्रः पश्चात्पुत्री =
आदौ शून्यगतः पश्चात्पूर्णगतो भवति तदापि युग्मं आदौ कन्या पश्चात्पुत्रः इदं
वक्तुः स्वराभ्यासिनः सामर्थ्यं न तु पठनमात्रेण गम्योऽर्थः गर्भपातश्च संक्रमे
वामाद्वा दक्षिणे वा पूर्णे वहन् पश्चादन्यपुटाति क्रमति इति संक्रमणकालं
विज्ञाय गर्भप्रश्ने जातकस्य मातुर्मरणं वदेत् गर्भपातो वा॥४५॥ गा

आयाति वारुणे पान्थः स्वगेहे वाप्तिसुखं दितौ॥ प्रयाति प
वने ऽन्यत्रस्थानं इत्यनले वदेत्॥४६॥ उदये चन्द्रमा
र्गेण सूर्येणास्तमनं यदि॥ तदातिगुणसंघातं विप
रीते च विपन्नता॥४७॥

अथान्यद्गमागमप्रश्ने आयातीति आयाति दूरगतस्यागमनप्रश्ने गमनतत्त्व
स्य पूर्णशून्यविचारेण शुभाशुभं ज्ञात्वा पश्चादागमनं वा निवर्तनं वा व
देत् यदि इडा दक्षिणे वारुणतत्त्वं वहति तदा मासेन पान्थ आगमिष्यतीति त
त्रैवाप्तिसुखं दितौ पृथ्वीतत्त्वे वहति तत्रैव सुखमास्ते इति वदेत्
वायौ तत्त्वे वहति पान्थोऽन्यत्र गत इति तस्मादिति वाच्यः अनले तत्त्वे वहति पा
न्थः खलु इति वाच्यः आकाशे पूर्णशून्यलक्षणं शुभाशुभं माधवे वा शकुनादि
ज्ञात्वा मरणं वदेत्॥४६॥ अथान्यद्वामदक्षिणयोः फलमाह॥ उदये चं
द्रमार्गेणेति वामे स्वरे वहति यद्युदयः सूर्येणेति शेषः सूर्यस्वरे वहति
अस्तमयः तदा गुणानां संघातो जायते विपरीते च विपन्नता सूर्ये वहति
सूर्योदयः चंद्रे वहति सूर्यास्तमनं तदा वहति विघ्नानि भवंति अथ वाम
र्गेण वोदयास्तमने भवतस्तदापि बहुविपन्नता अथ वामस्वरेणैव सूर्या
स्तमयोदयौ तस्तदापि बहुविपन्नता॥४७॥

॥ न॰ज॰
ज॰ टी॥

॥२५॥

25

अथान्यदाह पक्षेति वामदक्षिणस्वरवशात् उक्तशुभे पक्षे तो यद्य
शुभपक्षे ता भवति उदयं चंद्रमार्गेण सूर्येणास्तमनं यदि तु शुभप
क्षमतिक्रम्य विपरीतपक्षमाश्रित्य यद्युदयास्तमयौ पक्षमतिक्रम
णे तदा व्याधिः स्यात् पक्षद्वयमतिक्रम्येष्टनाशनं पक्षत्रयमतिक्रम्य
मरणं ॥४८॥ अथ पृथिव्यादितत्त्वानां ज्ञानमाह ॥ वामे वा दक्षिणे वापीति
पृथ्वीतत्त्वं अष्टांगुलदीर्घं वहति तत्र कर्तव्यता स्वराभ्यासी षोडशांगुलं
शंकुं हस्ते कृत्वा स्वराभ्यासं कुर्यात् वामे वा दक्षिणे वा वहति तत्र नासा
पुटसंलग्नं शंकुं कृत्वा परीक्षेत किं तत्त्वं वहति अष्टांगुलसीमामात्रं य
दि वायुः संचरति तदा पृथ्वीतत्त्वं एवमपरेषां विचारात् ज्ञानात्त
त्त्वं वदेत् ॥४९॥ अथ पुनः प्रश्ने पुरुषिमनो विषयेषु तत्त्वज्ञो वर्णज्ञा

पक्षातिक्रमाद्व्याधिर्द्विपक्षादिष्टनाशनम् ॥
पक्षत्रयमतिक्रम्य जायते मरणं ध्रुवम् ॥४८॥
वामे वा दक्षिणे वापि धराष्टांगुलदीर्घिका ॥
षोडशांगुलमापः स्युस्तेजश्चचतुरंगुलम् ॥४६॥
द्व्यंगुलदीर्घः स्याद्वायुर्व्योमांगुलेन हि ॥४९॥
पृथ्वी पीता सितं वारि रक्तवर्णो धनंजयः ॥ मारु॥
तो नीलजीमूतमाकाशो वर्णपंचकम् ॥५०॥ पीत
वर्णं चतुष्कोणं तन्मध्ये पृथ्वीपुरम् ॥ वेमध्यं षड्
दलाकारं श्वेतं वारुणमंडलम् ॥५१॥

नार्थं पृथिव्यादीनां वर्णमाह ॥ पृथ्वी पीतेति प्रश्ने विषयं गते पृथिव्या
दिवर्णेन वर्णं वदेत् सुगमं ॥५०॥ अथाचार्यः पंचतत्त्वानां भेदनामा
न्याह ॥ पीतवर्णं चतुष्कोणमिति पंचतत्त्वस्वरूपकथने दाऽऽगमेऽप्य
क्ताः परलवर्हेवर्णे मंत्रबीजमुक्तं अत्र पार्थिवादिपंचतत्त्वरूपेण
पूजेति पुष्प्योक्तिलेपत्रयत्रेति तत्र तत्र स्वरूपे प्रश्नोत्तरं दद्यात् ॥
अत्र प्रश्ने चिंतितादिप्रश्ने पृथ्वीतत्त्वेन पीतवर्णं चतुष्कोणं वस्तु व
देत् ॥ जलतत्त्वेन षट्कोणं श्वेतं वस्तु वदेत् । रक्तं भं त्रिकोणं वह्नित
त्त्वेन । अष्टकोणं हरितं वायुतत्त्वेन वदेत् । धूम्रं भं वर्तुलं व्योमत
त्त्वेन वदेत् ॥ अन्यदपि यत्र यादृशी पुरुषे घटते स्फुरति तत्र स्वबुद्ध्या
प्रश्नोत्तरं दद्यात् ॥ अन्यच्च योगशास्त्रे वामदक्षिणचंद्रसूर्यस्वरयो
र्भेदेन शरीरमुक्तं ॥ सर्वे वामेव जंतूनां तिष्ठति चंद्रमाः ॥ अधो
भागे रविः गोत्रकोष्ठकाले विवर्जयेत् ॥ योनिः स्त्रीलक्षणं चंद्रेण
रागस्तु सूर्य उच्यते उभौ तौ सृष्टिसंहारौ जंतूनां नात्र संशयः ॥ सुगमो ना
त्यंतिकं प्रयोजनिको ॥५२॥

रेफयुक्तं त्रिकोणं च रक्ताभं वह्निमंडलम् ॥ अष्टपत्रं च
मध्यस्थं हरितं वायुमंडलम् ॥ ५२ ॥ हमध्ये वर्तुलाकारं
रंध्रस्थाभं व्योममंडलं ॥ पंचैतत्वे सुमेदो पंकविंतः
शर्वं स्मरिमि ॥ ५३ ॥ मारणं मोहनं स्तंभं विद्वेषोच्चाटनं
वशं प्रेरणं कर्षणं क्षोभं भानुनाड्युदये कुरु ॥ ५४ ॥
शांतिकं पौष्टिकं क्षेमं दिव्यौषधिरसायनम् ॥ योगा
भ्यासादिकर्माणि कर्तव्यानि निशाकरे ॥ ५५ ॥ चंद्र
सूर्यस्वराभ्यासं ये कुर्वंति सदा नराः ॥ अतीतानागत
तं ज्ञानं तेषां हस्तगतं सदा ॥ ५६ ॥ इति पा० ब्रह्म
स्वरोदय प्र० इति श्री ब्रह्मयामलीय स्वरोद
ये हंसचारो नाम द्वितीयोध्यायः ॥ २ ॥ ॥
भेदाये स्वरपंचके निगदितानैः सर्गिकाः कालजाः ॥
तेषां बालकुमारयौवनजरानेधन्यवस्था स्वपा ॥
तान् जानंति गुरुपदेशविधिना भेदप्रभेदं स्वपेते ॥
जानंति फलं शुभाशुभमयं कालत्रये निश्चितम् ॥ १ ॥

॥ इदं प्रथमं मंगलम् ॥ २ ॥

॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ इति पाठक श्री हरिवंशात्म
ज महादेव विरचितायां नरपतिजयचर्याटीकायां जयलक्ष्म्यां हं
सचाराध्यायो द्वितीयः ॥ २ ॥ भेदाये स्वरपंचकेति ॥ १ ॥

॥ शुभम् ॥ ॥ इति प्रथमं मंगं समाप्तम् ॥ ॥ शुभम् ॥

॥न॥ज॥
॥ज० टी॥
॥२६॥

२८

अथातः संप्रवक्ष्यामीति ॥ अथातोऽनन्तरमर्थे । हंसचारानन्तरं सर्वतोभ
द्रनाम चक्रं प्रवक्ष्यामि । किं विशिष्टं त्रैलोक्यदीपकम् दीपवद्दीपकं त्रैलो
क्यं दीपयति प्रकाशयति घटपटादिवत् त्रैलोक्यदीपकं विख्यातं लोकप्र
सिद्धं तेन च दीपदेशव्यापि सद्यः प्रत्ययकारकं विचार्यमाणं शुभाशुभफलप्रती
तिकारकं ॥ १ ॥ अथ चक्रन्यासमाह ॥ ऊर्ध्वगादशविन्यस्येति सुगमम् ॥ २ ॥
अकारादीति चक्रं प्राङ्मुखोपविश्य लिखेत् तेनैशान्ये तत्र स्वरा आकारादिभिः
पूर्णताः स्वरा लेख्याः कुत्र लेख्याः कोष्ठेषु ईशादौ विदिशि क्रमात् तत्र क्रमः अकार
ईशानकोणे आकारमाग्नेये इकारं नैरृत्ये ईकारो वायव्ये पुनः उकार ईशानकोणे
अकारस्याधः ऊकारस्याग्नेये आकारस्याधः एवं षोडशस्वरान् ईशानादिचतु

अथातः संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपकम् ॥ विख्यातं स
र्वतोभद्रं सद्यः प्रत्ययकारकम् ॥ १ ॥ ऊर्ध्वगा दशविन्यस्य
तिर्यग्रेखास्तथा दश ॥ एकाशीतिपदं चक्रं जायते नात्र सं
शयः ॥ २ ॥ अकारादिस्वराः कोष्ठे ईशादौ विदिशि क्रमात् ॥
सृष्टिमार्गेण दातव्याः षोडशैवं चतुर्भ्रमं ॥ ३ ॥ कृत्तिकादीनि
धिष्ण्यानि पूर्वाशादि लिखेत्क्रमात् ॥ सप्त सप्त क्रमादेतान्य
ष्टाविंशतिसंख्यया ॥ ४ ॥ अवकहडादिषु प्राच्यां मटपर
ताश्च दक्षिणे ॥ नयभजखाश्च वारुण्यां गसदचलास्तथोत्तरे ॥ ५ ॥
त्रयस्त्रयो वृषाद्याश्च पूर्वाशादिषु धिष्ण्यः क्रमात् ॥ राशयो द्वादशै
वं तु वृषाद्याः सृष्टिमार्गतः ॥ ६ ॥ ॥ ११ ॥

कोणेष्वेव विन्यसेत् एवं लिख्यमानेषु स्वरेषु सृष्टिमार्गेण चतुर्भ्रमं चतुरावृ
त्या स्वरलिखनं स्यात् ॥ ३ ॥ स्वरलिखनानन्तरं नक्षत्रलिखनमाह । कृत्तिकादीनि
ति स्वरलिखनकोष्ठकान्तरेषु तु दिक्षु सप्त सप्त लिखेत् यथा तत्र पूर्वस्यां प्रथम
पंक्तौ सप्त ७ तदधः पंक्त्यां तु न तदधो यः कोष्ठस्तदधः एकं कोष्ठकं एवं चतुर्दि
क्षु कोष्ठका उक्ता दातव्याः ॥ तत्र प्राक् सप्त कृत्तिकादीनि लिखेत् । मघादि सप्त
दक्षिणस्यां लिखेत् । मैत्रादि सप्त ७ पश्चिमायां लिखेत् ॥ धनिष्ठादि सप्त उत्तरस्यां
लिखेत् ॥ ४ ॥ अथ नक्षत्राधः कोष्ठलिखनमाह ॥ अवकहडेति अवकहडाः
पंच वर्णाः नक्षत्राधः पंच कोष्ठकेषु प्राच्यां लिखेत् । मटपरताः पंच वर्णाः दक्षिण
नक्षत्राधः पंचकोष्ठे लिखेत् ॥ नयभजखाश्च वर्णान् पश्चिमनक्षत्राधः पंच को
ष्ठे लिखेत् । गसदचलान् पंच वर्णान् उत्तरनक्षत्राधः कोष्ठे लिखेत् ॥ ५ ॥ पूर्वा
शादितृतीयपंक्तौ त्रिकोष्ठे लिखनीयमाह ॥ त्रयस्त्रयो वृषाद्येति । वृषादित्रीन्
राशीन् पूर्वादिकोष्ठे लिखेत् । सिंहादित्रीन् दक्षिणकोष्ठे लिखेत् । वृश्चिका
दित्रीन् पश्चिमायां लिखेत् ॥ कुम्भादित्रीन् उत्तरस्यां लिखेत् ॥ ६ ॥
अथ शेषेषु लिखनीयमाह ॥ शेषेष्विति ॥ शेषेषु चतुर्दिक्षु उक्तेभ्यः एकैके चतुः
कोष्ठेषु सैकमध्यकोष्ठेषु गतियन्नन्दादितिथिपंचकं क्रमेण लिखेत् ॥

प्रतिपत्पूर्वकोष्ठे लिखनीया द्वितीया दक्षिणकोष्ठे तृतीया पश्चिमे
चतुर्थी उत्तरे पंचमी मध्ये एवं षष्ठ्यादि नन्दापंचकं पूर्वाद्यादि लिखेत्
तथैकादश्यादि पंचकं पूर्वाद्यादि लिखेत् एवं कृते पंचमी दशमी पू
र्णिमेति तिथिपूर्णा मध्ये लिखिता भवंति वाराणामपि भौमादिक्रमे
ण वाराणां सप्तकं लेख्यं वारलिखनं नंदादितिथिना साहचर्यं तेनाकि
थेषु कोष्ठेषु नंदाद्या लिखितास्तेष्वेव भौमादीन् लिखेत् तत्र च भौ
मं नन्दाद्यो लिखेत् बुधं भद्राकोष्ठके लिखेत् गुरुं जयाकोष्ठे लिखेत्
शुक्रं रिक्ताकोष्ठे लिखेत् शनिं पूर्णातिथिकोष्ठे लिखेत् पुनः रविं भौमे
न सह चंद्रं बुधं भद्राकोष्ठे लिखेत् वारान्तं लिखेत् सर्वतोभद्रं संपूर्णं

शेषेषु कोष्ठकेष्वेवं नन्दादितिथिपंचकम् ॥ वाराणां
सप्तकं लेख्यं भौमादित्यक्रमेण च ॥ ७ ॥ भौमादित्यौ
च नंदायां भद्रायां बुधशीतगू ॥ जयायां च गुरुः प्रोक्तो रि
क्तायां भार्गवस्तथा ॥ ८ ॥ पूर्णायां शनिवारश्च लेख्यं
चक्रे त्रिनिश्चितं ॥ इत्येष सर्वतोभद्रविस्तारः कीर्ति
तो मया ॥ ९ ॥ ऊर्ध्वदृष्टिश्च भौमार्कौ ३।१ केकरौ बु
धभार्गवौ ४।६ समदृष्टिश्च जीवेंदू ५।२ शनिराहु
७।८ रधोदृशौ ॥ १० ॥ नीचस्थितोर्ध्वदृष्टिश्च उच्चेरधो
निरीक्षते ॥ समपार्श्वतो दृष्टिस्त्रिधा दृष्टिः प्रकथ्यते ॥ ११ ॥
शन्यर्कराहुकेत्वाराः क्रूराः शेषाः शुभग्रहाः ॥ क्रूरयुक्तो बुधः
क्रूरः क्षीणश्च चन्द्रस्तथैव च ॥ १२ ॥ यस्मिन्नृक्षे स्थितः खेटस्त
तो वेधत्रयं भवेत् ॥ ग्रहदृष्टिवशेनात्र वाम सन्मुख दक्षिणे ॥ १३ ॥

भवति तथा च कविरेवाह ॥ इत्येष सर्वतोभद्रप्रस्तारः कीर्तितो मया ॥
पूर्वशास्त्रानुसारेण यथोक्तं ब्रह्मयामले सुगमम् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥
॥ ११ ॥ अधुना चक्रविचारणाय ग्रहाणां क्रूरसौम्यविभागमाह ॥
शन्यर्कराहुरिति सुगमं ॥ १२ ॥ अथ ग्रहदृष्ट्या वेधविचा
रमाह ॥ यस्मिन्नृक्षेति ग्रहस्थितनक्षत्रात् ग्रहदृष्ट्या वेधत्रि
तयं भवति यतो ग्रहाणां त्रिविधा दृष्टिः एकया दृष्ट्या सन्मुखं
विध्यति एकया दक्षिणे विध्यति एकया वामे विध्यति ॥ १३ ॥



					कृध ५·ळ					
	अ	कृ	रो	मृ	आ	पुं	पु	श्ले	आ	
	म	उ	आ	व	क	ह	ड	अ	म	
	अ	ल	लृ	२	३	४	लॄ	म	पूफा	
	रे	च	१	ओ	१ मं ६ बु ११	औ	५	८	उफा	
हप मेमे	उभा	द	१२	४।५ १४।शु	५ श ३० ३५	३ बु १२ चं	द	प	ह	धूब लठ
	पूभा	स	३३	अः	३।८ १३।र	अं	७	२	चि	
	श	ग	ए	१०	९	८	ए	त	स्वा	
	ध	ॠ	ख	ज	भ	य	न	ॠ	वि	
	ई	श्र	अ	उषा	पूषा	मू	ज्ये	अनु	इ	
					रूध मळ					

भुंक्त भोग्यं तथा क्रांतं विद्धं क्रूरग्रहेण भं ॥ शुभाशुभे शुभकार्येषु
वर्जनीयं प्रयत्नतः ॥१४॥ वक्रगे दक्षिणा दृष्टिर्वामदृष्टिश्च
शीघ्रगे ॥ मध्यचारे तथा मध्या ज्ञेया भौमादिपंचके ॥१५॥

॥१४॥ यथा त्रिविध दृष्ट्या त्रिविधो वेधस्तां लक्षणमाह ॥ वक्रगे दक्षिणेति ॥
पृथक् पृथक् त्रिविधा दृष्टिर्भौमादीनां पंचानां भवति यतो भौमादयः पंच वक्रि
णो भवंति शीघ्रगा भवंति वामगा भवंति अतस्त्रिविधया दृष्ट्या त्रिविधो वेधः ॥
शाकलोके वेधत्रयं भवेत् इत्यत्र विशेषः ग्रहः सव्यापसव्येन चतुष्पावेधयेत्पुनः ॥
अहलादिस्वरादीन् सन्मुखेनात्मनक्षत्रमिति एके आचार्याः सव्यापसव्येन चतुष्पान
नक्षत्रवर्णस्वरादीन्वेधयेत् सन्मुखेन ग्रहो स्वभं नक्षत्रमेव विध्येत् तथा चास्मिन्नर्थे र
णहलिसंज्ञ ग्रंथे श्लोकाः वेधमेव कथयति यंत्रयुग्मं तथाऽऽर्द्रा च कन्यारं स्वाति मेव च ॥
अश्विनी रोहिणी संस्था अभिजितं हंति पापकः कृत्तिकालीरं हरि पंच चित्रा मूलं
च रेवती सौम्यस्था हंति पापात्मा वै पंच पुरःस्थितमि त्यादि सर्वत्रावगंतव्यं ॥१५॥

अथाचार्यो ग्रहगतिं तं विना ग्रहाणां मंदशीघ्रवक्रगतिलक्षणमाह॥ सूर्य
युक्ता उदीयंते इति अथ मतो रविमंडलगता अस्तमयंति ततो रवेर्मुक्ता उ
दयंति आर्कात् अर्काक्रांतराशितो द्वितीयस्था ग्रहाः शीघ्रगाः शीघ्रगतयो
भवंति अर्कात् तृतीयगा तृतीयराशिस्थाः समाः समगतयः भानोरर्के च
तुर्थराशिस्थे मंदा भवंति समगतिभ्यो मध्यगतिभ्यो न्यूनागतिः अतो मंद
गतयः पंचमे षष्ठे सूर्ये ग्रहा वक्राः स्युः अर्थादर्के पंचमषष्ठराशिस्थे
भौमादयः पंचवक्रगतयो भवंति केचित्तु रवेः शकाशात् नगाष्टके सप्ता
ष्टमस्थाने अतिवक्रा भवंति नवमे दशमे वक्राः स्युः भानौ ग्रहाणां कुटि
लागतिर्जायते द्वादशैकादशे सूर्ये ग्रहाः शीघ्रगा भवंति एतेन वक्रशी
घ्रमध्यगत्या ग्रहाणां त्रिविधा दृष्टिर्भवति अतएवोक्तं वक्रगे दक्षिणा
सूर्ययुक्ता उदीयंते सूर्यगस्तास्तगामिनः॥ ग्रहा द्वितीयगे सू
र्ये स्फुरद्बिंबाः कुजादयः॥१६॥ समास्तृतीयगे ज्ञेया मन्दा भानौ
चतुर्थगे॥ वक्राः स्युः पंचषष्ठेऽर्के त्वतिवक्रा नगाष्टमे॥१७॥ नव
मे दशमे भानौ जायते कुटिला गतिः॥ द्वादशैकादशे सूर्ये भज
ते शीघ्रतां पुनः॥ आहुस्तां पुनर्लोके ब्रजंत्यर्कगता ग्रहाः॥१८॥
राहुकेतू सदा वक्रौ शीघ्रगौ चंद्रभास्करौ॥ गतेरेकस्वभावत्वा
देषां दृष्टित्रयं सदा॥१९॥ क्रूरा वक्रा महाक्रूराः सौम्या वक्रा महा
शुभाः॥ स्युः सहजस्वभावस्थाः सौम्याः क्रूराश्च शीघ्रगाः॥२०॥

दृष्टिरित्यादि॥१६॥१७॥१८॥ अथ विशेषग्रहाणां विशेषगतिमाह॥
राहुकेतू सदा वक्राविति राहुकेतू सदैव वक्रिणौ एव स्यातां सदागतयः चंद्र
भास्करौ शीघ्रावेव एषां रविचंद्रौ रविचंद्रराहुकेतूनां गतेरेकरूप स्वभावः
त्रिभिरेव दृष्टिभिर्वीम सम्मुखदृष्टिरलाभिरेते चत्वारः पश्यंति केवलं य
थायस्य गतिर्भवतस्तेन तस्यैव पोवि तेन रविचंद्रौ सदैव शीघ्रगौ तयो
दृष्टिः राहुकेत्वोर्वक्रा दृष्टिः वक्रत्वा दृष्टिर्लक्ष्य च दृष्टिः तथा च रल
त्वं वक्रौ राहुकेतू रवीन्दू नित्यं शीघ्रौ विध्ये वीक्ष्यते ग्रसमस्तु नि
दाह॥ क्रूरा वक्रे ति॥ सौम्या शीघ्रा वलिष्ठाः स्युः क्रूरा शीघ्रा वलोर्जिताः॥
क्रूराः पापाः क्रूरं दुष्टं कुर्वंति स्वभावो यं पापानां॥ सौम्याः शुभग्रहाः शुभ
मेव कुर्वंति ते च पापाः क्रूरा वक्रा यदि भवंति तदा अतिशयेन क्रूरा भवं
ति सौम्याः शुभा यदि वक्रा भवंति तदा महाशुभाः स्युरिति॥ सौम्याः शी

ग्रहा यदि शुभा भवंति तदा सहजस्वभावस्था भवंति यः साहजिकस्वभावस्तत्र
स्थाः शीघ्राः सन्तो भवंति शुभं स्वभावेन कुर्वंति किंतु वक्राः संतो यथा निःशु
भं कुर्वंति तथा न एवं क्रूरा अशीघ्राः शीघ्राश्च यः स्वस्वभावेन स्थिता भवंति
मंगलस्य यः स्वभावः सः स्वस्वभावेन फलदायकः तथा च जातके वक्रिणः
शुभमहावीर्याः शुभा राज्यप्रदा ग्रहाः पापा व्यसनदाः पुंसां कुर्वंति च वृथाटनं ॥
वृथा स्वदशायां पुरुषं भ्रामयंति इतस्ततोऽपि ॥ २० ॥ अधुना वेधमाह ॥
अवर्णादिस्वरा विति ॥ स्वरयुक्ते आत्माययोरनुस्वारविसर्गयोः तयोरेव वेधेन
द्वयोरेव वेधो ज्ञातव्यः । यतो ह्यकारसहितावुच्चार्यते अकारं विना तयोरु
च्चारणमशक्यम् ॥ २१ ॥ अथ वर्णवेधे विशेषमाह ॥ अथ चक्रे पवर्गीयब
कार उक्तः यवर्गीय सकार उक्तः सवर्गीयो षकारसकारौ यदि कस्यापि

अवर्णादिस्वरे द्वौ द्वावेकवेधे द्वयोर्व्यधः ॥ स्वरयु
क्तात्मनो वेधस्त्वनुस्वारविसर्गयोः ॥ २१ ॥ बवौ श
सौ षखौ चैव ज्ञेयौ ङञौ परस्परम् ॥ एकेन द्वितयं से
यं शुभाशुभखगव्यधे ॥ २२ ॥ घङछाः षणठाश्चैव ध
फढाः स्यु रञाः स्लथा । एतत्त्रिकं त्रिकं विद्धं विद्धे कपदमे
क्रमात् ॥ २३ ॥ घङछा रोड्गे वेधे षणठा हस्तगे ग्र
हे ॥ धफढाः पूर्वषाढायां भजञा भाद्र उत्तरे ॥ २४ ॥ अव
र्णादिस्वरद्वंद्वे ह्येकवेधे द्वयोर्व्यधः ॥ युक्तस्वरात्मके वेधस्त्व
॥ नुस्वारविसर्गयोः ॥ २५ ॥

तास्मिन् पवर्गीयो बकारः तालव्यः शवर्गीयः षकारः कवर्गीयः खकारः स्यात्
तदेतेषां वेधस्त्वेकोऽत्र वेसमवेधे नैव वेधो ज्ञातव्यः ॥ २२ ॥ घङछाः षणठा
इति एते वर्णाः घङछादयो नक्षत्रचरणस्थाः घङछा आर्द्रा षणठा ह
स्त धफढा पूर्वाषाढा भजञा उत्तरभाद्रपदा आर्द्रा हस्त पूर्वाषाढोत्तरभाद्र
पदानां चरणवर्णाः तेषां मध्ये कपमह एव वर्णाश्चक्रे निवेशिताः तेषां
वेधे अपरे त्रयो वर्णा वेधिता भवंति ॥ २३ ॥ तथा चाह ॥ घङछा रौद्रगे इति
आर्द्रानक्षत्रगते पापे शुभे घङछा वर्णा विद्धा भवंति हस्तस्थे ग्रहे षणठा व
र्णा विद्धा भवंति पूर्वाषाढस्थे ग्रहे धफढा विद्धा भवंति उत्तराभाद्रस्थे भज
ञा विद्धा भवंति ॥ २४ ॥ २५ ॥ कोणस्थेति अग्रचतुःकोणे द्वयं नक्षत्रस्य

कोणस्याधिष्ण्ययोर्मध्ये ह्यस्त्यादिपादगे ग्रहे ॥
अस्वरादिचतुष्कस्य वेधः पूर्णातिथेः क्रमात् ॥ २६ ॥

स्यमिति तत्र ईशानकोणे भरणीकृत्तिके आग्नेये मघाश्लेषे नैरृत्ये विशा
खानुराधे वायव्ये श्रवणधनिष्ठे एषु कद्वयोर्द्वयोरंत्यादिपादगतयोर्न
क्षत्रयोर्द्वयोः यथा कोणस्थानां चतुर्णां वेध उत्पद्यते तथा पूर्णातिथीनां वेधः अ
त्रायं भरणीकृत्तिकयोरंत्यचरणस्थो ग्रहः अ उ लृ ओ स्वरान्वेधयति विशाखा
ति आश्लेषामघाद्यंतचरणस्थः आ ऊ लॄ औ स्वरान्वेधयति श्रवणधनिष्ठाद्यंतचर
नुराधाद्यंतचरणस्थः इ ऋ ए अं स्वरान्वेधयति चतुःकोणस्थाः पूर्णातिथीन्वेधयंति ॥
णस्थः ई ॠ ऐ अः स्वरान्वेधयति

न-ज-॥
अ-ही-॥
॥२९॥

29

अथान्यव्याख्यानं अस्वरादिचतुष्कस्य वेधः अआइईएषां चतु
र्णां वेधः यतः एषां केनापि वेधो न संभवति उकारादीनां वेधो वर्ण
राशिभिः सह वेधो भवत्येव अत एषामवेधनव्याख्यानम् ॥ २६ ॥
अथ वेधफलमाह ॥ एकादिक्रूरवेधेति शन्यर्कराहुकेत्वारः पंच पापा
उक्ताः तेषामेकतमे पुंसां नाम्नः स्वरवर्णराशिनक्षत्रायेकतमे वेधे
उद्वेगो जायते उद्विग्नमना भवंति ॥ द्विग्रहवेधे भयं भवति ॥ परच
क्रादितः स्वचक्रादितो वा कस्मादपि भयं भवति ॥ त्रिग्रहवेधे भंगः
पराजोदयः संग्रामात्पलायते ॥ अर्थवादे अर्थभंगः ॥ विद्यावादे विद्या
भंगः ॥ इत्यादि बोद्धव्यम् ॥ एकद्वित्र्यादिवेधकल्पना स्वरवर्णयो
रपि ॥ ग्रहेष्वविविचारः ॥ स्वरवर्णनक्षत्रतिथिराशीषु पंच पापग्रहा
णां समासमविचारेणोद्वेगादिफलं ॥ यदि एको वर्णादीनां मध्ये एकेन
ग्रहेण वेधस्तदा उद्वेगः क्रियान्विद्विग्रहवेधे बहूद्वेगः एवं ग्रह

एकादिक्रूरवेधेन फलं पुंसां प्रजायते ॥ उद्वेगश्च भयं हा
निः रोगो मृत्युः क्रमेण च ॥ २७ ॥ ऋक्षे भ्रमोऽक्षरे हानिः स्व
रे व्याधिर्भवंति यो ॥ राशौ विद्धे महाविघ्नं पंचविद्धो न
जीवति ॥ २८ ॥ एकवेधे भयं युद्धे युग्मवेधे धनक्षयः ॥
त्रिवेधेन भवेद्भंगो मृत्युर्वेधचतुष्टये ॥ २९ ॥

संख्यया उद्वेगस्य विकल्पना तथा वर्णस्वराणां द्विवेधे द्वित्र्या
दिग्रहेण तथा भयमपि वदेत् एवं भंगादीनां त्रयाणामेकादिग्रह
वेधेन स्वरवर्णादिषु तथान्यूनाधिक्यं वदेत् ॥ २७ ॥ यस्मिन्वेधे
उद्वेगादीनां विचारस्तमाह ऋक्षे भ्रम इति नक्षत्र एकादि एकादि
ग्रहवेधे भ्रमः स्थानरहितत्वं तदेवोद्वेगः उद्वेगादपि भ्रमो भवति
वर्णे विद्धे हानिः कार्यादीनां हानिर्विषयादीनां वा स्वरे
व्याधिर्विद्धे सति भवति एवं चतुःपापविद्धे सति रोग
उक्तः चतुर्भिर्ग्रहैः स्वरे विद्धे व्याधिग्रस्तो भवति अत्र
विचारः एकादिवेधेन उद्वेगादय उक्ताः ते न किं समुदायेनापि भवंति
चतुर्भिर्ग्रहैर्विद्धे स्वरे उद्वेगादिव्याधिपर्यंतं फलानि भवंति तिथौ वि
द्धे भयं पूर्वमुक्तं द्वाभ्यां वेधे भयम् द्विपापवेधे सति भयं वाच्यं अत्रापि
उद्वेगो भयमपि राशौ विद्धे महाविघ्नं महाविघ्नं मृत्युः पश्चादुक्तं पंच
ग्रहवेधेन मृत्युः अत्र राशौ विद्धे महाविघ्नमुक्तं तेन किं राशेः पंचपाप
ग्रहवेधात् विघ्नमादेश्यं मृत्युरित्यर्थः पंचविद्धो न जीवति अस्याय
मर्थः वर्णादीनां पंचानां वेधे सुतरां मृत्युर्भवति एवं प्रकारस्याभिप्रा
यो राशौ पंचग्रहवेधादेव मृत्युरिति ॥ २८ ॥ विशेषमाह ॥ एकवेधेति
एकग्रहवेधे युद्धे भयमादेश्यं नान्यत्र युग्मग्रहवेधे धनक्षयः त्रिवेधे
संग्रामात्पलायते चतुर्ग्रहवेधे मृत्युः संग्रामे मृत्युर्भवति अत्रापि ग्रह
संख्या वर्णादिसंख्या विचारः कर्तव्य इति प्रवदेत् ॥ २९ ॥ ॥ ९९ ॥

अथ पापग्रहवेधवशात् शुभग्रहाणां वेधफलमादिशति । यथा दुष्टफला
इति यथा एकादिक्रूरवेधे उद्वेगादिफलमुक्तं तथा एकादिशुभवेधे हर्षलाभसौ
ख्यादिभिः फलं कल्पयेत् अत्र क्रूरयुक्तो क्रूर एव भवति क्रूरफलप्रदः अन्यथा
युक्तोऽन्यथा शुभोऽपि शुभयुक्तोऽन्यथा शुभः अत्र यद्यपि नोक्तं पापशुभमिश्रितं फ
लं वदेत् न्यूनाधिक्यं ग्रहवशात् पापाधिके पापफलमधिकम् शुभाधिके शु
भफलमधिकम् ॥ ३० ॥ यथात्र भौमोऽन्तरे हानिरित्यादि पृथक्फलमुक्तं त
थार्क्यादिवेधे पृथक्फलमाह अर्कवेधे मनस्तापः इति अर्कवेधे सति मन
स्तापो भवति किमुक्तं भवति उद्वेगो भवति नक्षत्रे विद्धे तेन अर्केन नक्षत्रे वि
द्धे मनस्तापो भवति उद्विग्नमनाः अन्तरे हानिरुक्ता तेन भौमेन विद्धे अन्तरे
विद्धे द्रव्यहानिर्भवति एवमुक्तं स्वरे व्याधिः तेन शनिना स्वरे विद्धे रोगवा
न्भवति राशौ विद्धे महाविघ्नं भवति अत्र राहुकेतू च विघ्नदौ तेन राहुकेतु

यथा दुष्टफलाः क्रूरास्तथा सौम्याः शुभप्रदाः ॥ क्रूरयुक्ताः पुनः सौ
म्या ज्ञेयाः क्रूरफलप्रदाः ॥ ३० ॥ अर्कवेधे मनस्तापो द्रव्यहानिश्च
भूसुते ॥ रोगपीडाकरः सौरी राहुकेतू च विघ्नदौ ॥ ३१ ॥ चंद्रे मि
श्रफलं पुंसां रतिलाभश्च भार्गवे ॥ बुधवेधे भवेत्प्रज्ञा जीवः
सर्वफलप्रदः ॥ ३२ ॥ सौम्यपापग्रहौ हन्यात् नाम्नो व्याधिधन
त्रयः ॥ वेधे वैनाशिके तस्य त्रिवेधे चापशुभं भयम् ॥ ३३ ॥
स्वक्षेत्रस्थे बलं पूर्णं ६० पादोनं ४५ मित्रभे गृहे ॥ अर्द्धं ३०
॥ समगृहे ज्ञेयं पादं शत्रुगृहे स्थिते ॥ ३४ ॥ ॥

भ्यां राशौ विद्धे महाविघ्नं मृत्युः ॥ ३१ ॥ अथ शुभग्रहविद्धफलमाह । चंद्रे मि
श्रफलमिति चंद्रवेधे सति मिश्रफलं पापशुभं क्षीणचंद्रः पापयुक्तः क्षीणचं
द्रवेधे पापफलं पूर्णचंद्रवेधे शुभफलं शुक्रवेधे रतिक्रीडादिरूपा सौख्यं बु
धवेधे प्रज्ञा भवति हेयोपादेये विचारे यथार्थज्ञानं भवति जीववेधे सर्वशु
भफलं भवति अभिलषितं शुभं भवतीत्यर्थः कस्याभिप्रायोऽयं एकवेधेऽर्थ
नाशश्च स्थानभ्रंशश्च द्विवेधे च नाशश्चोभयवेधेन पापानां निर्दिशेन्मृतिम् ॥ ३२ ॥
अथ विशेषमाह ॥ सौम्यपापग्रहेति । शुभपापौ यदि नाम्नो वैनाशिकर्क्षं जन्मन
क्षत्रं त्रयोविंशतितमं २३ नक्षत्रं वेधयतस्तदा व्याधिधनक्षया भवंति वैनाशि
कं सामुदायिकं संघातिकं च त्रिवेधे मृत्युः ॥ ३३ ॥ अथ यद्वर्गस्थो ग्रहः स्वस्य
मध्याधिकं पापशुभं ददातीत्याह ॥ स्वक्षेत्रस्थे फलं पूर्णमिति । स्वक्षेत्रे नवां
शे द्रेष्काणे स्वग्रहे बलं पूर्णं ज्ञेयम् ॥ मित्रभे मित्रराशौ नवांशे मित्र
द्रेष्काणे च एकेन पादेनोनं कोष्ठे त्रिचरणं बलम् ॥ अर्द्धबलं सम
गृहे पादं बलं शत्रुगृहे स्थिते ज्ञेयं ॥ इदं सामान्यमुक्तं ॥ ३४ ॥ ॥ ॥

॥ इदं च सौम्यक्रूराणां बलं स्थानवशात्समम् ॥ ॥
एतदेव फलं बोध्यं सौम्यक्रूरे विपर्ययात् ॥ ३५ ॥

अथ विशेषमाह ॥ इदं च क्रूरसौम्यानामिति । स्वक्षेत्रस्थे बलं पूर्णमित्या
दि बलं बुधगुरुशुक्रपूर्णचन्द्राणां स्थानबलं ज्ञेयं ॥ एतदेव बलं पापग्र
हाणां विपर्ययात् ज्ञेयं ॥ तत्र विपर्ययः शत्रुगृहे स्थिते पूर्णं पादोनं स
मवेश्मनि ॥

30

स्यान्नवेधसमायोगे यत्संख्यं जायते बलम् ॥
तत्संख्यं वेधवल्लनां फलं ज्ञेयं विचक्षणैः ॥ ३६ ॥

आर्द्रं मित्रगृहे ज्ञेयं पादं पापे स्वश्मनि विपर्ययाच्च श्लोके नैव व्या
॥ ॥ ख्यातः ॥ ३५ ॥ ३६ ॥ ॥ ॥

॥ श्रीविघ्नहर्त्रे नमः ॥

श्रयविचारमाह ॥ ग्रहाः क्रूरा इति नेत्रशब्देन स्थानमुच्यते बलं स्नात्वा फ
लं ब्रूयात् स्थानवेधे यथा बलः स्वगृहं स्थानं मित्रगृहं समपि शत्रुगृहमपि
समस्थानस्य फलेन समस्थान वक्रमार्गोच्चादि मे गृहस्थानं वेध्यमिति विष
नुत्र व्याख्यायते स्वक्षेत्रस्थेन स्थानबलिना ग्रहेण विद्धे नक्षत्रे वक्रत्वेना
धिकबलिना ग्रहवेधे यस्य फलमुक्तमस्ति तस्य फलं द्विगुणं भवति यथा रविणा
विद्धे नक्षत्रे सिंहस्थेन स्वस्थानस्थेन मनस्तापउक्त मनस्तापश्च द्विगुणं भ
वति सम्यक् पादफलं भवति स्वक्षेत्रस्थेन गुरुणा च विद्धे सति जीवः सर्व
फलमिति द्विगुणं फलम् पापलोपो मतिभ्रमः द्विगुणं भवति उद्वेगश्च भयं च भंग
श्च रोगश्च मृत्युश्च एते ग्रार्थाः द्विगुणं वाच्याः यस्मिन्यस्मिन्विद्धे भयादय उक्ताः ॥

ग्रहाः क्रूरास्तथा सौम्या वक्रमार्गोच्चनीचगाः ॥
स्थानं च वेध्यमित्येवं बलं स्नात्वा फलं वदेत् ॥ ३६ ॥
वक्रे ग्रहे फलं द्विघ्नं त्रिगुणं स्वोच्चसंस्थिते ॥ स्वभा
वजं फले शीघ्रे नीचस्थोऽर्धफलो ग्रहः ॥ ३७ ॥ तिथि
राश्यंशनक्षत्रं विद्धं क्रूरग्रहेण यत् ॥ सर्वं शुभकार्ये
षु वर्जयेत्तत्प्रयत्नतः ॥ ३९ ॥ न नंदति विवाहे च या
त्रायां न निवर्तते ॥ न रोगान्मुच्यते रोगी वारवेलोक्त
तोयमः ॥ ४० ॥ वेधस्थाने रणे भंगो दुर्गे खंडिः प्रजा
यते ॥ कविप्रवेशनं तत्र योधघातश्च तत्र वै ॥ ४२ ॥
रोगकाले भवेद्वेधः क्रूरखेचरसंभवः ॥ वक्रगस्याभवे
त्तस्य शीघ्रयायी न जायते ॥ ४२ ॥

तस्मिन्स्वक्षेत्रस्थेन ग्रहेण विद्धे भयादयः द्विगुणं वाच्याः स्वक्षेत्रस्थो यदि व
क्री द्विगुणत्वे द्विगुणं चतुर्भिः पादैः द्विगुणं द्विगुणं चतुर्भिः फलं मित्रस्थेन ग्रहे
ण विद्धे भयाद्युक्तस्थानं तदा भयादयः पादोना वाच्याः मित्रगेहगो भव
ति मित्रगृहं तदुच्चं चेत् तदा नवगुणं भयादयो वाच्याः शीघ्रगानां स्वभा
वमेव फलं स्थानबली शुभः शीघ्रः स्वगृहे द्विगुणं मित्रगृहे पादोनं मित्रस्थादि
नीचभे हि फलदः मित्रगृहे नीचगो भवति तदा शुभं साधु च रणफलं पाद
यति ॥ ३७ ॥ तथा च वक्रे ग्रहे फलं द्विघ्नमिति ॥ ३८ ॥ तिथिराश्यंशन
क्षत्रमिति प्रकृतं भोग्यं तथा क्रोनं विद्धं पापग्रहेण भयं शुभाशुभेषु सर्वं
षु वर्जनीयं प्रयत्नतः सुगमं ॥ ३९ ॥ न नंदतीति वेधवेलायां वेधकाले
कृतविवाहो न नंदति शुभं न याति यात्रायां न निवर्तते वेधसमये संग्रा
मादि यात्रा न कार्या न रोगान्मुच्यते रोगी वेधकाले रोगो यदि जायते त
दानंतरं पापवेध उत्पद्यते न तो रोगी रोगान्मुक्तो भवति ॥ ४० ॥ तथा च
वर्त्यति रोगकालेति सुगमम् ॥ ४२ ॥ वेधस्थानेति यत्र ग्रामादि स्थाने
वेधो भवति तत्र स्थितिं न कुर्यात् ग्रामादिस्थानस्य स्वरवर्णादि वेधे तत्र
ग्रामे स्थाने स्थितिं न कुर्यात् नेत्रवेधे तत्र संग्रामं न कुर्यात् तस्माद्भंगो भ
वति पलायते ग्रामवेधे ग्रामस्य भयं जायते दुर्गे सर्वतोभद्रे वक्रे स्थाप्य वे
धं विचारयेत् यद्दिशि नक्षत्रवर्णराशिस्वरवेधस्तत्र खंडिर्भवति
दुर्गं भज्यते तथा वेधदिशि कविप्रवेशनं कुर्यात् योधघातश्च तत्रैव या
धनक्षत्रात् नक्षत्रपुरुषं विलिखित्वा यत्रांगे नक्षत्रे सर्वतोभद्रे विद्धं भवति
॥ तत्र घातं कुर्यात् ॥ ४२ ॥ ॥

१ समगृहे अर्धबलं ॥ तत्र गृहनीचे चेत्तदा पादफलं एवं स्वगृहादिस्थानबलिनो ग्रहाणां
वक्रादिफलैः सह फल[illegible]कलनां कुर्यात् ॥ ४३ ॥ ग्रु ॥

अथ चक्रविचारमाह ॥ यत्र पूर्वादीति ईशानस्याद्यः इति । वृषमिथुनकुलीराः प्राच्यां तत्रस्थे रवौ प्राचीदिगलक्षिताति ष्ठति ॥ सिंहकन्यातु
31 लात्रिषु राशिषु दक्षिणस्यामिता तिष्ठति । वृश्चिकधनुर्मकराः पश्चि
मायां तत्रस्थे रवौ पश्चिमालक्षिता तिष्ठति कुंभमीनमेषा उत्तरस्यां
तत्रस्थे रवौ उत्तरा दिक् अलक्षिता तिष्ठति ॥ ४३ ॥ ४४ ॥ तद्दशा
द्विशेषमाह ॥ नक्षत्राणीति अथ पूर्वस्यां अ उ लृ ओ ए ते स्वराः कृ
त्तिकारोहिणीमृगशिर आर्द्रापुनर्वसु पुष्य आश्लेषा सप्त नक्षत्राणि
अवकहडाः पंच वर्णाः वृषाद्यास्त्रयः राशयः नंदाद्याः तिथयः र
विभौमवासरौ एते वृषादित्रयमासिके रवावलक्षिता तिष्ठंति ॥

यत्र पूर्वादिकाष्ठायां वृषराश्यादिगो रविः ॥ सा दिगलक्षि
ता ज्ञेया तिस्रः शेषाः सदोदिताः ॥ ४३ ॥ ईशानस्याः स्व
राः प्राच्यां ज्ञेया आग्नेय याम्ययोः ॥ नैरृत्ये पश्चिमायां तु वायव्यां
वायव्यां सौम्य गामताः ॥ ४४ ॥ नक्षत्राणि स्वरा वर्णाः
राशयस्तिथयो दिशः ॥ ते सर्वे लग्नता ज्ञेया यत्र भानुः
त्रिमासिके ॥ ४५ ॥ नक्षत्रे तु रुजो वर्णे हानिः शोकः
स्वरे स्मृतः ॥ राशौ विघ्नं तिथौ भीतिः पंचालग्ने च बंधनं ॥ ४६ ॥
यात्रा युद्धं विवादं च द्वारं गृहादि सम्मुखः ॥ न कर्तव्यं शुभं
चान्यत् अलक्षिताभिमुखं नरैः ॥ ४७ ॥ अलक्षितायां स्थितं
यस्य यदा नामाद्यमक्षरं ॥ तदा तु सर्वकार्येषु ज्ञेयो दैवहतो
नरः ॥ ४८ ॥ कवौ कोटे तथा द्वंद्वे चातुरंगे महाहवे ॥
उद्यमो लग्नतैर्योधैर्वर्जनीयो जयार्थिभिः ॥ ४९ ॥ ॥ ॥

एवं चतुर्दिक्षु नक्षत्राणि स्वरवर्णराशयस्तिथयो दिशो लग्नता ज्ञेयाः ॥ ४५ ॥
अलक्षितस्य पृथक् फलमाह ॥ नक्षत्रे रुजेति इदमपि फलं पूर्वफलेन सह उद्वेगश्रमयमित्यादि सहमेलयित्वा फलं ब्रूयात् अस्याचोपित
दृश्यते एव ॥ ४६ ॥ अथालक्षितायां दिशि क्रियानिषेधमाह यात्रा
युद्धेति । अथ अपि सि कर्त्रि उरुधेर लक्षिताभिमुखं यात्रा न कार्या यु
द्धं च न कार्यम् विवादो विग्रहो विवादः प्रासादस्य द्वारं गृहस्य च ए
तत्सर्वं अलक्षिताभिमुखं न कुर्यात् ॥ ४७ ॥ अथान्यदलक्षितफल
माह ॥ अलक्षितायां स्थितमिति सुगमम् ॥ ४८ ॥ कवौ कोटेति न
क्षत्राणि स्वरा वर्णा राशयो यस्य योधस्य असंगता भवंति ते यो
धा अलग्नता ज्ञेयाः तैरलग्नतैर्योधैः किं विवर्ज्यं कोटयुद्धं व
र्ज्यं द्वंद्वयुद्धं वर्ज्यम् ॥ विशेषाच्चातुरंगे महाहवे न तिष्ठेत् ॥ ४९ ॥
अथानंतरं नक्षत्रस्वरादीनामुदितानां फलमाह ॥ नक्षत्रे मुदितेति ॥
नक्षत्रे मुदिते शरीरपुष्टिः वर्णे लाभः नक्षत्रवर्णस्वरराशितिथि
षु पंचसु उदितेषु पदप्राप्तिः राज्यादिपदप्राप्तिः स्यात् ॥ ५० ॥ ॥ ॥

अथ प्रश्नकाले वेधफलमाह । प्रश्नकाले भवेति सुगमम् ॥५१॥ ग्रहे रविद्धे इति
यश्चरादिके लग्ने शुभफलमुक्तं तद्देशिकेंद्रेण ज्योतिर्विद्भिः सर्वैर्ग्रहैः विद्धे ल
ग्ने तु फलं लग्नस्वभावतः फलं ज्ञेयम् लग्नस्य यः स्वभावः हृतनष्टादौ लाभाला
भे जयाजये न चेत् तु ग्रामारण्ये जलराशिस्वभावेन फलं ब्रूयात् ॥ अथ
चरादिके यत्फलमुक्तं तदाह चरलग्नोदये नष्टं दुर्लभं रोगिणो मृतिः ॥ जा
तस्यापि च तत्रैव स्वल्पमायुर्विनिर्दिशेत् ॥ स्थिरलग्नोदये नष्टं स्वल्पकालेन
लभ्यते ॥ तत्र रोगी चिराद्व्याधी दीर्घायुर्लब्धजन्मवान् ॥ नष्टस्पर्शी द्रुतं लाभः
स्यात् रोगी शीघ्रं शोभनः ॥ मध्यायुर्लब्धजन्मा च द्विस्वभावोदये ध्रुवमित्या
दि चरादिके ज्ञातव्य ॥५२॥ अथान्यत् क्रूरैरुभयतेति वेधस्त्रिविध

नक्षत्रेऽभ्युदिते पुष्टिर्वर्गे लाभः स्वरे सुखम् ॥ राशौ जयः
तिथौ तेजः प्रीतिः पंचकोदये ॥ ५०॥ प्रश्नकाले भवेद्वि
द्धं यल्लग्नं क्रूरखेचरैः ॥ तद्दुष्टं शोभनं सौम्यैर्मिश्रैर्मिश्र
फलं भवेत् ॥५१॥ ग्रहाभिन्नं तु यल्लग्नं फलं लग्नस्वभा
वतः ॥ ज्ञातव्यं देशिकेंद्रेण भाषितं यच्चरादिकम् ॥५२॥
क्रूरैरुभयतो विद्धा यस्याक्षरतिथिस्वराः ॥ राशिधिष्ण्यं च
वर्गश्चापि तस्य मृत्युर्न संशयः ॥५३॥ मंडलं नगरं ग्रामं दु
र्गं देवालयं पुरम् ॥ क्रूरैरुभयतो विद्धं विनश्यति न संशयः ॥५४॥
कृत्तिकादित्रिकाद्येभे क्रूरविद्धे च कूर्मतः ॥ देशानाथास्य दे
शाद्या विनश्यन्ति यथाक्रमम् ॥५५॥ ॥ ॥

उक्तः वामदक्षिणसंमुखः उभयदिकस्थो वामेन विध्यति वामदृष्ट्या
उभयत्र वेधः एवं संमुखदृष्ट्या उभयदिकस्थो वेधयति अथवा दक्षि
णदृष्ट्या वा उभयत्र वेधः कस्यामपि दिशि कस्मिन्नपि नक्षत्रे मध्यगति
ग्रहस्तिष्ठति तत्संमुखदिशि तन्नक्षत्रे समसूत्रस्य नक्षत्रे परो मध्यग
तिर्ग्रहस्तिष्ठति तदा तयोः संमुखे वेधः एवं क्रूरैरुभयतो विद्धाः पंचव
र्णतिथिस्वरादयो यस्य मर्त्यस्य तस्य संग्रामे मृत्युः तथा जायते यथाऽमृ
त्युर्भवति ॥५३॥ मंडलं नगरमिति क्रूरैरुभयतो विद्धमिति एवमेव व्याख्या
तं अग्रेंशचक्रे बोद्धव्यं अपरं सुगमं वर्णादिपंचकमपि अत्रापि बोद्धव्यं
॥५४॥ अथान्यत्र वेधफलमाह ॥ कृत्तिकादिति कूर्मचक्रे कृत्तिकादित्रि
त्रिकाद्ये नक्षत्रे तदेकतमे यदि क्रूरैरुभयतो विद्धं सति नाभ्यादौ नवधा विभा
गोक्तदेशा विनश्यंति तत्र कृत्तिकादित्रिभं कूर्मनाभौ कृत्तिकादित्रिके क्रू
रैरुभयतो विद्धे कूर्मनाभिस्था देशाः संकेता मिथिला चंपा कोशांबि कौ
शिकी तथा ॥ अहिछत्रं गया विंध्यमंतर्वेदिर्मेखला ॥ कान्यकुब्जं प्रयागश्च म
ध्यदेशो विनश्यतीति ॥ तत्रायमाम्नायः सर्वे देशा विनाशं न यान्ति किंतु कृत्ति
कादित्रिनक्षत्रे विद्धे नाभ्युक्तदेशानां मध्ये यस्य यस्य वर्णस्वरादयः पंच क्रूरैरुभ
यतो विद्धा भवंति स स देशो विनाशं याति अयं विचारः ॥५५॥ ॥

32

अथान्यद्वेधविषयविचारमाह ॥ कृत्तिकायामिति आयमर्थः समु
दायेन सर्वे धान्यं करोति देशो विद्धे तद्देशग्रामे विद्धे कृत्तिकादिचतु
ष्कविद्धेषु ब्राह्मणादीनां पृथक् नाम्नां वर्णादिपंचके विद्धे फलं वद
तु ॥ परंतु येषैर्ग्रहैः क्रूरैर्वेधं क्रियते सस्यचेद्वादशारचक्रे तत्रोत्प
न्नराशिं पश्यति तदा फलं भवति इदमग्रे विशिष्योक्तमस्ति यत्र
यत्र पापविद्धे विनाशः तत्र शुभदृष्टे आयतावर्ज्या १ भाग्यं तथा
शेषं ब्राह्मणानां प्रकीर्तितम् उत्तरात्रितयं पुष्यं क्षत्रियाणां वि
निर्दिशेत् वोह्यमेत्रं मघा चैव शूद्राणां पस्यं विशाख्यतम् आदि
त्यमश्विनी हस्तं शूद्राणामभिजित्तथा विद्धे रभिर्द्विजातीनां
कारुकाणां च वेशोषके इति ॥५६॥ अथान्यद्विषये क्रूरवेधविचारः॥

कृत्तिकायां तथा पुष्ये रेवत्यां च पुनर्वसौ ॥
विद्धे सति क्रमाद्वेधो वर्णेषु ब्राह्मणादिषु ॥
॥५६॥ तैलं भांडं रसो धान्यं गजाश्वादि चतु
ष्पदं ॥ सर्वं महर्घतां याति यत्र क्रूरो व्यवस्थि
तः ॥५७॥ क्रूरवेधसमायोगे यस्योपग्रहसंभवः ॥
तस्य मृत्युर्न संदेहो रोगाद्वा परतोपि
वा ॥५८॥ सूर्यभात्पंचमं धिष्ण्यं ज्ञेयं वि
द्युन्मुखाभिधम् ॥ शूलं चाष्टमं प्रोक्तं सन्नि
पातं चतुर्दशम् ॥५९॥ केतुरष्टादशः प्रोक्तो
उल्कास्यादेकविंशतो ॥ द्वाविंशतितमं कंप
को पोविंशोच वज्रकम् ॥ ६०॥ निर्घा
तश्च चतुर्विंशो उक्ताश्चाष्टौ उपग्रहा ॥ स्वस्था
ने विघ्नदा प्रोक्ताः सर्वकार्येषु सर्वदा ॥६१॥

तैलंभांडमिति क्रमेण च क्रोत्र भनिदेशो देशे क्रूरग्रहवेधे च तैलं भांडं गज
श्वादिविद्धे सति तद्देशग्रामे सर्वं महर्घं भवतीति वक्रधनेनादि दुर्भिक्षं
भवति शुभग्रहविद्धे समर्घं भवति स्वल्पधनेन वृद्धिर्भवति ॥५७॥ क्रू
रवेधेति ॥५८॥ अथोपग्रहमाह ॥ सूर्यभात्पंचमं धिष्ण्यमिति ॥५९॥ केतु
रिति ॥६०॥ निर्घातश्च चतुर्विंशेति स्वस्थानेति स्वस्थानात् कुरुते वेधं ग
जदंष्ट्रानुसारतः विद्युन्मुखादयो ह्यष्टौ उपग्रहाः सर्वदा सर्वकार्येषु वि
घ्नदाः परंतु स्थानेऽतावता यत्र यत्रोपग्रहा भवंति तत्रत्य लग्नं शुभका
र्ये वर्ज्यं नोपरि एते उपग्रहाः स्वस्थानस्था गजदंष्ट्रानुसारेण वामदक्षि
णवेधं कुर्युः सन्मुखं न वेधयंति विद्युन्मुखो रविजो पि शूलं ब्रैदुः
प्रकीर्तितः सन्निपातः कुजो ज्ञेयो बुधः केतुः प्रकीर्तितः उल्का ज्ञेया
सुराचार्यो वज्रं भार्गव उच्यते कंपः शनैश्चरो ज्ञेयो राहुर्निर्घातएव च
पयेन वर्तते विद्धं प्रजानं स्यात् कारये तु एतेषां ग्रहत्वेन द्वादशारचक्रे
॥ दृष्टिरपि भवति ॥६२॥॥

अथान्यदाह जन्मभं कर्मेति जन्मनक्षत्रादि षट्नक्षत्रं सार्वजनीनकं सर्व
जनविषयं ज्ञेयं यतो जन्मनक्षत्रादि संज्ञकं ६२ अथ विशेषमाह
जातिदेशेति ॥६३॥ अधुना तन्नामान्याह जन्मभं जन्मनक्षत्रं दशमं क
र्मसंज्ञकमिति ६४॥ अष्टादशं च नक्षत्रमिति ॥६५॥ षड्विंशमिति तु मुग
मम् ॥६६॥ अथैषां शुभपापवेधे फलमाह मृत्युः स्याज्जन्मभे विद्धे इति ॥६७॥
देशर्क्षेति उपग्रहसमायोगात् जननभे विद्धे मृत्युः कर्मभे क्लेश ए
व चेत्यादि प्रोक्तं तत्सर्वमुपग्रहयोगाद्वश्यं भविष्यतीति व्याख्येयम् शु

जन्मभं जन्मनक्षत्रं दशमं कर्मसंज्ञकम् ॥ एकोन
विंशमाधानं गर्भो विंशं विनाशभम् ॥६४॥ अष्टा
दशं च नक्षत्रं सामुदायिकसंज्ञकम् ॥ सांघा
तिकं च विज्ञेयमृक्षं षोडशमग्रहि ॥६५॥ ष
ड्विंशं राज्यभं प्रोक्तं जातिनामस्य जातिभं ॥
देशभं देशनामर्क्षं राज्यर्क्षमभिषेकभम् ॥६६॥
मृत्युः स्याज्जन्मभे विद्धे कर्मभे क्लेश एव च ॥
आधानर्क्षे प्रवासः स्याद्विनाशो बंधुविग्रहः ६७॥
सामुदायकभे निष्टं हानिः सांघातिके तथा ॥
जातिभे कुलनाशं च बंधनं चाभिषेकभे ॥६८॥
देशर्क्षे देशभंगश्च क्रूरे एवं शुभे शुभम् ॥ उपग्र
हसमायोगे मृत्युर्भवति नान्यथा ॥६९॥
भयं भंगश्च घातश्च मृत्युर्भं गोपुरस्थितैः ॥
क्रूरैरेकादिपंचांतैर्युधि वेधे फलं भवेत् ॥७०॥

भे विद्धे शुभं ॥ शुभाशुभैर्मिश्रं फलं जातिभं संहितायामुक्तमलि ग्रवा
त्रयं सानूलमग्रजातां राज्ञां तपुष्येण महोत्तराणि ॥ सर्वोद्रमाभ्यं वि
त्तदैवतं सैश्रजापतेर्भं च कर्कीवलोनाम् ॥ आदित्यहस्ताभिजिदश्वि
नीश्च वणिग्जनेस्याम्बुपागतानि सार्वविशाखा श्रवणं भरण्य च
डालजातेरपि निर्दिष्टं स्यादेजातिनक्षत्राणि वो द्रष्याति जन्मादि
षट् नक्षत्राणि नाडीसंज्ञकानि राज्ञो जातेर्देशाभिषेकनैधी भिः
सहनव नक्षत्राणि नाडीसंज्ञकानि नाडीनक्षत्रे विद्धे च शुभं विमपि
न कुर्वीत ॥६९॥ अथान्यत् ॥ भयं भंगश्चेति जन्मादिनक्षत्रे
एकादिपंचांतैः क्रूरैः पुरःस्थितैः सन्मुखवेधकारिभिर्विद्धे सति फ
लं वदेत् एकेन पापेन विद्धे भयं वदेत् द्वाभ्यां भंगः पलायनं त्रिभिर्घा
तः चतुर्भिर्बंधः पंचभिर्मृत्युः ७०॥ अथ विद्धे सति कदाफ
लं तन्निर्णयमाह ॥ तिथिमृक्षमिति ॥ धिष्ण्यादिपंचकं शुभो वेधयेत्
यद्दिने चंद्रः पंचकं विध्यति तद्दिने शुभं वदेत् ॥ धिष्ण्यादिपंचके पा
पविद्धे चंद्रवेधे सति तद्दिने अशुभं वदेत् ॥७१॥

अथार्घं संप्रवक्ष्यामीति स्पष्टम् ॥७२॥ अथ देशकालवशात्
विषयविविधनिर्णयमाह देशः काल इति वणिजामर्घे देशनिर्ण
यः कस्मिन्देशे समर्घं महर्घं वा भविष्यति वा एवं विक्रयद्रव्ये
33 कालनिर्णयश्च कस्मिन्वर्षे समर्घं महर्घं अयने ऋतौ मासे वा
एवमस्यापि निर्णयः वणिजां त्रैकाल्यमेव निर्णयः ॥७३॥
अथ देशानां विभागमाह देशोथ मंडलमिति सुगमम् ॥७४॥
धातुर्मूलं चेति धातवः सुवर्णरजतादयः मूलं चन्दनागुरुजट
मांसि सुगंधतृणादयः जीवश्च गजतुरगकस्तूरिकागोवृषभादयः

तिथिनक्षत्रं स्वरं राशिं वर्णांश्चैव तु पंचकम् ॥ यद्दिने वि
द्यते चंद्रस्तद्दिने स्याच्छुभाशुभम् ॥७१॥ अथार्घं संप्रव
क्ष्यामि यदुक्तं ब्रह्मयामले ॥ एकाशीतिपदे चक्रे ग्रहवेधा
च्छुभाशुभम् ॥७२॥ देशः कालस्तथा वस्त्विति त्रीण्यर्घ
निर्णये । चिंतनीयानि वेध्यानि सर्वकालं विचक्षणैः ॥७३॥
देशोथ मंडलं स्थानमिति देशस्त्रिधोच्यते ॥ वर्षमासो
दिनं चेति त्रिधा कालोपि कथ्यते ॥७४॥ धातुर्मूलं च
जीवश्च इति वस्तु त्रिधा मतम् ॥ अथ त्रिकत्रिकस्यास्य
वक्ष्यामि स्वामिखेचरान् ॥७५॥ देशेशा राहुमन्देज्याः मं
डलस्वामिनः पुनः केतुसूर्यसिताः स्थाननाथाश्चंद्रारचं
द्रजाः ॥७६॥

यतः वणिजां लाभार्थं स्वस्वसामर्थ्ये स्थाने
लभ्यं वा तत्रप्रकृतिवणिक् कस्मिन्देशे न पण्यकं पण्यकं वा एवं विक्रे
या एवं समर्घं महर्घं वा भविष्यतीति विचार्य कस्मिन्देशे कस्मिन्काले वा धात्वादि
यः प्रकृति राजा च कस्मिन्स्थाने कस्मिन्काले क्रयं वा अपवाराजादि
अन्ये च कस्मिन्देशे कस्मिन्काले मया जीवनार्थं दुर्गादिकं महत्करिष्य
स्थितव्य इति बहुधा वक्ष्यो विकल्पनाः संति ॥७५॥ अथ देशादि
नां त्रित्रिकानामधिपतीनाह ॥ देशेशा राहुमंदेति ॥ राहुशनिबृह
स्पतयो देशाधिपाः यथा देशो लीरमुक्तिः मंडलं तत्र लक्षलाव
ती स्थानं किंरत्नपुरम् अत्र देशेशा उक्ताः सामान्यतः सर्वदेशाधि
पतयः देशराशिवशान्नाधिपतयः तथा स्थानकालयो रवि
मंडलाधिपाः केतुसूर्यशुक्राः स्थानाधिपाश्चंद्रभौमबुधाः ७६॥
अथ त्रिधाकालाधिपतीनाह वर्षेशेति ॥७७॥ धात्वीशा शौ
रिपालारा इति ॥ अत्रापि स्वभावतोधिपतयः न तु तत्तद्राशिवशा
त् ॥७८॥ पंग्रहाराविति संज्ञामात्रप्रयोजनं न तु स्वभावतः ७९॥

अथ ग्रहाणां बलेनाह सितेंद्विति देशेशा राहुमंदेज्या इत्यारभ्य गुणा-
धीशाः ॥ ८० ॥ देशानां नाथाः पृथक् उक्ताः कस्यापि त्रयोऽधिपतयः कस्या-
पि द्वौ कस्यापि चत्वारः किं समुदायेन भवंति कालवशाद्वा बलवशाद्वा
अधिपतयः इत्याशंक्य विचारमाह ग्रहो वक्रोदय इति देशेशा राहु

सर्वेशा राहुकेत्वार्कजीवोमासाधिपः पुनः ॥ भौमार्कज्ञसिता
त्रैया चंद्रः स्याद्दिवसाधिपः ॥ ७७ ॥ धात्वीशाः सौरिपाता
राजीवेशास्तेंदुस्वरपः ॥ मूलेशाकेतुशुक्रार्कीइति पर्या
धिपा ग्रहाः ॥ ७८ ॥ पुंग्रहा राहुकेत्वर्कजीवक्ष्माभिसुताम
ताः ॥ स्त्रीग्रहो शुक्रशशिनौ सौरिसौम्यौ नपुंसकौ ॥ ७९ ॥
सितेंदु सितवर्णेशौ रक्तेशौ भौमभास्करौ पीतेशौ ज्ञगु
रू कृष्णमा राहुकेत्वर्कजामता ॥ ८० ॥ ग्रहो वक्रोदये स्वांश
उदये च बलाधिकः ॥ देशादीनां स एकैकः स्वामी खेटस्मृतः ॥ ८१ ॥
वक्रोच्चगः स्वगृहस्थो पूर्णवीर्यो ग्रहो भवेत् ॥ मेषो वृषो मृ
गः कन्या कर्कमीन तुलाधराः ॥ ८२ ॥ आदित्यादि ग्रहो
च्चास्युनीच यत्रस्यसप्तमम् ॥ परमोच्चादिशोरामा ३ अ
ष्टाविंशा तिथी द्विया ॥ ८३ ॥ सप्तविंशा तथाविंशाः स
र्पदीनां तथांशकाः ॥ परमोच्चात्परं नीचं मध्यचक्रांतरस
स्थया ॥ ८४ ॥ उच्चान्नीचाच्च यत्तुर्यं संमस्थानं तदुच्य
ते ॥ तदग्रपृष्ठगे खेटे बलं त्रैराशिकं मतम् ॥ ८५ ॥ उच्च
स्थे च बलं पूर्णं नीचांशस्थे बलं दलम् ॥ स्वक्षेत्रस्थे बलं
पूर्णं पादोनं मित्रमेदहे ॥ ८६ ॥ ॥ ॥ ॥

मंदेज्येत्यादिषु यो वक्री भवति उदितो भवति स्वांशे यः स्थितः यत्र कुत्र
चिद्राशौ स्वगृहे स्वोच्चे इत्यादि लक्षणेन षड्बलेनापि यो भवति त्रयाणां
मध्ये वैक देशादीनां तदा कालेऽधिपतिः कल्प्यः अग्रे अन्यो यदि बली भविष्य
ति तदा स एव कल्प्यः इत्यादिना अधिपविचारः ॥ ८१ ॥ अथ पुनर्बलं वि
तिनष्ट स एव कल्प्यः स्वगृहे पूर्णवीर्यः वक्री पूर्णवीर्यः
चारयति वक्रोच्चगः स्वगृहस्थोऽपीति स्वगृहे पूर्णवीर्यः वक्री पूर्णवीर्यः
उच्चगः पूर्णवीर्यः तत्रापि यदि वक्री तदाप्यधिकबलः उच्चस्थानाद्ग्र
उच्चगः पूर्णवीर्यः त्रैराशिकेन बलं कल्प्यम् ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ अ
ग्रे पृष्ठस्थे वा त्रैराशिकेन बलं कल्प्यम् उच्चस्थे बलं पूर्णमिति नीचराशौ नीचनवांश
पुनर्बलविचारमाह उच्चस्थे बलं पूर्णमिति नीचराशौ नीचनवां
शे अर्द्धं बलम् किं बहुव्याख्यानेन जातकोक्तबलविचारेण जात
कपद्धति बलविचारेण स्थानदिक्कालनिसर्गचेष्टा इत्यादि भेदे योऽव
लविचारः स्वोच्च स्वगृह नवांश मित्रवर्गबलविचारेण यो बली
त्रयाणां भवति स नाथः कल्प्यः द्वावपि बलिनौ तदा द्वावपि नाथौ
स्यातां बलाधिक्यात्त्रयोऽपि स्युः बलेन देशाधिनाथं ज्ञात्वा फ
कलं वदेत् ॥ ८६ ॥ ॥

34

॥ ८७ ॥ अधुना फलविचारः ॥ एवं देशाधिनाथा इति ॥ एवमिति ॥
वक्ष्यमाणादिफलविचारे एषु देशादीनां येनाथा वर्तमानकाले भवंति
ते ग्रहवेधे व्यवस्थिताः कोर्थः वामसन्मुखदक्षिणदृष्ट्या वेधयि
तुं व्यवस्थिताः ते देशाधिपा देशस्य वर्णादिपंचकं वेधयंति देश
पतिं च देशनामराशिपतिं वेधयंति तत्र वेधे समुत्पन्ने वेध
कर्तारो देशाधिपस्य किं सुहृदः शत्रवो वा मध्या उदासीना वा
इति प्रयत्नो विचारणीयाः ॥ ८८ ॥ अस्मिन् ज्ञाते किं कर्तव्यमाह ॥
स्वमित्रसममिति यदि देशमंडलग्रामाधिपतयः स्वाधिपते
यो भवंति देशपतिवेधकर्ता यदि देशाधिपतिर्भवति स चेच्छुभ

अर्द्धसमग्रहे ज्ञेयं पादं शत्रुग्रहस्थिते ॥ नैसर्गिकवशा
त्तेयं अंतरे तु बलाबुधैः ॥ ८७ ॥ एवं देशाधिनाथा येन
ग्रहवेधे व्यवस्थिताः ॥ सुहृदः शत्रवो मध्या क्षितिनीयाः प्र
यत्नतः ॥ ८८ ॥ स्वमित्रसमशत्रूणां वेधे देशादिषु क्र
मात् ॥ शुभग्रहः शुभं कुर्याच्चतुस्त्र्येकपादकैः ॥ ८९ ॥
स्वमित्रसमशत्रूणां वेधे देशादिषु क्रमात् ॥ दुष्टं दुष्ट
ग्रहः कुर्यादेकद्वित्रिचतुःपदैः ॥ ९० ॥ विद्धं पूर्णं
दृशा पश्येत्तत्पादेन फलं ग्रहः ॥ विदधात्यन्य
था ज्ञेयं फलं दृष्ट्यानुमानतः ॥ ९१ ॥ ॥

तदा चतुर्भिः पादैः शुभं देशस्य धत्ते मित्रश्चेत्तदा द्वित्र्येण शुभं ध
त्ते शत्रुश्चेत्तदा एकेन पादेन एवं वर्णमासादिनां शुभग्रहफलवि
चारेण शुभं तथा धातुमूलजीवाधिपविचारेण स्वमित्रादिविचा
रेण चतुस्त्र्येकपादैः शुभग्रहस्य वेधात् शुभं कल्पयेत् ८९
अथ क्रूरवेधविचारमाह स्वमित्रसमेति क्रूरग्रहस्य विचारे पूर्व
वत् स्वगृहे एकेन पादेन मित्रगृहे द्वाभ्यां समगृहे त्रिभिः पादैः शत्रु
गृहे चतुर्भिः पादैर्वेधात् दुष्टफलं कुर्यादिति ॥ ९० ॥ अधुना विद्ध
फलं दृष्ट्या प्रमाणयति विद्धं पूर्णं दृशेति यो देशाधिपतिर्वेधकर्ता
नो भंगमाहवे ॥ ११ ॥ मुखांगसंस्थिते सूर्ये चंद्रे चोदरसं
स्थिते ॥ अग्रयायी जयेद्युद्धे हलयानात्र संशयः ॥ १२ ॥
भास्करे गलितांगस्थे चंद्रे केत्वंगसंस्थिते ॥ स्थायी भं
गं समाप्नोति यायी जयति सततः ॥ १३ ॥

अधुना योगषट्कमाह ॥ राहुवक्त्रे स्थितेति सुगमम् ॥ ११ ॥ मुखां
गसंस्थितेति अत्र योगद्वये यायिनो जयः ओक्तः जीव
पदे चन्द्रस्य स्थितिवशात् ॥ किं च राहुवक्त्रनक्षत्रगमपि चंद्रां
गं अग्रगामी यायी मन्तः ॥ १२ ॥ भास्करे गलितेति ग
लिते राहुपृष्ठे केत्वंगं पंचदशमं नक्षत्रम् ॥ १३ ॥

५०

राहुधिष्ण्यस्थितेति अत्र षडंगचक्रे पृष्ठसंज्ञायोऽशाङ्गादिषड्वे
॥१४॥ राहुजिह्वांगतेति राहुधिष्ण्यात् द्वाविंशतिमादि सप्तनक्ष
त्रं रुद्रांगं उभयो राज्ञोः कटके शस्त्रपातेन विना आकुलता भवति
परस्परं भयं पतनं तेनास्माकं कटके शत्रुः पतित इति ॥१५॥ राहुधि
ष्ण्यस्थितो भानुरिति ॥१६॥ इति मुखादिषट्कम् हृदयस्य दिवाना
थेति हृदये जीवपक्षस्यादि सप्तनक्षत्रे जठरे जीवपक्षे सप्तनक्ष
त्राद् उपरि षष्ट्यन्तनक्षत्रे यथाक्रमं सूर्ये चंद्रे स्थिते अस्मिन् सति यदि
युद्धं तदा स्थायी संज्ञस्य मृत्युः स्थायी पश्चात्तेग गामी प्रथमा घा
तकारी वा स्थायी पोरसंज्ञो वा राजा अस्मिन्योगे स्वजयोपायं

राहुऋक्षस्थितो भानुश्चन्द्रे पृष्ठांगसंस्थिते ॥ स्थायि
नो विजयं युद्धे यायिनो मृत्युमादिशेत् ॥२४॥ राहुजि
ह्वांगते सूर्ये चन्द्रे रुद्रांगसंस्थिते ॥ व्याकुलो भवेन्नग तो
सैन्ययोरुभयोरपि ॥२५॥ राहुऋक्षस्थिभानुश्चंद्रः
तत्रैव संस्थितः ॥ न कश्चिज्जयमाप्नोति सैन्ययोरुभ
योस्तयः ॥२६॥ इति मुखादियोगषट्कम् ॥ हृद
यस्थे दिवानाथे जठरस्थे निशाकरे ॥ निर्दिष्टः स्था
यिनो मृत्युर्यायी भवति निर्भयः ॥२७॥ हृदयस्था
यदा भानुः शशांको गुदमाश्रितः ॥ हतयाजयते या
यी स्थायी च मृत्युतेरणे ॥२८॥ कामांगस्थे दिवा
नाथे पृष्ठषष्ठे निशाकरे ॥ स्थायिनो विजयं लेभे ॥
॥ यायिनश्च पराभवः ॥२९॥

कुर्यात्पुरपतिः भस्याभसंभटस्य विचार्य अन्यं पुरनाथं
कुर्यात् अथवा पोरोजा सकलबलैः समवेतः परचक्रा
गमोपरि स्वबलं प्रेष्य ततः कृत्वा पतेत् स्वयमेव यायी स्या
त् यतः प्रथमघातकारी यायीसंज्ञः कथितः ॥१७॥
हृदयस्थे दिवानाथेति ॥१८॥ कामांगस्थे दिवानाथेति
कामांगं जीवपक्षस्यादि सप्तमं पृष्ठषष्टकं मृतपक्षस्यादौ
षष्ट्यन्तनक्षत्रं ॥१९॥ संपुटस्योदयेति ॥ संपुटजीवपक्षस्या
दि सप्तकं रुद्रांगं मृतपक्षस्यांतिमसप्तकम् ॥२०॥ ॥

कामांगस्थे दिवानाथेति कामांगं जीवपक्षस्यादि सप्तकं तत्रस्थे रवौ ॥२१॥
हृदयांगे यदा पूर्णाविति किंच जीवपक्षे अंगद्वये स्थितौ सूर्याचंद्रमसौ
यदा भवतस्तदा यायिनामेव जयः यायी परचक्रागमः तथा चलु
लः यावत्स्वविषयसीमा नागरस्ह तावदुच्यते राजा लभते स
यायिसंज्ञां स्वविषयसीमां परित्यज्य ॥२२॥ इति हृदयादियोगब
द्धम् ॥ अथोदरादियोगबद्धकमाह ॥ उदरस्थे दिवानाथेति उदरे
जीवपक्षस्यो नरबद्धे ॥ उदरे पंचदशनक्षत्रे ॥२३॥ संपुटस्थो यदेति
संपुटे जीवपक्षस्यांत्यबद्धे ॥ पृच्छे मतपक्षस्यादि बद्धे ॥२४॥
कामांगस्थः सहस्रांशुरिति कामांगस्थे जीवपक्षस्यादि सप्तके म

संपुटस्थो यदादित्यो ह्यंगे चन्द्रमाश्रितः ॥ यायी
च भंगमाप्नोति किंचित्स्थायी जयी रणे ॥२०॥ कामा
गस्थे दिवानाथे चंद्रे राहुमुखस्थिते ॥ संग्रामे विज
यी स्थायी यायिनो भंगमादिशेत् ॥२१॥ हृदयांगे यदा
पूर्णौ चंद्रादित्यौ व्यवस्थितौ ॥ दैत्यान् विजये यायी किं
पुनर्मानवं बलम् ॥२२॥ इति हृदयादियोगबद्धम् ॥
उदरस्थे दिवानाथे निशानाथे तु दस्थिते ॥ समं युद्धं भवे
त्तत्र किंचि यायी जयी रणे ॥२३॥ संपुटस्थो यदा भा
नुः पृच्छे भवति चंद्रमाः ॥ यायी भंगो जयी स्थायी तत्र
काले न संशयः ॥२४॥ कामांगस्थः सहस्रांशुर्मस्तक
स्थो निशाकरः ॥ यातो भंगमवाप्नोति स्थानवासी जयी
रणे ॥२५॥ भानावुदरगे यत्र निशीशो राहुवक्त्रगः ॥
अग्रयायी जयी तत्र स्थाता जयति नान्यथा ॥२६॥
स्वर्भानूदरगो भानुर्हृदये तारकाधिपः ॥ आना
यासेन संग्रामे यायिनो जयमादिशेत् ॥२७॥

स्तकस्थे मतपक्षांतसप्तके ॥२५॥ भानावुदरगेति जीव
पक्षस्यादि सप्तनक्षत्रे उदरसंज्ञे रविः अग्रवादी यायी जय
ति नो स्थायी जयति ॥२६॥ स्वर्भानूदरगेति राहूदरांगं
जीवपक्षस्यावसानबद्धकं हृदयांगं जीवपक्षस्यादि सप्तकं
॥२७॥ उदरांगेति उदरांगे जीवपक्षस्यावसानबद्धम् तत्र
रविचंद्रौ अस्मिन्योगे यात्रा · यातु समागमो वा तेजस
थिरेव ॥२८॥ इत्युदरादियोगबद्धम् ॥

51

अथ गुदादियोगषट्कमाह॥ केतुर्धिष्ण्यस्थितेनेति केतुं गुं पंचदशा
मेन तत्र पुच्छांगं षोडशादिषट्॥ २९॥ गुदेतीत्यादि गुदांगं राहु
नक्षत्रात् पंचदशमं कपालमेतत्पक्षे आवमानसप्तकं॥ ३०॥ गुदर्क्षे
ति गुदगमं॥ ३१॥ भानुरुद्भिलितेति उद्भिलितं गुदतः पंचदशमं
संपुटसंज्ञं जीवपक्षस्यादि सप्तकम्॥ ३२॥ जठरं जीवपक्षस्यावसा
नषट्कम्॥ ३३॥ गुह्ये दिनकरेति गुह्यं गुदमिति पंचदशमं भागं
तुको यायी किंचिज्जयेत्॥ ३४॥ इति गुदादियोगषट्कम्॥ ॥
अथ वज्रांगयोगषट्कमाह॥ सूर्यांगस्य इति॥ ३५॥ पुच्छे तेनेति पुच्छां
गं मत्पक्षस्यादि षट्कम्॥ उरोगं राहुनक्षत्रम्॥ ३६॥ पुच्छषट्केति

उदरांगे यदा युक्तौ चंद्रादित्यौ व्यवस्थितौ॥ तदा संधिर्न
संदेहः सैन्ययोरुभयोरपि॥ २८॥ इत्युदरादियोगषट्कम्॥
केतुऋक्षस्थिते सूर्ये चंद्रे पुच्छांगसंस्थिते॥ यायी भंगो
जयी स्थायी भाषितं ब्रह्मयामले॥ २९॥ गुदेतीक्षणांशुमे
पुच्छे कपालस्थे निशाकरे॥ यायी च भुज्यते तत्र स्थायी जय
ति नान्यथा॥ ३०॥ गुदर्क्षे संस्थिते सूर्ये राहुऋक्षस्थितः शशी
महाहवो भवेद्घोरः किंचित्स्थायी जयी रणे॥ ३१॥ भानुरुद्भि
लिते ऋक्षे दशमे संपुटे तथा॥ यायिनो विजयस्तत्र
स्थायिनो भंगमादिशेत्॥ ३२॥ गुह्यांगे वर्तते भानुर्जठ
रे सोमे हि लिपतिः॥ दंडयित्वारिपोः सैन्यं जातामप्यति नि
जालयम्॥ ३३॥ गुह्ये दिनकरो यत्र तत्रैव यामिनीकरः
समं युद्धं भवेत्तत्र किंचिदागंतुके जयः॥ ३४॥ इति गुदादि
योगषट्कम्॥ सूर्यांगस्थः सहस्रांशुर्जिह्वायां शीतगुः स्थि
तः॥ स्थायिनो विजयं विद्यात् यायिनश्च पराभवः॥ ३५॥
पुच्छे तेत्र स्थितो भानुरुद्देशे तु चंद्रमा॥ यायिनो मृत्यु
प्याप्नोति जयलाभो च स्थायिनः॥ ३६॥ पुच्छषट्के यदा भानुः
कामांगे चंद्रमाश्रितः॥ यायी विजयते तत्र शक्रतुल्य
विवेरिणि॥ ३७॥ अंशुमाली भवेद्वज्रे जठरे तु सुधाक
रः॥ आदर्शे रश्मिं परित्याः सर्वान्यायी रणांगणे॥ ३८॥
भास्करे राहुयुक्ते स्थे मृगांके गुदमाश्रिते॥ समं युद्धं भवेत्तत्र
॥ किंचिद्यायी जयी रणे॥ ॥ ३९॥ ॥

कामांगं जीवपक्षस्यादि सप्तकम्॥ ३७॥ अंशुमालीति पुच्छ
षट्कं मत्पक्षस्यादि षष्ठ्यक्षत्रं जठरांगं जीवपक्षस्यावसानष
ट्नक्षत्रं॥ ३८॥ भास्करे राहुरिति [illegible] गुदर्क्ष ॥ ॥
राहुनक्षत्रात् पंचदशमम्॥ ३९॥ ॥

सूर्याचंद्रमसाविति वज्राङ्गं मृतपन्नस्यादिचक्रम् तेन किं मृतपन्ने
यदि सूर्याचंद्रमसौ भवतः अत्र योगे नागरपार्थिवस्य सैन्यद्वय वधः
॥४०॥ इति वज्राङ्गयोगचक्रम् ॥ अधुना षडंगे षष्ठमयोगमाह ॥ रुद्रा
गस्थे दिवानाथेति ॥ रुद्राङ्गं मृतपन्ने अंतिमसप्तकम् ॥४१॥ राहुशीर्ष
स्थितेति राहुशीर्षे मृतपन्नस्यांतिमसप्तके हृदयाङ्गे जीवपन्नस्या
दिसप्तकम् ॥४२॥ कपालस्थेति ॥ कपालं मृतपन्ने आननसानस
सप्तकमेव संपुटसंज्ञे जीवपन्ने अंतिमषट्केन तत्र ॥४३॥ कपालसं
स्थितेति कपालाङ्गं मृतपन्ने अंतिमषट्के एदसंज्ञे राहुभात्पंचदशमं ॥४४॥

सूर्याचंद्रमसौ यत्र वज्राङ्गे यदि संस्थितौ ॥ सैन्ययो
रुभयोस्तत्र वधो भवति निश्चितः ॥४०॥ इति व
ज्राङ्गषट्कम् ॥ रुद्राङ्गस्थे दिवानाथे रुद्रजि
ह्वागतः शशी ॥ स्थायिनस्तु जयस्तत्र भंगो भवति
यायिनाम् ॥४१॥ राहुशीर्षस्थिते मित्रे शशांके
हृदि संस्थिते ॥ विनायुद्धेन गृह्णाति यायी करम
रिश्रियः ॥४२॥ कपालसंश्रितः सूर्यः संपुटस्थो
यदा शशी ॥ यायिना जीयते शत्रुः स्थायिनो भंगमा
दिशेत् ॥४३॥ कपालसंस्थिते सूर्ये धिष्ण्यनाथेरु
द्रस्थिते ॥ यायिनो विजयो युद्धे स्थायिनस्तु परा
जयः ॥४४॥ राहुशीर्षस्थितो भानुः पृष्ठस्थो निशाक
रः ॥ अन्योन्यविग्रहं घोरं युद्धं भवति दारुणम् ॥४५॥ दि
नेशो राहुरुद्राङ्गे चंद्रस्तत्रैव संस्थितः ॥ विनाशं कोश
राष्ट्रस्य यायिनो मृत्युमादिशेत् ॥४६॥ इति यामली
यस्वरोदये षडंगयोगषट्कम् ॥ ॥ इति कपालादियो
॥ गचक्रम् ॥ ॥

राहुशीर्षस्थितेति राहुशीर्षं मृतपन्नस्यांतिमसप्तकम् ॥ भा
नुलेगं मृतपन्नस्यादिषट्कम् ॥ एतावता किं मृतपन्ने द्वाव
पि स्थितौ ॥४५॥ दिनेशेति मृतपन्ने अंतिमसप्तके चंद्रादि
त्यौ तदा नागरस्य कोशराज्यविनाशः यायिनो मृत्युः ॥४६॥
॥ इति नरपतिजयचर्यास्वरोदये षडंगराहुकालानलं समाप्तम् ॥

52

अथ राहुभादीनां अष्टाविंशतिनक्षत्राणां दशांगभेदेन दशांगराहुफ
लानि वदति हृदयादीनीति ॥१॥ पुच्छितमिति ॥२॥३॥४॥
क्रमेण नक्षत्रांगसंख्यामाह त्रीणि पुच्छित अर्कात्त्रीणीति जीव
पक्षस्यादि त्रिनक्षत्राणां पुच्छितसंज्ञा तत्र यात्राद्विधांगभेदेन जी
वपक्षे नृपानायेऽमृतपदे स्थिते रवावित्यनेन योगेन अपकारा
हुवक्रस्थिते सूर्ये चंद्रे कामांगसंस्थित इत्यनेन च जीवपक्षस्य
आदित्रिनक्षत्राण्यंतरे यायिनो राज्ञो यात्रायां क्षेमलाभकर्णी श
त्रोः पराजयः इदं फलं मासेनैव यात्राफलमिति ॥५॥ ततश्च
त्यादिधिष्ण्यानीति द्विधांगभेदेनैव यातुर्नृपस्य जीवपक्षेऽि

हृदयादीनि चांगानि जिह्वांतानि क्रमेण च दशसं
ख्यान्यहं वक्ष्ये राहुचक्रस्य मध्यतः ॥१॥ पुच्छितं कृत्ति
तं चैव निष्फलं उदितं तु हृदम् ॥ राजसं तामसं हृन्म
तं जिह्वां क्रमेण च ॥२॥ पुच्छिते त्रीणि चत्वारि कृत्ति
ते निष्फले त्रयम् ॥ उदिते त्रीणि अर्कात्त्रीणि गुदे चैकं
भवेत्तथा ॥३॥ राजसे त्रीणि अश्व्यालि तामसे च
तथा त्रयम् ॥ हृद्ये चतुष्टयं त्रीणि मतो चैकं तथा मु
खे ॥४॥ त्रीणि पुच्छित अर्कात्तालि क्षेमलाभकराणि
च ॥ शत्रुभंगो भवेद्युद्धे यात्रामासेन लाभदा ॥५॥ तत
श्चत्वारि धिष्ण्यानि पक्षे केन फलंति च ॥ गजवाजि
धनं देशं यायी तु लभते ध्रुवम् ॥६॥ अफलाख्य
त्रिधिष्ण्येषु वरमासे यायिनो गतिः ॥ संधिं सेवां तथा
॥ दशो या यायी प्राप्नोति नित्रितयम् ॥७॥

पुच्छितनक्षत्रादग्रे तेन चतुर्षु नक्षत्रेषु फलितसंज्ञेषु यात्रापंचद
शादिनाभ्यंतरे गजवाजिदेशधनानि ददाति यायिनो नृपस्य
॥६॥ अपत्तलीयांगयोगफलमाह ॥ अफलाख्येति । षडंग
भेदे० उदरांगे यदा युक्तौ चंद्रादित्यौ इत्यर्थेन यदि यायी जी
वपक्षे अफलाख्यधिष्ण्यत्रितये परविषयं याति तदा बल
मासात् यायिनागरयोः संधिर्भवति एवं यायिनो नृपात्
स्थायी देशं प्राप्नोति जीवनमित्यर्थः ॥ सेवां च प्राप्नोति अ
पर्यायी स्थायिनो जीवनं दत्वा सेवां स्वीकृत्य षण्मासात्
गृहमध्येति ॥ तथा च दैवयात्रायां बाहुल्ये संधिरादौ परिखल
रचितमिति बाहुल्ये संधिः कृपं निश्लो भवति परिखल
रचितः ॥ परिखले नदानेन स्थिरो भवति ॥ विना दानेन सं

दुःस्थिरो न स्यात् ॥ ७ ॥ अथ चतुर्थांगमाह ॥ फलं प्राप्नोतीति
जीवपक्षे अस्ति मत्रितारके अष्टिनसंज्ञेयाता आरिष्टन्दानां गोध
नानि गाश्च धनानि च लुंठयते इदं फलं वर्षेण भवति तत्र वि
शेषः गुदसंनिष्ठ तु भानुजे ठरेतो हि स्थिपतिरिति योजनगतो रा
जा दंडयित्वारिपोः सैन्यं पुनरभ्येति जीवपक्षबलात् ॥ ८ ॥
अथ पंचमांगफलमाह ॥ गुदऋक्षेति ॥ राहुनक्षत्रं च दशार्क्षं तद
पि जीवनपक्षे निर्दिष्टम् ॥ चंद्रादित्यौ यदा पृष्ठे जीवपक्षेव्य
वस्थितौ ॥ तत्र क्षेमं जयो लाभ इत्यनेन गुदर्क्षे यदि पार्थिव लाभा
र्थिन्स्य विजगीषु राजा परपुरं याति ॥ यदा पार्थिव लोकं फलं प्राप्नो
ति अधिकं परपुरनिवासिनो जयलक्ष्मी विवमनोरमां रूपयौवन

फलं प्राप्नोति वर्षेण अष्टिनैःमत्रितारके: ॥
गोधनान्यरिष्टन्दानां यायी लुंठति च ध्रुवम् ॥
॥ ८ ॥ गुदऋक्षे जयं लक्ष्मीं पद्मिनीं
प्रियवादिनीम् ॥ रूपयौवनसंपन्नां स्त्रियं प्रा
॥ प्नोति निश्चितम् ॥ ९ ॥

संपन्नां कन्यां प्राप्नोति मासेन यात्राफलं भवतीति गुदनक्षत्र
स्य बलात् ॥ अथ षष्ठांगफलमाह ॥ मत्तपक्षे आदौ त्रीणि नक्ष
त्राणि राजसंसंज्ञानि तत्र यात्राफलं राजसाख्ये तत्पक्षे
यदि चेन्द्रादित्यौ ॥ हृदयादीनिति ॥ हृदयं योगमारभ्य जिह्वान्तानि
जिह्वापर्यंतं दशसंख्यान्यंगानि राहुर्क्षे राहोर्यदा मीत्यर्थः
तेषां दशांगानां नामान्याह ॥ पृष्ठेन केलितमिति ॥ राहुभुक्त
नीति यानि जीवपक्षसंज्ञानि तदारभ्य दशांगानि विभ
क्तानि ॥ तत्र राहुस्थितनक्षत्रागमतः जीवपक्षत्यादि हृद
यादि संज्ञकानि ॥ पंचांगषडंगचक्रे विभक्तानि संति
पुनस्तान्येवांगानि दशांगेन विभज्यंते ॥ तथा च ॥ हृदयसंज्ञ
कानि सप्तऋक्षाणि ॥ तन्मध्ये आदौ त्रयाणां पृष्ठेन संज्ञा
तस्मिन्नक्षत्रे राज्ञां यात्राफलमाह ॥ त्रीणि पृष्ठे नक्षत्राणि
ति सुगमम् ॥ ततो हृदयांतेषु पृष्ठेन संज्ञा ॥ ततश्चत्वारि सि
ध्यानीति एतेषु चतुर्षु नक्षत्रेषु परपुरग्रहणकामी यदि
व्यवस्थितो भवति तदा मासेन गजवाजिधनानि लभते गज
स्य वाजिनो धनस्य वा दंडेन लाभः संग्रामे यायी जयी भवति ॥

अन्योपि जातोधनानि लभते अथ जीवपक्षेपि हृदयाख्यसंतत
त्रायेव लग्नत्रयाख्यद्र संज्ञकानि तथादित्रयाणां नित्यत्वसंज्ञा तत्फ
लं अथ लेखिविधि जीवपक्षे विष्णुसंज्ञक नक्षत्रे यदि परदेशं प्रति
राजा यायी भवति तदा तस्मात् सकाशात् यायी परस्परं तथा यात्रां सिद्धिं
लभते सेवां च लभते तथा आदेशं च आज्ञां देशं वा इदं निश्चितमेव
परं वरगमात् परिमितकालेन अथ लग्नाद्ये त्रीणि नक्षत्राणि उदि
तसंज्ञकानि तत्रगतस्य फलं फलं प्राप्नोतीति आगतस्यापि
नो वर्षेण फलं भवति इति तात्पर्यं जीवपक्षे अथ नराख्यपद
संज्ञं नक्षत्रं तत्रगतस्य फलं ग्रहस्थे तेजयं लक्ष्मीति यायी जयं प्रा
प्नोति जयलक्ष्मीं च तदुपरि यथायोग्यं पद्मिनी डियवादि नीरू
पयौवनसंपन्नां स्त्रियं प्राप्नोति यथायोग्यमित्यत्र स्वोत्ताधिप
तयः शत्रुभूपती नां स्त्रियमभिलषंति कन्यां वा द्रव्यं वा सो वप
जीवपक्षे गान्यभिहितानि एतदुपरि मृतपक्षे अंगानि कल्पयि
फलानि तथाराहो गुदाये दृष्ट ताराणि त्रयाणां यत्राराजससं
ज्ञा तदग्रे त्रयाणां तामससंज्ञा तत अनुत्तं हृदूसंज्ञा ततस्त्रया
णां मृतसंज्ञा तदग्रे राहुनक्षत्रे जिह्वासंज्ञा ॥१८॥ एवं

कोणांककोष्ठाः फलमाह ॥ अथ राजसारस्य फलम् ॥ विग्रहस्येति ॥
वर्षपर्यंतं यात्रासमाप्तिः परमते नक्षत्रे दिने दिने वर्षपर्यंतं
विग्रहस्य वृद्धिर्भवति युद्धस्य निवृत्तिः ॥ तत्र कदाचिद्रोगपीडात
54 दुपरि यात्रापरिसमाप्तिसमये युद्धं भवति ॥ तस्मिन युद्धे भंगः
पलायमानः स्वदेशमायाति ॥ १० ॥ अथ तामसारस्य फलं ॥
हस्तस्येति यदि गर्वात्कोशबलसंपन्नः परपुरं यायाद्गच्छ
ति तदा वर्षमासैरेव एतानि फलानि लभते ॥ हस्तस्य पुत्रमि

विग्रहस्य भवेद्वृद्धिर्युद्धे भंगस्तथैव च ॥
रोगपीडा भवेद्दुर्गे राजसारे स्थितारके ॥ १० ॥
हस्तस्य पुत्रमित्रादिदेशकोशपरिग्रहः ॥
वृद्धिर्मासे । विनश्यंति यायिनस्तामसे गये ॥ ११ ॥
तामसोगे च तुर्ये च तारकाहुसंसका ॥ सर्व
नाशकराः सौम्ये मासेकेन न संशयः ॥ १२ ॥
ततस्त्रिमत्स्यकर्णाशिरशोमत्स्यकरास्थि च ॥
अर्थनाशश्च युद्धं च पलेके न फलं स्मृतम् ॥ १३ ॥
युद्धे भंगं महाभीतिर्द्रव्यनाशं कुलान्तये ॥ सघोम ॥
तुलभे यायी राहुचक्रे सुनिश्चितम् ॥ १४ ॥

आदयः शत्रिपक्षाहताश्च विनश्यंति स्वयं तु परदेशागतो जेतुं ॥ अत्र
स्वराज्ये तस्य मासपरिग्रहादयोंतः पुरचराश्च लीयंते न लाभवंति
॥ ११ ॥ अथ वह्नुसंज्ञांफलमाह ॥ तामसोगेति ॥ १२ ॥ अथ मत्स्यफल
माह ॥ सर्परूपी राहुः तस्य रवामन्त्रनयाच तस्य विवकृत्कारात्म
ततस्त्रालि तेषां फलं ततस्त्रिमत्स्यरिति ॥ १३ ॥ अथ जिह्वा
फलमाह ॥ युद्धे भंगमिति ॥ १४ ॥ इति नरपतिजयचर्यास्व

॥ रोदयटीकायां जयलक्ष्म्यां दशांगराहुः ॥

भुक्तकालेति। गत्यासन्ने परचक्रं आवश्यके परपुरगमने यदि युद्ध
यात्रायोगः स्थिरचक्रे न लभ्यते॥ तत्काले कोपि ॥मलपत्रे वि: आयो
गलाभे- उदयाद्दिवाकरे न्दशीशा वल्पादनीयो कस्मिन्काले जीवपु
तो लभ्यते जीवपते आते तत्तत्काले चंद्रादित्यो शकुकालानल
चक्रे हृदयायुंगेसातो भवतः॥१॥ तदर्थं तत्कालीनकरणमोहर
ण्यादी मार्ग इष्टानाड्यस्ति॥ अस्मिन्नवंते तोरवीन्दु तत्काल नक्षत्र
स्यो सातव्यो भवतः॥ तत्रकरणं यथा ॥अश्विनीनक्षत्रस्य घटी २
पल ३५ इष्टानाड्यो हताधिष्ण्यै रित्यादिकरणेन गुणितं जातं ६।४५
षष्ट्यालब्धं नक्षत्रमेकं १ गतं तत्तो भरणीस्य चंद्रो जातः॥ एवं क्रिय
माणे अश्विनीप्रारंभसमयात्॥ अश्विन्यां तेभ्यात्तत्काले अश्विनी

भुक्तकाले यद्दाशी पुंयात्रायोगो न लभ्यते॥ उत्पाद्यो
तोत दाशी पुं तत्कालेंदुर्दिवाकरो ॥२॥ इष्टना
ड्यो हताधिष्ण्यैः षष्टिभागात्तशेषको॥ अश्विन्यादि
दुभुक्ते न युक्तं तत्कालचंद्रमाः॥२॥ चंद्रवत्साधयेद
र्कं नक्षत्रस्यं चेष्टकालिकम्॥ यतो हो रात्रमध्येतो वि
भातो धिष्ण्यमंडले ॥३॥ स्थिरचक्रे यथायोक्तं चंद्रा
दित्य फलाफलं॥ परचक्रे तेनैवप्रकारेण फलं वदेत् ॥४॥
व

रवती चपभुक्ता भरणीगतश्चन्द्रः एवं सर्वेषु नक्षत्रेषु तत्कालकी कर
णं ज्ञातव्यं॥ यदा पुष्यादिघटीषु तत्करणं तस्य पुष्यभुक्ते घटिका च
त्वारः पलानि ४।।५४ इष्टानाड्या हताधिष्ण्यैरित्यनेन गुणिते जा
तं १३२।१८ ३९ षष्टिभक्तभागे लब्धं नक्षत्रद्वयं २ शेषं १२।।१८
भोग्यनक्षत्रस्य अत्र पश्चात् भुक्तनक्षत्रं चन्द्रस्य समेतेन तस्मात् नव
भुक्तनक्षत्राणि तत्काले यथा यां चंद्रोस्ति ॥२॥ तथा चंद्रवत्साध
येदर्कं॥ अथ सूर्यस्यो दाहरणं॥ रोहिण्यार्कः २० एवं वत्स द्वाविंश
तिगुण्या २७ जातं ५४ लब्धं ९ शेषं ० रोहिण्या नक्षत्र चतुः ४
संयुक्तं जातं १३।० हस्तनक्षत्रे घटी ० प० ३ तत्रापि मतिविचारेण कन्या
राशौ तत्काल सूर्यः॥ एवं भौमादयोपि कार्याः॥ आचार्यस्य सूर्याचंद्रम
सोः प्रयोजनम् ॥३॥ स्थिरचक्रे यथायोक्तं इति॥ स्थिरचक्रे पंचांग
दर्शांगे चंद्रादित्य प्रवेशेन फलाफल भुक्तं स्थिरचक्रमिति किं यतो
रविर्जीवांग मतांगे विप्रपक मास षट्कं तिष्ठति अतः स्थिरचक्रं
इदं तत्काल चक्रं चरचक्रं यतो दिने दिने चतुर्दशादिन पर्यंतं यस्मिन्
ले प्रवर्तमान सदारम्य सप्तविंशति नक्षत्रं भुंक्ते चंद्रः पुनरेक नक्षत्रस्य: व
सप्तविंशति नक्षत्रं भुंक्ते॥ अत स्तत्काले चंद्रादित्यो समुत्पाद्य योयो
॥॥ स्थापी बलं देयम्॥ ॥४॥॥

सर्वेषु शुभकार्येष्विति मुखपुच्छकपालस्थेति ॥ श्लोकद्वयस्यार्थो ऽवगम्यते : मनसा लक्षमभ्यस्यात् यतो हृदयादिअंगत्रयं ज्ञायते मुखाद्यंगत्रयं मतत्वप्रज्ञे ॥५॥६॥ अथ शुभकार्ये फलमाह ॥ गुरुसंपु

55

टगेति नंदति द्वयं वरकन्याद्वयम् ॥७॥ अथान्यत् शुभफलमाह ॥
पुच्छिते फलितेति ॥८॥ अथान्यदाह ऊर्ध्वं तु खेचरमिति यच्च
प्रस्तावसरे व्याख्यायते ॥ ऊर्ध्वं तु खेचरं चक्रमिति किं ज्ञातव्यं च
क्रं प्रथमम् उक्तं प्रश्नान्तरं चक्रम् ॥ उभयोरूर्ध्वाधरत्वात् । खेचरभू
चरचक्रमुच्यते ॥ यत उक्तं पुनरार्द्धश्लोके उभयोः सन्निपातेनेति
भूचरगाः खेचरगा अपि प्रोक्ताः चक्रपालिनाकस्य तन्नाम्ना भूचर
संस्थाः खेचराः उक्ताः स्वर्भानुमार्गगा यतो दिनकरमार्गोपगताः खेच
रचक्राश्रिताः पूर्वैः ॥ ये स्वर्भानुमार्गगाः वक्रगतयः ते भूचरसंज्ञकाः ॥

सर्वेषु शुभकार्येषु यात्राकाले विशेषतः ॥
सर्वकाले शुभं प्रोक्तं ते पोहादिदं तदरे ५ ॥
मुखपुच्छकपालस्थे शशांके राहुवक्रगे ॥
बंधनं हानिमृत्युश्च सर्वकार्येषु जायते ॥ ६ ॥
गुरुसंपुटगे चंद्रे विवाहे नंदति द्वयम् ॥ नैः ॥
संविद्धं वैवधव्यं मुखपुच्छे च मस्तके ॥ ७ ॥
पुच्छिते फलिते धिष्ण्ये प्रश्नकाले शशीशु ॥
भः ॥ अफले कटिले मध्ये मृत्युः शेषांगगे वि
धौ ॥ ८ ॥ ऊर्ध्वं च खेचरं चक्रमधो भूचरमुच्य
ते ॥ उभयोः सन्निपातेन राहुकालानलं मतम् ॥ ९ ॥

ये दिनकरमार्गोपगताः कोऽर्थः शीघ्रगतयस्ते खेचरा ग्रहाः खेच
रसंज्ञकाः । अथवा राहुमार्गगाः यस्मिन् नक्षत्रे राहुः संचरति तस्य
मुखानि नक्षत्राणि चतुर्दश तत्संस्थिता ग्रहाः भूचरसंज्ञकाः ॥
येचरा राहुगतनक्षत्रादग्रे चतुर्दश नक्षत्रस्थाः खेचरसंज्ञकाः ते

वि मेहे रवि याथि स्पष्टं व लभुक्तं ॥ यथा ॥ कृत्तिकास्थो राहुस्तदग्रे
रोहिणीप्रभृति चतुर्दश नक्षत्रस्थाः खेचरसंज्ञकाः ॥ भरणी
प्रभृति वामं भरणी अश्विनी रेवती त्यादिकं मूलं चतुर्दश
नक्षत्रस्था ग्रहाः भूचरसंज्ञकाः ॥ अनेनाभिप्रायेण यथा राहु
कालानलचक्रे द्विधांगे ऊर्ध्वाधरतया खेचरभूचरचक्रमुक्तं ॥
अत एव तत्काले रविचंद्रौ तत्कालनक्षत्रगतावानीय बहुभिः
पापैरिष्टकैः येनैर्ग्रहयासिद्धिरुक्ता येन चन्द्रलग्ने पापी
भज्यते क्रियते सैन्यं तयं याति सैन्यावर्तादियोगैर्ग्रहयासिद्धि

भवति॥ स्थायीभंगादियोगेऽपि यत्रकुत्रापि खेचरभूचरचक्रे
भंगयायेवप्रोक्तं॥ तत्रापि इदमेव यथा भूचरचक्रे खेचरचक्रे यायी
स्थायीबलं भूचरचक्रगाः पापाः स्थायीजयति विद्विषः। यायी
नथैव खेचरचक्रे जयदाः शुभदायिनः॥ यायीभंगमवाप्नोति भू
चरस्थैः शुभाशुभैः॥ नागरो जयमाप्नोति सैन्याद्येषु चतत्पंगते॥॥
यायीविजयतेनूनं खेचरस्थैः शुभाशुभैः॥ स्थायिनः सततस्था
पि जायते न बलक्षयः॥ भूचक्रगैः शुभैः खेटैः पापैः खेचरमाश्रि
तैः॥ बलक्षयं तयं याति राज्ञो जीवितसंशयः॥ मिश्रं फलं वदेन्मिश्रैः
भूचरे खेचरे गतैः॥ शुभाशुभैर्द्वयो राज्ञोरेवं शंसस्थायियायिनोः॥
एतेश्लोकार्थैः भूचरसंज्ञं खेचरजीवपक्षस्थ तप तत्र विषयमि
त्यस्माकं मतं॥ इति तत्काले राहुकालानले खेचरभूचरचक्रं॥॥

अथ त्रिधा चतुर्ध्यांगराहुचक्रमुच्यते॥ कुमारविजये॥ चा
तुरंगसूचनायां चतुरंगराहुः॥ शलाकासप्तके चक्रे मुखे द
ण्डं च सप्तकं॥७॥ राहोः स्कंधे च सप्तानि॥७॥ सप्तचैवतथोदरे॥७॥
कटिदेशे तथा सप्त ७॥ चातुरंगकनामके॥ राहुभुक्तादितः स्थाप्य
सृष्टिमार्गव्यतिक्रमे॥ योधभंतगतं यत्र तेषां तत्र शुभाशुभम्॥
मुखे भूत्युभयं स्कंधे जयंचैव तथोदरे॥ कटौ पातभयं प्रोक्तं चिं
तनीयं च संगरे॥ मुखस्थितगते योधाजीवयोगे तु मध्यमः॥ श
नियोगे शिरश्छेदं भौमयोगे महद्भयम्॥ पलायते कविपुत्रो ना
निभद्रं शशांकजे॥ मृत्युभूंङ्गमसौयोगे शाल्मल्यजति केतुना॥
महद्भयकरो भानुश्चातुरंगगतेसति॥ मुखादिस्थितेन तत्रैव यदि
योद्धा पुरुषायगतो भवति॥ तन्नतत्रस्थे जीवादिग्रहैर्यत्फल
मुक्तं तदवधार्यम्॥ इति मुखग्रहयोगः॥॥ स्कंधस्कंधेगतो यो
धाजीवेन जयदो भवेत्॥ शुक्रे शल्योपरित्यागी भंगी सूर्यसुतेन च॥॥
पादस्खलनदो बोधः सूर्यः शत्रुं वशं नयेत्॥ गात्रछेदकरो भौमः
शस्त्रभ्रंशयते विधुः॥ स्वशस्त्रलोमतिं याति केतुयोगे न संशयः॥
इति चातुरंगे स्कंधगतयात्राफलम्॥ उदरस्थंगतो योधा जीव
योगे महाजयः॥ शुक्रेण सन्मुखः शत्रुः समयुद्धं शनैश्चरे॥
रवियोगे जयं विंद्यात् स्वकापेक्षेभयं भवेत्॥ परं जयति भौ
मेन चंद्रजे चातिशूरता॥ पुत्रसंडिकरः केतुर्योधयोरुभयो
रपि॥ इत्युदरगतग्रहयोगफलम्॥ कटिदेशगतो जीवो
व्यातनकुरुते रणे॥ समता भार्गवेयोगे शनियोमहद्भयम्॥
रंगे

सूर्ये शत्रुवशित्वं च चंद्रे हानिर्विनिर्दिशेत् ॥ मारयति रणे भौमो
बुधः क्लेशं करोति च ॥ पलायनकरः केतुर्धर्मे केतुस्तली यदि ॥ विंश
तिस्थः शिखी केतुस्त्रयोविंशतिनाशकृत् ॥ पंचधा केतवस्त्वे
ते महोग्रा ब्रह्मणः सुताः ॥ अन्यशास्त्रोदितास्त्वानसंग्राम
फलप्रदाः ॥ कथितं युद्धे द्वंद्वयुद्धे चातुरंगमहाहवे ॥ चिंतनीयं प्रय
त्नेन गणकैर्जयकांक्षिभिः ॥ इति चातुरंगकेतवः ॥ अथ
चतुर्दशांगरुद्रचक्रम् ॥ शलाकासप्तकं चक्रं लिखेत्तत्स्थानतः
सुधीः ॥ चतुर्दशांगचक्रे च महारुद्रमिति स्मृतम् ॥ दिनभात्कल्प
येदंगनामानि चतुर्दश ॥ आद्यः शूलं १ त्रयं कीलं ३ द्वयं लोलं
द्वयं मतिः २ ॥ विजयी द्वे २ द्वे च कूलाख्यं २ क्रूरं चैव द्वयं स्मृतं २ ॥ रं
त्रयं पाली ३ मतिस्तोलिः ३ चोल्काद्वे २ द्वे विनाशकः ॥ वज्रे द्वे २
तु हनुश्चैकं १ दंष्ट्राप्येकं १ मुखाख्यकम् ॥ यदंगे यो दमं तिष्ठेद्यु
द्धकाले फलं वदेत् ॥ अर्केत्यजति शूले च कीले विजयमादि
शेत् ॥ अरोधावति लोलस्थे मतिस्थो चालयंचकः ॥ विजये वि
जयी योधः कूले चैव पलायनम् ॥ क्रूरे हानिरणे घाता स्याः पालि
स्थे शत्रुसंयुतिः ॥ मतिस्थे मरणं याति चोल्कास्थे याति भंग
ताम् ॥ विनाशे नाशमायाति वज्रेप्येवं फलं भवेत् ॥ योधमेहनु
दंष्ट्रास्थे योधः कालेन गच्छते ॥ शुभस्थानगतः क्रूरः शोभनैर्यु
दिवी स्थिते ॥ तदा द्विगुणमायाति यदुक्तं शोभनं फलम् ॥ पापे वि
द्धे भयं भंगं तद्भिन्नं वर्जयेद्युधि ॥ वक्रपापैर्ग्रहैर्विद्धे संग्रामे
योधभंगं भवेत् ॥ तद्वेधं मनः स्मरः संग्रामाद्विनिवर्तयेत् ॥
शुभस्थानगतो राहुर्रुद्रचक्रे विनश्यति ॥ राहुमर्दनगतो यो
धी यदा भवति पंचमे ॥ बलं त्यक्त्वा व्रजेद्राजा मंत्री शास्त्रे
ण हन्यते ॥ योधस्त्वाद्दशमे भौमः स्वपक्षे हन्यते नृपः ॥ योध
शब्देन सर्वत्र नृप एव योधशब्देन योधमंगच्छते ॥ इति प्रथ
मचतुर्दशांगम् ॥ चतुर्दशांगचक्रेस्मिन् योधमादि लिखेद्बु
धः ॥ शूलस्थे वदने घातं नक्षत्रे पावसंयुते ॥ कीलस्थे मस्त
केप्येवं लोले वामभुजांतरे ॥ मतौ हल्ले वदेद्वामे विजये वा
मपादके ॥ जयाख्ये कुलतो घातः कूले तु जठरे स्मृतः ॥ पालि
काहृद्देशे तु मतिस्थे स्कन्धयोर्द्वयोः ॥ उल्काख्ये भुजदेशे
तु विनाशे दक्षिणे करे ॥ वज्राख्ये दक्षजंघायां हनुदंष्ट्राख्य
पादके ॥ क्रूरस्थाने वदेद्घातं चंद्रयोगविशेषतः ॥ अथ था
ते स्वबलम् ॥ दक्षपक्षगताः पापाः घातदा न भवंति हि ॥ सन्मुखा
वामभागस्था भवंति घातदायकाः ॥ क्रूरा स्युर्दक्षिणे यस्य शोभना
॥ वामभागगाः ॥

तदाश्रुते भवेद्योधा विपरीतात्तु भंगदः ॥ यस्मिन्नृक्षे समं घातं द्विगुणं च व
क्रगे ग्रहे ॥ क्रूरे चैव स्वराशिस्थे घातं चैवार्द्धकं भवेत् ॥ मित्रग्रहे तु पा
दोनं समे सर्वं गुरुयेति ॥ क्रूरे तु शत्रुभे प्राप्ते द्विगुणं छेदनं तनोः ॥ स
मवृद्धश्च संस्थस्तु यदि वक्रगतिः स्थितः ॥ त्रिगुणं चतुर्गुणं छेदं
करोतीह न संशयः ॥ ऊर्ध्वदृष्टिर्ग्रहे शत्रुरूर्ध्वहस्ते न घातयेत् ॥ अ
धो दृष्टिरधो घातं तिर्यक् दृष्टिर्द्विपादयोः ॥ विचिंत्य घातं कुर्वीत
चंद्रयोगे विशेषतः ॥ इति चतुर्दशांगघातचक्रम् ॥ आर्द्रा
दौ तु मृगः स्यांतं मध्ये मूले व्यतिष्ठितम् ॥ भुजंगसदृशाकारं काल
चक्रस्य निर्णये ॥ रवींदु नाम नक्षत्रमेकनाड्यां भवेद्यदि ॥ तस्य
कालं विजानीयादित्युक्तं ब्रह्मयामले ॥ ॥ अथ राहुसंपातचक्रम् ॥
ऊर्ध्वरेखात्रयं कार्यं तिर्यग्रेखात्रयं पुनः ॥ कोणे चैव द्विकं कार्यं शृं
गयुग्मं कृताङ्कके ॥ ऊर्ध्वाधो मध्यरेखायां सात्रिशूलसमावृता ॥ मध्य
चंद्रसमा रेखा कृता उत्ताग्निकोणयोः ॥ ऊर्ध्वशूलस्य मध्यस्य राहुके
तादितः फलम् ॥ योधमंपतितं यत्र वस्ये तस्य शुभाशुभम् ॥ मृतिर्मो
हो जयं लक्ष्मीः क्रमाद्राहोचतुष्टये ॥ अग्निकोणं तु चंद्रे तु शत्रुं जय
ति संगरे ॥ तदग्रे जितयं सोम्यं विजयो नैर्ऋतिद्वये ॥ तदग्रे चैकरेखा
यां सा सदाशुभदा स्मृता ॥ अधः शूलत्रये मृत्युस्तदग्रे शुभसंततिः ॥
बंधनं मरणं घातं युद्धे शूलकत्रये ॥ क्रमादत्र त्रये व्यवं योधकृत्त
गते सति ॥ मारयति रणे राहुरीशानादि प्रपंचके ॥ राहुसंघातकं चक्रं
संगोप्यं जयकांक्षिभिः ॥ इति राहुसंपातचक्रे प्रथमो भेदः ॥ ॥
यस्मिन् चक्रे द्वयं तेत्रं जीवं मृतकसंज्ञकं ॥ भोग्यं तत्र मृतं शेयं भुक्तं
जीवं चतुर्दश ॥ जीवपक्षगते चंद्रे मृते भास्करसंयुते ॥ कृतकामप्र
दा यात्रा विपरीता भयप्रदा ॥ चंद्रार्कौ जीवपक्षस्थौ यात्रासिद्धिक
रौ मतौ ॥ विपरीतांगसंस्थौ तौ सर्वकार्ये प्रविघ्नदौ ॥ कालानलमु
खस्थौ च सर्वकार्ये प्रनिंदितौ ॥ विनाशकमिति ख्यातम् तारा हो श्रु
तुर्दश ॥ ॥ जीवपक्षे महीशस्य यात्रा श्रेष्ठा प्रकीर्तिता ॥ विप
रीता समाख्याता संगरे भंगदा सदा ॥ उदितस्वरवर्णे च नवैकार्या
प्रोगमाः ॥ कुमाराकाश्वेतो देया ह्युत्तरस्थे नियोजिताः ॥ कलिपयाः
समरे भूपैः कर्तव्या जयकांक्षिभिः ॥ इति राहुसंपातद्वितीयो भे
दः ॥ अस्मिन् चक्रे प्रवक्ष्यामि चक्रं विजयसंज्ञकम् ॥ दिनक्षमा
वरे रेखायां मध्ये शूलत्रये फलम् ॥ योधमं जायते यत्र तेयं तत्र शु
भाशुभम् ॥ आये १ मृत्युद्वये हानिः २ जयं चैव चतुष्टये ॥ द्वये श्रः
परान् हंति विकलो विजयी त्रये ॥ व्यापादकै द्वयेनाम नक्षत्रं स्वमृत्यु

॥ न लोभेन भये स्नेहे नैद्रं यं कार्यकारणैः ॥ काला
नलमिदं चक्रं गोपनीयं प्रयत्नतः ॥ २० ॥ चिरका
लस्थिते भुक्ते सुपरीक्ष्य पुनः पुनः ॥ तस्मिन् ऋषि
भ्यो प्रदातव्यं राहुकालानलात्मकम् ॥ २१ ॥ ॥

दृष्टतम् कृत्तिकानामकापंचरणे पंचतत्त्व दायकाः ॥ भयं भं
गरुजो हानिं तदग्रे क्रतु कत्रये ॥ रेखे द्वे उद्वकोणे तु नि ॥

ख्यलेपरिकीर्तिते॥ वृंदपुंद्वेच पुंद्वेच नामके नामसंज्ञकम्॥

॥इति श्रीनरपतिजयचर्यायां स्वरोदये॥
॥राहुकालानलं चक्रं समाप्तम्॥ ॥

शुभस्थानगतो योधा विध्यते पापखेचरैः॥ जयमेति रणेध्रुवं
सौम्यैश्च दृष्टफलप्रदम्॥ विचार्य कार्यं तत्त्वज्ञैश्चक्रे विजयसं
ज्ञके॥९॥१०॥११॥ इति तृतीयसंपातराहुचक्रम्॥
अथ सूर्यकाला०॥ ऊर्ध्वगास्ति त्रिशूलाग्रेति॥१॥ मध्यत्रिशूलदंडा
धोरिति॥२॥ नामर्क्षकेति॥३॥ कोणस्थकेति॥४॥ सूर्यभादिति॥५॥

ऊर्ध्वगास्ति त्रिशूलाग्रास्तिस्रस्तिर्यक् च संस्थिताः॥
द्वेद्वे नाड्यौ स्थिते कोणे शृंगयुग्मं तथैकधा॥१॥
मध्यत्रिशूलदंडाधो भानुभायंममंडलं॥ सामि
जिच्च श्रवणत्वं सव्यमार्गेण सर्वदा॥२॥ नामऋक्षं स्थि
तं यत्र ज्ञेयं तत्र शुभाशुभम्॥ अधोगते स्थिते नक्षत्रे
रुद्वेगो वधबंधनम्॥३॥ कोणस्थके जयो लाभः कु
क्षिषट्के तथा पुनः॥ शृंगयुग्मे रुजो भंगो मृत्युः शूल
त्रये स्फुटम्॥४॥ सूर्यभात्त्रिचतुःपंचरससप्ताष्ट
गोमिते॥५॥ विवादे विग्रहे युद्धे रोगार्ते गमने तथा॥
सूर्यकालानलं चक्रं ज्ञातव्यं च प्रयत्नतः॥६॥ रोगे
च कुजनक्षत्रे दिनऋक्षं तु युद्धके॥ प्रयाणे ह्येकत्रिका
ले रव्यंमन्यत्रार्कं प्रदीपते॥७॥ इति सूर्यका० चक्रं स०॥

विवाहेति॥ ऊर्ध्वगतास्त्रिरेखाः कार्याः तथा रेखात्रयं तिर्यक् कार्यं ईशा
नाग्नेयनैर्ऋत्यवायव्येषु द्वे द्वे रेखे कार्ये ऊर्ध्वरेखात्रयोप
रि त्रिशूलं देयं शूलत्रयाधो रुद्राग्नेयकोणयो रेखां चंद्रवद्
द्विखेकाकार्या तदग्रे गोशृंगयुगं एवं चक्रं निर्माय सूर्यभं मध्य
दंडाधो निवेश्य प्रादक्षिण्योपविष्टो वातादिकोणमारभ्य गणयति
भानि लिखेत्॥ विवाहादिषु यत्र नक्षत्रं तत्फलं वदेत्॥ सूर्यभा
त्त्रिचतुःपंचादिसप्ताष्टगतं गम्ये च शुभं वदेत्॥ इतरेषु अशुभ
मित्यर्थः॥६॥७॥ इति सूर्यकालानलं चक्रं समाप्तम्॥

अथ चंद्रकालानलं चक्रम् ॥ चंद्रकालानलेति ॥१॥ पूर्वत्रिशूलम
ध्यस्थेति ॥२॥३॥ त्रिशूले प्रभवेन्मृत्युरिति ॥४॥ वर्जनीयमिति ॥५॥

चन्द्रकालानलं चक्रं व्योमाकारं लिखेन्नरः ॥ चतुर्दिक्षु
त्रिशूलानि मध्यभिन्नानि कारयेत् ॥१॥ पूर्वत्रिशूलम
ध्यस्थं दिनऋक्षादि लिख्यते ॥ त्रिशूले च बहिर्मध्ये म
ध्ये बहिस्त्रिशूलके ॥२॥ नामऋक्षं स्थितं यत्र ज्ञेयं त
त्र शुभाशुभम् ॥ त्रिशूले चक्रवाले च चक्रमध्ये तथै
व च ॥३॥ त्रिशूले प्रभवेन्मृत्युर्मध्यमं बहिरृक्षके ॥
लाभः क्षेमो जयः प्रज्ञा चन्द्रे गर्भे न संशयः ॥४॥ वर्ज
नीयं प्रयत्नेन प्रथमाद्य त्रिपंचकम् ॥ ऋक्षं तं द्वाविंश
कं चात्र कालरूपं न संशयः ॥५॥ दिनभाद्भत्रयं शू
ला त्रितयं च चतुर्दशात् ॥ चंद्रकालानले काल
एकविंशतिनक्षत्रये ॥६॥ लाभालाभं सुखं दुःखं
जयं चैव पराजयः ॥ चंद्रकालानले चक्रे ज्ञानं स
र्वाय वर्जितं ॥७॥ चंद्राद्यृक्षे जयो लाभो मध्यश्च
लाद्यृक्षके मतः ॥ राद्यृक्षे भवेद्व्याधिर्मृत्युः केतुचे
तुर्थये ॥८॥ ॥ इति चंद्रकालानलं [illegible] ॥

दिनभादिति ॥६॥ मध्यभिन्नानीति पूर्वपश्चायाम्योत्तररेखाभ्यां चं
द्रस्य मध्यं भिन्नं भवति ॥ कास्य मध्यन तत्र लिखनार्थत्वात् ॥ मध्यायुग्म
इति ॥ पूर्वत्रिशूलमध्यात् युग्मे मंगयुग्मे नक्षत्रद्वयं २ तदधो वा स्थे एकं १
तदधो चंद्रोदरे एकं १ पुनर्दक्षिणरेखासमीपमध्ये एकनक्षत्रं देयम् ॥
तदुपरि कासे चंद्रपरिधावेकं एवं त्रिशूलत्रय एकैकं एवं क्रमेण व
हिर्मध्ये ततो वाले शूलत्रये क्रमादिति चक्रोद्धारः ॥ इति चंद्रका
लानलं चक्रम् ॥ ॥ ॥

अथ घोरकालानलं ॥ शलाकासप्तकमिति ॥१॥ यदंगेति ॥२॥
भानुनेति ॥२॥ ३॥ ४॥ ५॥ इति घोरकालानलेचक्रम् ॥ ॥
अथ सप्तशलाकाचक्रम् ॥ तिर्यगूर्ध्वगतारेखेति ॥१॥ २॥ ३॥
इति सप्तशलाकाचक्रम् ॥ ॥ अथ पंचशलाकाचक्रम् ॥ तिर्यग्

58

॥ अथ घोरकालानलम् ॥ शलाकासप्तकं चक्रं लिखि
त्वा चंद्रभादितः ॥ त्रिषु त्रिषु च ऋक्षेषु नव सूर्याद
यो ग्रहाः ॥१॥ यदंगे नाम नक्षत्रं दिनऋक्षादि जाय
ते ॥ फलं तस्य प्रवक्ष्यामि एकैकस्य यथाक्रमम् ॥२॥
भानुना शोकसंतापो शशांकः स्तु मलाभदः ॥ भूसुतो
मृत्युमादत्ते बुधे प्रज्ञा प्रजायते ॥३॥ जीवे लाभः ॥
शुभं शुक्रे सूर्यपुत्रे महद्भयम् ॥ राहुणा घातपातं च
केतौ मृत्युर्न संशयः ॥४॥ यात्राजन्मविवाहेषु सं
ग्रामे विग्रहे पि वा ॥ घोरकालानलं चक्रं ज्ञात्वा कर्म
समारभेत् ॥५॥ ॥ इति घोरकालानलं चक्रम् ॥
॥ अथ सप्तशलाकाचक्रम ॥ तिर्यगूर्ध्वगतारेखाः
सप्तसंख्या लिखेद्बुधः ॥ कृत्तिकादीनि भान्यत्र साभिजि
ति क्रमेण च ॥१॥ मुक्तं कांतं तथा भोग्यं विद्धं क्रूरस्य हे
ण भं ॥ शुभाशुभेषु कार्येषु वर्जनीयं प्रयत्नतः ॥२॥
यस्याभिधाननक्षत्रं विद्धं क्रूरग्रहेण च ॥ देशो ग्रामः
पुरं सैन्यं नरो नारी विनश्यति ॥३॥ इति सप्तश° चक्रं ॥
अथ पंचशलाकाचक्रम ॥ तिर्यगूर्ध्वगताः पंच द्वे द्वे रे
खे च कोणगे ॥ ईशकोणाग्ररेखातः कृत्तिकादि लिखे
द्बुधः ॥१॥ विशाखाकृत्तिकायां वै योमरण्यभिरादेवयोः ॥
धनिष्ठासार्पयोर्वै योमघाश्रवण्योस्तथा ॥२॥ शुभा
शुभग्रहे विद्धं भं विवाहे विवर्जयेत् ॥ द्यादि विद्धं महादु
ष्टं राहुविद्धं तथैव च ॥३॥ इति पंचशलाकाचक्रम् ॥ ॥
॥ अथ वक्रचन्द्रचक्रम ॥ वक्रेंदुसदृशं चक्रं त्रित्रिमूलास
मन्वितम् ॥ मध्ये वा दश भान्यत्र षट्पृष्ठे नव मूलके ॥२॥
मध्यमूलस्य मध्यस्य पृष्ठस्य हस्तमादितः ॥ सव्येन गण
येच्चक्रं यावद्योधस्य नामभं ॥२॥ श्रृंगे मृत्यु जयो मध्ये
पृष्ठे भंगो महाहवे ॥ चातुरंगे कवौ कोटं दंदयुद्धे विशेष
तः ॥३॥ इति स्वरोदये वक्रचंद्रचक्रम् ॥ ॥ ॥
ध्वगताः पंचेति १॥ २॥ ३॥ इति पंचशलाकाचक्रं ॥ ॥ अथ वक्रचंद्र
चक्रम् वक्रेन्दुसदृशेति ॥१॥ ॥२॥ ॥३॥ ॥ छछ ॥

59

अथ चतुरंगस्य चक्रम् ॥ रेखात्रयमिति ॥१॥ २॥ इति चतुरं चक्रम् ॥
अथ समरविजये मातृकाचक्रम् ॥ षोडशोर्ध्वगेति ॥ अत्र षष्ठिको
ष्ठकेषु आकारादयो ऽन्तिमवर्जिता लेख्याः तथा च कचटवर्गा अन्ति
मवर्जिताः ककारादयो लेख्याः ॥१॥ तत्राधः पूर्णमासी चतुर्दशी
व्युत्क्रमेण तिथयो लेख्याः ॥ प्रथममातृकाचक्रन्यासः ॥२॥ प्रथममातृ
कावलावलं ॥ यथा देवदत्तयज्ञदत्तयोः देवदत्ते ए आ अ आ एवं यो
गे ६॰ सप्तशेषे ४ अथ यज्ञदत्ते यज्ञदत्त आ एषां योगे जातं ८१
सप्तशेषे ४ एतावता द्वयोः सममेव मात्रासंधिर्जयपराजयोस्तु
समेव ॥३॥ ४॥ ॥ अथ द्वितीयमातृकाचक्रम् ॥ द्वादशेति ॥

॥ अथ चतुरंगस्यैव चक्रम् ॥ रेखात्रयं त्रिशूलाग्रं तिर्यग्रे
खाषडन्वितम् ॥ एकैककोणगास्तत्र मध्यादौ भानुभा
दित ॥१॥ अधस्त्रिके भवेन्मत्स्य चतुर्भिः कोणगैः प्रथम
मध्यमा द्वादशाप्रोक्ता नवर्क्षभंगकारकं ॥२॥ इति चतु० स्य च० ॥
॥ अथ प्रथममातृकाचक्रम् ॥ षोडशोर्ध्वगता रेखाः पंच रे
खाश्च तिर्यगाः ॥ कोष्ठानां भवेत्षष्ठिस्तत्राकारादयोजनात् ॥१॥
ऋऋलिमादिविलोमांकान् लिखेत्प्रतिपदंतकान् ॥ तदधो
मातृकां लिख्य ङञणान्तस्वरोज्झितान् ॥२॥ योधयोर्नाम
वर्णकान्मात्राभेदेन संयुतान् ॥ मुनिभिस्तु हरेद्भागं ब्रूयाद्बा
ले यवलावलं ॥३॥ मातृहीने भवेद्भंगो जयो मात्राधिके र
णे ॥ मातृकायां प्रभेदोयं तस्मात्तेयः प्रयत्नतः ॥४॥
॥ इति प्रथममातृकाचक्रम् ॥ द्वादशोर्ध्वगता रेखाः पंच
रेखाश्च तिर्यगाः ॥ मातृकां प्रन्यसेत्तत्र षडंतस्वरवर्जिताः ॥१॥
कोष्ठकाधो लिखेदंकान् पंचयुग्मं त्रिकं त्रिकम् ॥ षट् द्वंद्वमष्ट
कं त्रीणि नवकैकं तथैव च ॥२॥ नामवर्णस्य यासंख्या मा
त्रासंख्या तथैव च ॥ पिंडितान्नवभिर्भक्त्या यो मात्राधिके
रणे ॥३॥ ॥ इति द्वितीयमातृकाचक्रम् ॥ ॥२॥

ऊर्ध्वगता द्वादश रेखाः कार्याः तथा तिर्यक् षट् एवं पंचपंचाशत्को
ष्ठा भवंति तत्र स्वरान् अंतिमवर्जितान् लिखेत् कादीन् सर्ववर्णान् ॥१॥
कोष्ठकेति कोष्ठाधोंकान् लिखेदंकान् ॥ तानंकान् पंचेंद्रियाग्नि
रामाग्निषट् ऋत्विहिगजो हयः नवेद्विमातृकाचक्रे लिखेदं
कान्क्रमादमून् ॥२॥ नामवर्णेति ॥ उभयो राज्ञो योधयोर्वा ना
मवर्णमात्रासंख्या अधःस्थितांकैः पूर्वकार्या पूर्ववत् ॥ यथा ॥
देवदत्तस्य दे ६ व ६ द ६ त्त ६ ए ६ अ ३५ एवं ४२ नवशेषे ६ ॥
यज्ञदत्तस्य य ३ ज्ञ ८ द ६ त्त ३ अ २० एवं ४० नवशेषे ४ एताव
ता देवदत्तात् यज्ञदत्तस्य पराजयः ॥३॥ एवं द्वितीयमातृका ॥
॥ चक्रम् ॥ ॥२॥ ॥

अथतृतीमातृकाचक्रम् ॥ मनुमार्तंडेति ॥१॥ ङत्रणेति ॥२॥
इतितृतीयमा० चक्रम् ॥३॥ अथच० मा० ॥ भुवनादित्येति ॥१॥ पुन्नामे-
ति ॥२॥ इतिनरपतिजयचर्यास्वरोदये चतुर्थमातृकाचक्रम् ॥४॥
अथसमरविजयतंगोक्तआयचक्रम् ॥ आयचक्रेति ॥१॥२॥
अथोदाहरणम् ॥ यथादेवदत्तयज्ञदत्तयोर्विजयपराजये देव
दत्तनामांकसंख्या एकोनपंचाशत् ४९ यज्ञदत्तनामांकसंख्या
८४ चतुराशीतिः ३ भाभ्यांवसुभाजितेशेषे देवदत्तस्यैकंशेषंय
ज्ञदत्तस्यचत्वारि ४ देवदत्तस्यायोध्वजः यज्ञदत्तस्यायःश्वा ॥
॥३॥४॥ ५ ॥ ६ ॥ ७ ॥ व्याख्या ॥ योधस्यनाम्निपेवर्णाः ॥

॥ अथतृतीमातृ० च० ॥ मनुमार्तंडरोवर्णालितिथ्यस्वर
सदिग्गजाः ॥ नवांतान्त्वधः स्थाप्याः पंचस्वरकखा
दितः ॥१॥ ङत्रणेनान्तकारांतान्नवधाकोष्ठकक्रमैः ॥
नाममात्राक्षरांकैक्यं सप्तशेषाधिके जयः ॥२॥ इतितृ ॥
तीयमा० चक्रम् ३॥ अथचतुर्थमा० ॥ भुवनादित्य
रोवर्णालितिथिवेदाब्धिदिक् १० रसान् ॥ वसुनंदादि
कान्लिख्य षडंत्योद्धृतमातृकान् ॥१॥ पुन्नामव
र्णमात्राणांस्वांकयोगे ष्टशेषिते ॥ मात्राधिकोजयी
युद्धे मात्राहीनः पराजयी ॥२॥ इतिच० मा० चक्रम् ४॥
॥ अथ आयचक्रम् ॥ आयचक्रेद्वादशोर्ध्वरेखाः ॥
षट्तिर्यगाश्रिताः ॥ मनु १४ नक्षत्र २७ दस्रा २ र्क १२
तिथि १५ षट् ६ सागरा ४ नयः ३ ॥१॥ अथसप्तदशा
ष्टौ चरघांतं विलिखेत्क्रमात् ॥ ततःस्वरानथकंठान्व
र्णस्य ङत्रणोज्झितान् ॥२॥ अग्रात्तराधःस्थैःस्वैःस्वैरं
कैःसंकलितैर्भवेत् ॥ वसुभिर्भाजितेशेषे आयाध्व
जमुखादयः ॥३॥ ध्वजोधूम्रोथसिंहःश्वासौरभेयः
खरोगजः ॥ ध्वांक्षश्चैतेक्रमेणैवआयाष्टकमुदाहृ
तम् ॥४॥ काकाद्बलीश्वाचभवेत्सारमेयाच्चरा
सभः ॥ बलवान्रासभाद्दुक्षाद्वृषभादपिकुंजरः ॥५॥
कुंजरादपिपंचास्यःसिंहादपिबलीध्वजः ॥ ध्वजा
दपिबलीधूम्रस्तथाजातिविरोधतः ॥६॥ भागहारेण
सम्यक्त्वा दत्तमःपरिमध्यते ॥ एकाद्येशेषेमताकैर्ध्वजा
द्याआयचक्रमात् ॥७॥ आयचक्रमिदंप्रोक्तंयत्तुरैरविदुर्लभम् ॥
तेषांसंख्याएकगकार्यावर्णपंकार्पतत्राह ॥ वर्गवर्णवशात् वर्णानां
यावत्संख्यावर्णाः तत्तांरव्यानाम्निरूपकोष्ठे वर्णानांसंख्याः
ज्ञाता

कत्रकार्यो तथा नाम्नि ये मात्रा स्वरास्तेषां स्वरवर्गोत्तरसंख्या पृथ
कृत्वा स्वरसंख्या द्विगुणेन वर्णसंख्या चतुर्गुणेन तयोः संख्यां
कसंयोगं कृत्वा भागं हरेत् ॥ ततः ॥ सप्तभिर्यो अवशेषांकस्तेना
८० रेखात्मन स्यात् ॥ बलाबलं विचार्यं स्यात् युद्धावसरे वेदिभिः ॥
तथा च उदाहरणं यथा ॥ देवदत्तस्य · दकारस्य त्रि ३ संख्या
वकारस्य चत्वारः ४ द्वितीयदकारस्यापि ३ संख्या तकारस्येक १
वर्णनाम्नेकादश संख्या जाता ११ अथ स्वरा एते संख्या एकारस्ये
का ११ संख्या ११ यतः षोडशाक्षरवर्गः एवं · दत्त एषां मात्रा स्व
रो अकारः तेषां संज्ञाति सः एवं मात्रा स्वरसंख्या जाता चतुर्दश ३४
मात्रा संख्या द्विगुणेन २८ वर्णसंख्या चतुर्गुणेन जाता ४४ तयोः

अत्र नामाक्षरादीनां युक्तिरन्या ग दृश्यते ॥८॥
जयाजयपरीक्षायां स्वरोदयपरिश्रुतात् ॥९॥
षोडशाक्षरो वर्गः स्यात्कादयः पंचवर्णकाः ॥९॥
चतुश्चतुष्कवर्णैश्च यशौ वर्गाः प्रकीर्तिताः ॥
नाम्नि वर्णस्वरास्संख्या वर्गवर्णवशाद्व
सा ॥१०॥ इति आयचक्रं समाप्तम् ॥

संयोगे जाता संख्या द्विसप्तति ७२ अथ यज्ञदत्तस्य यकारस्ये
का संख्या १ यस्य गकारस्य त्रि ३ संख्या यकारस्यैका १ संख्या द
स्य त्रिसंख्या ३ तकारस्यैक १ एवं वर्णसंख्या एकत्र ९ नव ते
था यज्ञदत्तेनाम्नि वर्णस्वराश्चत्वारो अकारस्तत्संख्या चत्वारः ४
पृथक् स्वरसंख्या द्विगुणेन ८ वर्णस्वरसंख्या चतुर्गुणेन ३६ ए
वं षट्त्रिंशति · तद्योगे चतुश्चत्वारिंशत् ४४ द्वयोः सप्तभिर्ल
ब्धे शेषांको उभयोः शेषं द्वितयं गतम् २ तत्र बलाबलं साम्येन
संधिराधिक्ये तयोः हीनतया वधः इदं बलाबलम् ॥ अथोत्रैव पुन
र्विशेषमाह ॥ कश्चिद्येत्र विषमे समे वापि एकं भवेत् ॥ विषमे
विजयो न्यूनमाधिक्ये पि समे पुरे ॥ यदि द्वयोः सप्तशेषितेसति
द्वयं विषमांकमेवावशिष्यते ॥ तदा यस्याधिकं स जयी भव
ति ॥ द्वयोः समांके ऽवशेषिते सति यस्य हीनांकः ॥ स जयी भ
वति ॥ अथ पुनर्विशेषमाह ॥ यथा शेषे संख्यांके चतुर्भिः
शेषिते सति विषमे हीनके हानिः समा हीने जयो भवेत् ॥ अ
जे समे ऽधिके शेषे जयहानी द्वयकस्तयोः ॥ योधयो राज्ञोर्वि
षमेऽधिके जयः समेऽधिके हानिः ॥ एतच्चक्रं वरश्रीकंसस्य प्रत्य
यकारकम् ॥ इति समरविजये आयचक्रम् ॥ श्रीः ॥
॥ ८०॥ १०॥

अथसारतरमिति ॥ १॥२॥३॥४॥५॥ इति विजयचक्रम् ॥ ना
डीचतुष्टयमिति ॥ राजद्वारं प्राङ्मुखं वामभागे नाडीचतुष्टयं
दक्षिणभागे नाडीचतुष्टयं अष्टनाडिभिरष्टौ स्तंभाः प्रवेशनि
र्गमयोरष्टौ स्तंभा ये स्तंभा प्रवेशे वामभागस्था अत्वारः दक्षिणभा
गस्था अत्वारः ते निर्गमे विपरीतस्थाः तत्र वामे चतुर्षु स्तंभमू
लादुपर्युपरि चतुर्षु दक्षिणभाग स्तंभमूलात् कृत्तिकाद्यष्टावि

॥ अथ सारतरं वक्ष्ये लंपटाचार्यभाषितम् ॥ जयः प
राजयो येन नामोच्चारणतः स्फुटो ॥ १॥ लग्नालग्न
विभेदेन घोषाघोषक्रमेण च ॥ प्रवेशनिर्गमाभ्यां
चक्रमाजयपराजयो ॥ २॥ पवर्गोऽथ एकारश्चल
ग्नाख्यानलराशिदुः ॥ उक्रवर्णान्यवर्णाः स्युरल
ग्नाः परिकीर्तिताः ॥ ३॥ वर्गे त्रिचतुरा घोषाः पं च
माश्च स्वरास्तथा ॥ आद्याद्वितीया वर्णानामघोषाः
शषसैः सह ॥ ४॥ वायुप्रवेशकालः स्यात्प्रवेशश्चा
सनिर्गमः ॥ निर्गमाख्यस्ततो ज्ञेयो नामोच्चारणतो
जयः ॥ ५॥ इति स्वरोदये विजयचक्रम् ॥ ॥ ॥ ॥

अथ तोरणचक्रम् ॥ नाडीचतुष्टयं चक्रं लिखित्वा तो
रणकल्पितः ॥ कृत्तिकादिन्यसेद्भानि प्रवेशनिर्गमे तथा ॥ १॥
स्तंभमूले स्थितान्यष्टौ सिंहद्वारे तथाष्टकम् ॥ मालायाम
ष्टकं तत्रे चतुर्थिदम्यानि तोरणे ॥ २॥ निर्गमे च यदा चंद्रः
प्रवेशे यदि भास्करः ॥ तत्र काले शुभा यात्रा प्रवेशे विघ्नका
रिका ॥ ३॥ चंद्रः प्रवेशकस्यो निर्गमस्थो दिवाकरः ॥ वध
बंधनदा यात्रा प्रवेशे तत्र शोभना ॥ ४॥ चंद्रादित्यौ प्रवेशस्थे अ
थवा निर्गमे स्थितो ॥ मिश्रफलं भवेत्तत्र प्रवेशे चाथ निर्गमे ॥ ५॥
प्रवेशस्थानि कर्तव्या भूम तोरा जपद्दिका ॥ क्रूरग्रहयुतः
चंद्रः प्रवेशे चाथ निर्गमे ॥ ६॥ तद्दिने मृत्युजो चैव नि
षिद्धा राजपद्दिका ॥ शुभग्रहयुते चन्द्रे सिंहद्वारमसं
स्थिते ॥ प्रवेशः पट्टबंधश्च मृत्युंजोशोभनः स्मृतः ॥ ७॥
स्तंभे सोऽरिष्टं पं हं तिसिंहे स्वपरविग्रहः ॥ मला स्थि
ते च लंराज्यं तोरणे सर्वसिद्धयः ॥ ८॥ इति तोरणचक्रम् ॥ ॥

पातितारकाः स्तंभमूलादुपर्युपरि प्रवेशनिर्गमभानि लिखेत् ॥ कृ॰ रो॰ मृ॰
आर्द्रा स्तंभमूले तदुपरि सिंहद्वारि चत्वारि निर्गमाख्यानि पु॰ पु॰ आ॰ म॰
तथात्र स्तंभमूलेषु चत्वारि प्रवेशाख्यानि वामभाग मालायां निर्गमा
ख्यानि चत्वार्यदितिभान्यसेत् भाग्यात्प्रवेशे चत्वारि मालायां विन्य
सेद्बुधः मारुतात्तोरणे तद्वन्निर्गमाख्यानि विन्यसेत् दक्षस्तंभेषु माला
यां प्रवेशाख्यानि मूलतः वैश्वमवान्निर्गमे सिंहस्तंभमूलात्प्रवेशतः ॥ पा
निसिंहद्वाराख्यानि तानि तासां चत्वारि निर्गमाख्यानि चत्वारि प्रवेशा
ख्यानि मालायामष्टौ तत्र राजगृहे सिंहद्वारोपरि मालानिबध्यते पुष्पमुक्ता
आम्रपल्लवमयी वा उपरि च तोरणे नालं क्रियते ॥ १॥ २॥ अथ पकलं निर्ग
मति ॥ ३॥ ४ ५ ६ ७ ८ ॥ इति विजयचक्रम् ॥

॥ इति नरपति जयचर्यायां स्वरोदये तोरणचक्रम् ॥

अथ शशिसूर्यकालानलचक्रमाह ॥ द्वादशारमिति ॥१॥ सिंहादीति
॥२॥ याम्येति ॥३॥ चंद्रक्षेत्रगतेति ॥४॥ सूर्यक्षेत्रगतेति ॥ यदि
पश्चिमदिक्स्थयो रवियायिस्थायिनोः सूर्यक्षेत्रस्थयोरपि सूर्याचं
द्रमसोः विशेषाङ्गजयो ॥५॥ सूर्येत्यंगेति यदि रविश्चंद्र
हस्तो भवति चंद्रदिक्स्थो द्वौ एवं चंद्ररविग्रहादिक्षेत्रगाव
पि तदा महद्युद्धं भवतीति विपर्यये पार्थः ॥६॥ विपर्यये पार्थमेव फल
ति ॥ व्यस्तगाविति ॥ इंदोतमोगारकमध्यसंस्थे चंद्रे वेत्कतंस्थो
रकौ तु ॥ अन्योन्यमध्ये शनिराहू मध्ये शौरी तयोर्लोवलनाशभा
य ॥७॥ इति जयलक्ष्म्यां शशिसूर्यकालानलव्याख्यानम् ॥ ॥

अथ शशिसूर्य॰नलच॰॥ द्वादशारं लिखेच्चक्रं मेषा
दि द्वादशान्वितं ॥ क्षेत्रयुग्मं च तत्रैव शेषं भास्करचंद्र
योः ॥१॥ सिंहादिमकरांतं च भानुक्षेत्रमुदाहृतं ॥ कुंभा
दिकर्कपर्यंतं चन्द्रक्षेत्रं न संशयः ॥२॥ याम्योपरस्थितं
यत्तु भानुक्षेत्रमुदाहृतं ॥ सौम्ये स्थितं यत्तु चंद्रक्षेत्रं वि
निर्दिशेत् ॥३॥ चंद्रक्षेत्रगते सूर्ये चंद्रे तत्रैव संस्थिते ॥
यायिनो विजयो युद्धे स्थायिनो भंगमादिशेत् ॥४॥ सू
र्यक्षेत्रगते चंद्रे सूर्ये तत्रैव संस्थिते ॥ यायी भंगं समा
याति स्थायिनो विजयो भवेत् ॥५॥ सूर्ये चंद्रांग सं
युक्ते चंद्रे चंद्रांग संस्थिते ॥ तदा काले भवेत्संधिर्युद्धं
तस्य विपर्यये ॥६॥ व्यस्तगो यदि चंद्रार्कौ मंदारः
सैन्ययोर्द्वयोः ॥ यात्रायां युद्धकाले च चक्रमेतद्विलो
कयेत् ॥७॥ इति शशिसूर्यकालानलं चक्रम् ॥ ॥

अथ संघट्टचक्रम् ॥ अश्विन्यादि लिखेच्चक्रं स
प्तविंशति तारकाः ॥ त्रिकोणं नवभिर्वेधः कर्तव्यः
स्तिर्यगाकृतिः ॥१॥ अश्विनीरेवतीवेधो वेधश्चाश्व
नि ज्येष्ठयोः ॥ मघापौष्णयोर्मघाश्लेषयोः आश्लेषामूल
योस्तथा ॥२ एवं संघट्टचक्रेस्मिन्कार्यो ऋक्षेगतागृहाः ॥

अथ त्रिकोणसंघट्टमाह ॥ अश्विन्यादि लिखेच्चक्रमिति ॥१॥
अथ वेधमाह ॥ अश्विनीरेवतीवेध इति ॥२॥ एवं संघट्टेति ॥३॥
यथ नाम ऋक्षसंघट्टेति ॥ यस्य ऋक्षसंघट्टे विद्धं भं यस्य भपतेः ॥
तस्यापि भं यदा विद्धं तत्र युद्धं समादिशेत् ॥ अश्विन्यादिसंघट्टे

समारूढयोर्यदि नक्षत्रं क्रूरविद्धं भवति तदा युद्धमादेश्यं ॥ अयना
मर्त्तसंघट्टस्यैवं विचारः ॥ यस्य राज्ञो नक्षत्रं पापविद्धं भवति त
स्यापि यदि संपातयुद्धं स्यात् ॥ तदा तेनैव सह युद्धं जायते ॥ दृ
62 ष्टिवेधं विनाप्यत्र न यथा विश्वदीपके ॥ यथा सर्वतोभद्रे ग्रहदृष्टिं
विना वेधफलं न भवति ॥ तथात्रापि क्रूरग्रहकारकस्यापि यदि
वेधमेन दृष्टिस्तदा युद्धं न स्यात् ॥ येन नक्षत्रे लग्ने राशिस्तद्
दृष्ट राशिदृष्टवेधेन नक्षत्रमपि दृष्टं स्यात् ॥ क्रूरवेधे दृष्टिवेधे तु

अयनामर्त्तसंघट्टे युद्धं भवति नान्यथा ॥ ३ ॥ यस्य
अयनर्त्तसंघट्टे विद्धं भं यस्य भूपतेः ॥ तस्यापि भं यदा
विद्धं तत्र युद्धं समादिशेत् ॥ ४ ॥ अश्विन्यादिकसं
घट्टे भावि युद्धं समादिशेत् ॥ यदा कुत्रेति संग्रामो
वह्निभाद्ये प्रजायते ॥ ५ ॥ निर्वेधे सौम्यवेधे च
युद्धं नास्ति नरेशयोः ॥ क्रूरवेधे भवेद्युद्धं तत्काले
घोरदारुणम् ॥ ६ ॥ शनिभौमार्कपातानां राशिवि
द्धं तु यद्दिने ॥ तद्दिने जायते युद्धं तत्काले घोरदारु
णम् ॥ ७ ॥ ग्रहवेधयुते पाते पातो वा ग्रहसंयुते ॥
घातपातसमायोगे संग्रामं दारुणं भवेत् ॥ ८ ॥
युद्धकाले भवेद्राजा यस्य क्रूरस्तु भं भवेत् ॥ युद्धे वी
भवेत्सौम्येल दृद्वेषविवर्जिते ॥ ९ ॥ सौम्यक्रूरवि
भागेन मित्रामित्रक्रमेण च ॥ वक्रातिचारगत्या च
युद्धमक्रास्तिनास्ति च ॥ १० ॥ आदित्यश्चैव यदा चं
द्रलक्करेखागतो यदि ॥ तद्दिने जायते युद्धं महाप्रा
णिनिपीडितम् ॥ ११ ॥ कुजे राहौ यदा वेधश्चन्द्र
रेखाग्रसंस्थितः ॥ तद्दिने चाग्निपातश्चलो ह
पातो न संशयः ॥ १२ ॥ बुधश्चक्रो यदेकत्र नक्षत्रे चेत्सं
गतः शशी ॥ तदा वृष्टिं विजानीयाद्धि युत्पातं न सं
शयः ॥ १३ ॥ इन्दुर्वक्रशनिराहूणामेकनाडीयदा भवेत् ॥
तद्दिने दुर्दिनं ज्ञेयमभ्रच्छन्नं न संशयः ॥ १४ ॥ राहुर्वक्रकुज
सौमाश्च नाडीवेधगता यदि ॥ कलहं तत्र जानीयादित्यु
क्तं चादियामले ॥ १५ ॥ ॥ युद्धं स्यादति दारुणं नक्षत्रे

॥ इति संघट्टचक्रम् ॥

दृष्टिवेधस्तु सर्वतोभद्रे यतः सर्वतोभद्रमपि चक्रं युद्धस्य मूलभूतं
गं ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ युद्धकाले भवेद्राजेति सौम्यग्रहाः शुक्रबु
धगुरवः पूर्णचन्द्राः अभावे विद्धं यन्नक्षत्रं स युद्धे विजयी भवति युद्धादिषु स्वो
भवति तथा वेधविवर्जितो वि ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

इति जयलक्ष्म्यां टीकायां संघट्टचक्रव्याख्यानम् ॥

अथरुद्रकालानलमाह ॥ सप्तरेखालिखेदिति ॥१॥२॥३॥४॥५॥
६॥७॥ इतिरुद्रका चक्रम् ॥ अथकुलाकुलचक्रम् ॥ द्विती
यादशमीषष्ठीति ॥१॥ रविचन्द्राविति ॥२॥ वारुणार्द्रेति ॥३॥

॥ अथरुद्रकालानलचक्रम् ॥ सप्तरेखालिखेदूर्ध्वाः स
प्ततिर्यक्तथालिखेत् ॥ साभिजिद्वेदभार्यंतं षडंगके
ल्पयेत्ततः ॥१॥ दिनर्क्षाज्जल्पते चक्रं रुद्रसंपुटकर्त्तरि ॥
दंडेकपालवज्रे च ज्ञातव्यं स्वरवेदिभिः ॥२॥ यस्मिन्न
क्षे स्थितश्चंद्रस्तदृक्षात्त्रीणि रुद्रकम् ॥ संपुटेन च भा
न्यत्र कर्त्तरी च ततस्त्रिभिः ॥३॥ दंडे धिष्ण्यानि चत्वारि
कपाले त्रयसप्तकम् ॥ वज्रांगे त्रीणि धिष्ण्यानि षडंग
स्येति निर्णयः ॥४॥ यदंगे नाम नक्षत्रं योधकारस्य जायते ॥
वक्ष्ये शुभाशुभं चास्य रुद्रकालानले स्थितम् ॥५॥ रुद्र
स्ये विभ्रमो युद्धे जयो भवति संपुटे ॥ कर्त्तर्यां सकलेतं युद्धं
दंडेभंगो न संशयः ॥६॥ कपालस्ये भवेन्मृत्युर्वज्रे तस्य
महद्भयम् ॥ रुद्रकालानलं चक्रं उक्तं वै चादियामले ॥७॥
॥ इतिरुद्रकालानलंचक्रम् ॥ अथकुलाकुलचक्रम् ॥
द्वितीयादशमीषष्ठी कुलाकुलमुदाहृतम् ॥ विषमाश्च
कुलाः सर्वाः शेषाः प्रतिपदः कुलाः ॥१॥ रविचंद्रौ गुरुः
सौरिश्चत्वारो ह्यकुलामताः ॥ भौमश्चैको कुलाख्योच
बुधवारः कुलाकुलः ॥२॥ वारुणार्द्राभिजिन्मूलं कुला
कुलमुदीरितम् ॥ कुलानि समधिष्ण्यानि शेषभान्यकु
लानि च ॥३॥ तिथौ वारे च नक्षत्रे अकुले यायिनो ज
यः ॥ कुलाख्ये स्थायिनो ज्ञेयः संधिश्चैव कुलाकुले ॥४॥
॥ ॥ इतिकुलाकुलचक्रम् ॥ ॥ ॥

चं
तिथौवारेचनक्षत्रेति २॥१०॥६॥ श॰ आ॰ अभिजित् मू॰ बुध॰ ॥
१॥३॥५॥७॥९॥११॥१३॥१५॥ रवि॰ सौ॰ गु॰ श॰ कृ॰ म॰ पु॰ आश्ले॰ पूफा॰
ह॰ स्वा॰ म॰ उ॰ पू॰ रे॰ ४।८।१२।१४। भौ॰ श्रु॰ भ॰ रोहिणी
पु॰ म॰ उफा॰ वि॰ ज्ये॰ पूषा॰ श्र॰ उभा॰ क्रमात्कुलाकुलं सुगमं ॥४॥
॥ इतिनरपतिजयचर्यटिकायां जयलक्ष्म्यां ॥
॥ कुलाकुलचक्रं समाप्तम् ॥